श्री वृद्धि-नेमि-अमृत ग्रन्थ[illegible]ला-ग्रन्थाङ्क-[illegible]

श्री

# सिद्धहेमचन्द्र शब्दानुशासनम्

( सिद्धहेमसरस्वती-वृत्तिविभूषितम् )

( षष्ठ-सप्तमाध्यायात्मको द्वितीयः खण्डः )

श्री

— वृत्तिविधाता —

विजयधर्मधुरन्धरसूरिः।

卐

प्र...का...शि...का

श्री जैन साहित्यवर्धक सभा

अहम्मदाबाद

संवत् २०२८

प्रकाशक :
श्री जैन साहित्यवर्धक सभा
शेठ सुरेन्द्रभाई साराभाई
अमदावाद

*

- प्राप्तिस्थान -
१ श्री अमृत पुण्योदय ज्ञानशाळा
श्री केसरियाजी नगर,
पालिताणा

*

२ श्री सरस्वती जैन-पुस्तक भंडार
भूरालाल कालिदास पंडित
हाथीखाना, रतनपोळ,
अमदावाद

*

- मुद्रक -
धैर्यकुमार सी. शाह
आशा प्रीन्टर्स
१०८ के. एन. रोड,
मुंबइ-९ B.R.

*

मूल्यम्
रौप्यमुद्राः ५

## अभिवादनम्

આ પુસ્તકના મુદ્રણાદિમાં શ્રી તપાગચ્છ ગુજરાતી જૈન સંઘ-માટુંગા (મુંબઈ) તરફથી રૂા. ત્રણ હજારની રકમ અમને પ્રાપ્ત થયેલ છે-તેની અનુમોદના સાથે અમે તેઓનું અભિવાદન કરીએ છીએ.

# પ્રકાશકીયમ્

—*—

શ્રી સિદ્ધહેમચંદ્રશબ્દાનુશાસન શ્લોકબદ્ધ શ્રી સિદ્ધહેમસરસ્વતી વૃત્તિસહિત પાંચ અધ્યાયનો પ્રથમ ખંડ અમારી સંસ્થાએ આજથી પંદર વર્ષ પૂર્વે સં. ૨૦૧૩ માં ૩૩ મા ગ્રન્થાંક રૂપે પ્રકટ કર્યો હતો. તેનો બીજો ખંડ છઠ્ઠા અને સાતમા અધ્યાયનો આ પ્રકટ કરવામાં આવે છે.

આ સભાએ આજ સુધીમાં અનેક વિશિષ્ટ ગ્રન્થો પ્રકાશિત કર્યા છે. તે સર્વ પૂજ્યપાદ શાસ્ત્રવિશારદ કવિરત્ન પીયૂષપાણિ આચાર્ય મહારાજશ્રીજી વિજય અમૃતસૂરીશ્વરજી મહારાજશ્રીના આશીર્વાદ અને કૃપાનું પરિણામ છે.

આ બીજા ખંડમાં જે વિલંબ થયો છે. તેની વિગત જણાવવાથી વાચકને કેટલાક અનુભવોની પૂરવણી થાય એમ છે પણ એવા અનુભવો તો મુદ્રણક્ષેત્રમાં નવા નથી, એટલે અમે તે રજૂ કરતા નથી. આ ગ્રન્થનો સારો લાભ લેવાય એવી ઇચ્છા સાથે અમારૂં વક્તવ્ય પૂર્ણ કરીએ છીએ.

લિ૦

**પ્રકાશક**

# પ્રાસ્તવિકમ્

પાંચ અધ્યાયની શ્લોકબદ્ધ ટીકા આ પૂર્વે પ્રથમ-ખંડમાં છપાએલી છે. તેમાં શ્રી સિદ્ધહેમચન્દ્રશબ્દાનુ-શાસન અંગે અને શ્રી સિદ્ધહેમસરસ્વતી વૃત્તિ અંગે ઠીક-ઠીક પરિચય કરાવેલ છે.

આ બીજા ખંડમાં છટ્ઠો અને સાતમો અધ્યાય છે. આ સાત અધ્યાયમાં સંસ્કૃત ભાષાના વ્યાકરણનો વિષય પૂર્ણ થાય છે. પ્રથમના પાંચ અધ્યાયમાં સંજ્ઞાપ્રકરણ, સન્ધિ, નામના રૂપો, સ્ત્રી પ્રત્યય, કારક, સમાસ, ધાતુના રૂપો, પ્રેરક વગેરે પ્રક્રિયાઓ, કૃદન્તો આદિ ઉપયોગી વિષયો સાંગોપાંગ આવી જાય છે.

આ છેલ્લા બે અધ્યાયમાં તદ્ધિતનો વિષય છે. વ્યાક-રણનું અધ્યયન કરનારા સામાન્ય અભ્યાસીઓ તદ્ધિતને છોડી દે છે. કેટલાક ભણે છે તો તે બહુ ઉપયોગી નથી એમ સમજીને ભણે છે. તદ્ધિતના કેટલાક વિષયો તો સમ-જમાં પણ આવી શકતા નથી. તદ્ધિતના અધ્યયન અંગે જુદી જુદી વિચારણાઓ પણ અભ્યાસીઓમાં પ્રચલિત છે.

આ સર્વ છતાં તદ્ધિત એ વ્યાકરણનું એક વિશિષ્ટ અંગ છે અને તેનું અધ્યયન ખૂબજ ઉપયોગી છે.

તદ્ધિતમાં પ્રથમ અપત્યાધિકાર આવે છે. છઠ્ઠા અધ્યાયમાં ૧૪૩ સૂત્રો પ્રથમપાદમાં છે તે સર્વ આ અધિકારને સમજાવે છે. નિયમ-પ્રતિનિયમ તેના પણ અપવાદો આ સર્વ જેમ જેમ હૃદયંગમ થતા જાય તેમ તેમ તેમાં એવો રસ જાગે કે તેને છોડવાનું પણ મન ન થાય એવું છે.

એ પછી બીજા પાદમાં રક્તાદ્યર્થક અધિકાર છે. રક્ત વગેરે ઘણાં અર્થો આ પાદના ૧૪૫ સૂત્રોમાં આવે છે. પ્રયોગમાં પણ આ અધિકાર પ્રચલિત છે. ૨૧૯ સૂત્ર પ્રમાણ ત્રીજા પાદમાં શેષ અર્થમાં આવતા પ્રયોગો સમજાવ્યા છે. ચોથા પાદમાં ૧૮૫ સૂત્રો છે. ને તેમાં ઇકણ્ પ્રત્યયને પ્રધાન રાખીને પ્રયોગો દર્શાવ્યા છે, તેથી તે ઇકણધિકાર કહેવાય છે. આમ છટ્ઠો અધ્યાય પૂર્ણ થાય છે.

સાતમા અધ્યાયના પ્રથમ પાદમાં ૧૯૭ સૂત્રો છે. તેમાં ય, ઇય, ભાવકર્માર્થ અને ક્ષેત્રાદ્યર્થ એમ ચાર અધિકાર છે. બીજા પાદના ૧૭૨ સૂત્રોમાં મુખ્યત્વે મત્વર્થીય અને પ્રકાર, વ્યાશ્રય, અવ્યય, કરોતિ સ્વાર્થ વગેરે અર્થોમાં આવતા અનેકવિધ પ્રત્યયોનો અધિકાર છે.

ત્રીજા પાદમાં મયટ્ વગેરે જુદા જુદા પ્રત્યયો દ્વિસંજ્ઞા, -કે જે શબ્દો સ્ત્રીલિંગ સિવાય બહુવચનમાં પ્રત્યયનો લોપ પામી મૂળ સ્વરૂપમાં આવે છે-અને સમાસાન્ત અધિકાર છે. આ પાદમાં ૧૮૨ સૂત્રો છે. ૧૨૨ સૂત્ર પ્રમાણુ ચોથું પાદ છે તેમાં વૃદ્ધિ અધિકાર, નિપાતન, આદેશ, અન્ત્યસ્વરાદિ-લોપ વગેરે, દ્વિરુક્તવિધિ, તથા પરિભાષાદિ છે. આ પ્રમાણે મહત્વપૂર્ણ વિષયોને સમજાવતા આ બન્ને અધ્યાયો વ્યાકરણમાં અતિશય મહત્વનું સ્થાન ધરાવે છે.

આ અધ્યાયોના પરિચય વગર એવા હજારો શબ્દો છે કે જેમાં સારા અભ્યાસી પણ ગુંચવાઇ જાય. તે શબ્દોના થોડા નમૂના આ પ્રમાણે છે. (૬/૧) બાહ્લીક, પારશવ, કાનીન, ત્રૈવણ, વૈશ્રવણ, રાવણ, (૬/૨) પાર્શ્વ, ગોત્રા, રથકટ્યા, વાતૂલ, પૌરુષેય, હૈયઙ્ગવીન, અવિસોઢ, અવિહ્નસ, અવિમરીસ, (૬/૩) ઉદક્યા, માધ્યન્દિન, (૬/૪) વસ્નિક, વ્રાતીન, વૈરઙ્ગિક, શાલીન (૭/૧) અવિથ્ય, અજથ્ય, બલૂલ, વાતૂલ, વિશાલ, વિશઙ્કટ, અવટીટ, અવનાટ, અવભ્રટ, જાનુદઘ્ન, જાનુદ્વયસ, ઇયત્,કિયત્, તુર્ય, તુરીય, વિદ્યાચંચુ, વિદ્યાચણુ, ઉત્ક, ઉત્સુક, (૭/૨) તુંદિલ, વૃંદારક, શૃઙ્ગારક, બર્હિણુ, ફલિન, મરુત્ત, પર્વત, વર્ણી, સકૃત્, સપત્ની, નિપત્ની, તિલપિંજ, તિલપેજ, પ્રતન, પ્રત્ન, પ્રણ, પ્રીણુ, મૃત્સા, મૃત્સ્ના, (૭/૩) પચતિરૂપમ્, પચન્તકિ,

હિરુક્, હિરકુક્, શુણ્ડાર, વૈસારિણ, મૃગનેત્રા, ભૂજાનિ, (૭/૪) કૈકેય, શાંશપ, આવા તો ઘણાં શબ્દો છે. અધ્યાય અને પાદ સૂચવ્યા છે. તેમાં જોવાથી તે તે શબ્દોની વ્યુત્પત્તિ અર્થ વગેરે જાણી શકાય એવું છે.

બીજા કેટલાંક શબ્દો એવા છે કે જેનો વ્યવહારમાં પરિચય સારા પ્રમાણમાં હોય છે. તેના અર્થો પણ સમજાતા હોય છે. પણ તે કઇ રીતે બને છે, તે જાણવું હોય તો તદ્ધિતને અનુસરવું જ પડે. તેના થોડા નમુનાઓ અધ્યાય-પાદ વાર આ પ્રમાણે છે.

(૬/૧) બાહ્ય, દૈવ, સ્ત્રૈણ, પૌત્ર દૌહિત્ર, ભ્રાતૃવ્ય, ક્ષત્રિય, મનુષ્ય, કુલીન, (૬/૨) જનતા, સહાયતા, વાઙ્મય, ગોમય, પિતૃવ્ય, માતુલ, માતામહી, પિતામહી, પૌષ, ચૈત્ર, કાર્તિક, ફાલ્ગુન, શ્રાવણ, જૈન, નૈયાયિક, મીમાંસક, (૬/૩) રાષ્ટ્રિય, દિવ્ય, ગ્રામીણ, દાક્ષિણાત્ય, પાશ્ચાત્ય, નિત્ય, ભવદીય, પરકીય, રાજકીય, પશ્ચિમ, અંતિમ અગ્રિમ, આદિમ, મધ્યમ, આધ્યાત્મિક, વાર્ષિક, માસિક, ગોશાલ, સાંવત્સરિક, સાંવત્સરક, ગ્રૈવેયક, ચાતુર્માસી, પાંચજન્ય, (૬/૪) નાવિક, પારિપાર્શ્વિક, સામાજિક, સતીર્થ્ય, પથિક, પાન્થ, સાર્વભૌમ, લૌકિક, કૌપીન, ( ૭/૧ ) ધન્ય, હૃદ્ય, પથ્ય, ન્યાય્ય પાથેય, પાદ્ય, અર્ઘ્ય, આતિથ્ય, સખ્ય, સ્તેય, યૌવન, મૌન,

શૌચ, હાર્દ પૌરુષ, તૈલ, ઇન્દ્રિય (૭/૨) વાચાલ, વાગ્મી, મધુર, લક્ષ્મણ, તપસ્વી, પૌર્ણમાસી, હસ્તી, ભસ્મસાત્, નમસ્કાર, અકાર, રેફ, મર્ત્ય સૂર્ય, નવીન, નૂતન, નવ્ય, નૂત્ન, દેવતા. પ્રાજ્ઞ, મૃત્તિકા, (૭/૩) નિતરાં, સ્નાતક, એકાકી, કુટીર, કેશાકેશિ, દ્વીપ, ગવાક્ષ, સમક્ષ, કટાક્ષ, પ્રત્યક્ષ, પરોક્ષ, મહારાજ, ગોષ્ઠ, પુણ્યાહં, સુધર્મા, સુગન્ધિ, સુહૃત્ (૭/૪) શ્વાપદ, સૌભાગ્ય, દૌર્ભાગ્ય, કનિષ્ઠ, શ્રેષ્ઠ, જ્યેષ્ઠ-ઇત્યાદિ આ સર્વથી સમજી શકાશે કે તદ્ધિતનો ઉપયોગ ખૂબ અગત્યનું સ્થાન ધરાવે છે. વાણીનું સૌષ્ઠવ ને વ્યાકરણનું ગૌરવ વધારવું હોય તો તદ્ધિતમાં નિષ્ણાત બનવું અનિવાર્ય છે. તદ્ધિતથી તેનું જ હિત નથી પણ ભાષાશાસ્ત્ર સાથે સંકળાએલા સર્વનું હિત સિદ્ધ થાય છે. વ્યાકરણમાં તદ્ધિત એ એવું અમૃત ઔષધ છે કે જેનું સેવન કરનારનું આરોગ્ય-બલ-પાટવ વગેરે વધે છે. આ શ્લોકબદ્ધ-સિદ્ધહેમસરસ્વતી તેમાં જેટલી સહાયભૂત બનશે તેટલી તેની સફળતા છે એજ

સં. ૨૦૨૮ પ્ર. વૈશાખ વદ ૨ રવિવાર

શ્રી અમૃતપુણ્યોદયજ્ઞાનશાળા શ્રી કેસરિયાજીનગર,

પાલિતાણા — વિજયધુરંધરસૂરિ

=*=

ॐ ह्रीं अर्हं नमः ॥

सकललब्धिसम्पन्नाय श्रीगौतमस्वामिने नमः ॥

शब्दब्रह्मणे स्वस्ति ॥

कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिभ्यो नमः ॥

शासनसम्राट्श्रीनेमिसूरीश्वरसद्गुरुभ्यो नमः ॥

# श्रीसिद्धहेमचन्द्र-शब्दानुशासनम्

( सिद्धहैम-सरस्वती-वृत्तिविभूषितम् )

---

## - षष्ठोऽध्यायः -

### प्रथमः पादः

**तद्धितोऽणादिः ॥ ६ ॥ १ ॥ १ ॥**

वक्ष्यत इत ऊर्ध्वं यः, प्रत्ययोऽणादिमः स च ॥
संज्ञया तद्धितो ज्ञेयः, शाब्दं हितं हि तद्धितात् ॥ १ ॥

**पौत्रादि वृद्धम् ॥ ६ ॥ १ ॥ २ ॥**

परमप्रकृतेर्यत् स्यात्, पौत्रादि तदपत्यकम् ॥
वृद्धं स्यात् संज्ञया गार्ग्यो, गार्गिः पुत्रस्तु गार्गभूः ॥ २ ॥

---

संज्ञया तद्धितः—तद्धितसंज्ञ इति । गार्गभूः—गर्गभवः । २ ।

**वंश्यज्यायोभ्रात्रोर्जीवति प्रपौत्राद्यस्त्री युवा**
**॥ ६ ॥ १ ॥ ३ ॥**

युवसंज्ञं प्रपौत्रादि, स्त्रीवर्जं स्यादपत्यकम् ॥
स्वहेतौ वंश्यपित्रादौ, ज्येष्ठे भ्रातरि जीवति ॥ ३ ॥

**सपिण्डे वयःस्थानाधिके जीवद्वा ॥ ६ ॥ १ ॥ ४ ॥**

वयःस्थानाधिके ज्ञेयं, सपिण्डे स्त्रीविवर्जितम् ॥
युवसंज्ञं प्रपौत्राद्य–पत्यं जीवद्विभाषया ॥ ४ ॥

**युववृद्धं कुत्सार्चे वा ॥ ६ ॥ १ ॥ ५ ॥**

कुत्सार्चयोर्यथासङ्ख्यं, युवा वृद्धं युवा नवा ॥
गार्ग्यो गार्ग्यायणो जाल्मो–ऽपत्यं स्याद् वृद्धमर्चितम् ॥ ५ ॥

**संज्ञा दुर्वा ॥ ६ ॥ १ ॥ ६ ॥**

या संज्ञा व्यवहाराय, हठात् सा दुर्विभाषया ॥
भवेयुर्देवदत्तीया, दैवदत्ता द्वये यथा ॥ ६ ॥

**त्यदादिः ॥ ६ ॥ १ ॥ ७ ॥**

सर्वाद्यन्तर्गता ज्ञेया, दुःसंज्ञकास्त्यदादयः ॥
त्यदीयं हि तदीयं स्यात्, मदीयं ननु मामकम् ॥ ७ ॥

---

प्रपौत्रः पौत्रापत्यम्, परमप्रकृतेश्चतुर्थः । ३ । समानः पिण्डः सप्तमः पुरुषो यस्य तस्मिन्, वयो यौवनादि, स्थानं पितापुत्र इत्यादि ताभ्यामधिके जीवति सतीति–यावत् । ४ । स्पष्टम् । ५ । सूत्रत्रयं स्पष्टम् ॥ ६ ॥ ७ ॥ ८ ॥

## वृद्धिर्यस्य स्वरेष्वादिः ॥ ६ ॥ १ ॥ ८ ॥

शब्दस्य यस्य वृद्धिः स्यात्, स्वराणामादिमः स्वरः ॥
दुसंज्ञः स च विज्ञेय, आम्रगुप्तायनिर्यथा ॥ ८ ॥

## एदोद् देश एवेयादौ ॥ ६ ॥ १ ॥ ९ ॥

देशार्थस्यैव यस्य स्यात्, स्वराणामादिरेत्तथा ॥
ओदीयादौ विधेये स, दुस्तन् सैपुरिकादयः ॥ ९ ॥

## प्राग्देशे ॥ ६ ॥ १ ॥ १० ॥

प्राग्देशे यस्य शब्दस्य, स्वराणामादिमः स्वरः ॥
एदोद् वा स दुरीयादौ, गोनर्दीयादयो यथा ॥ १० ॥

## वाद्यात् ॥ ६ ॥ १ ॥ ११ ॥

वेत्याद्यादिति च द्वंतं, स्यादधिकृतमत्र तत् ॥
वाक्यं वृत्तिश्च सूत्रादौ, निर्दिष्टात्प्रत्ययो मतम् ॥ ११ ॥

## गोत्रोत्तरपदाद् गोत्रादिवाऽजिह्वाकात्यहरितकात्यात् ॥ ६ ॥ १ ॥ १२ ॥

गोत्रोत्तरपदाद् गोत्रा-दिव प्रत्ययतद्धितः ।
न जिह्वाकात्यतश्चैवं, हरितकात्यतो भवेत् ॥ १२ ॥

---

एवं सैपुरिकी, स्कौनगरिका, स्कौनगरिकी ॥ ९ ॥ शरावत्या सरितः पूर्वतो दक्षिणतो वा देशः प्राग्देशः, यत् प्राञ्चः । प्रागुदञ्चो विभजते, हंसः क्षीरोदकं यथा ॥ विदुषां शब्दसिद्धचै या, सा वः पायाच्छरावती ॥ १० ॥ वृत्तिः समासः ॥ ११ ॥ कडारजैमिनीयाः ॥ १२ ॥

## प्राग् जितादण् ॥ ६ ॥ १ ॥ १३ ॥

अपवादं परित्यज्य, प्राग् जितादण् भवेन्नवा ॥
अधिकारो विधिश्चैवं, परिभाषाऽपि भाव्यताम् ॥ १३ ॥

## धनादेः पत्युः ॥ ६ ॥ १ ॥ १४ ॥

धनादेर्गणतो यः स्यात्, पतिशब्दस्तदन्ततः ॥
अण् भवेत् प्राग्जितीयो वा–ऽऽश्वपतोऽश्वपतेर्भवः ॥ १४ ॥

## अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युत्तर-पदाञ् ञ्यः ॥ ६ ॥ १ ॥ १५ ॥

पत्युत्तरपदाद् दित्या–दिभ्यश्चानिदमर्थतः ।
प्रत्ययोऽणपवादे ञ्यो–ऽपत्यादौ दैत्य इष्यते ॥ १५ ॥

## बहिषष्टीकण् च ॥ ६ ॥ १ ॥ १६ ॥

प्राग्जितीये बहिश्शब्दा–ट्टीकण् ञ्यश्चापि जायते ।
तद् बाहीको बहिर्जातो, बाह्यश्च रमते बहिः ॥ १६ ॥

## कल्यग्नेरेयण् ॥ ६ ॥ १ ॥ १७ ॥

स्यादाभ्यां प्राग्जितीयेऽर्थे,–ऽनिदम्यणपवादके ।
एयण् कालेयमाग्नेयं कलावग्नौ तथा भवम् ॥ १७ ॥

---

यथौपगवादिकम् ॥ १३ ॥ एवं धानपतादयः ॥ १४ ॥ एवम् आदित्यः, आदित्य्यः, याम्यः, बार्हस्पत्यः, । अनिदमीति किम् ? आदित्यस्येदम् आदितीयं मण्डलम् ॥ १५ ॥ सूत्रचतुष्कं स्पष्टम् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

## पृथिव्या आऽञ् ॥ ६ ॥ १ ॥ १८ ॥

पृथिव्याः प्रागजितीयेऽर्थे,—ऽनिदम्यणपवादके ।
स्यातां आऽञौ ततः सिद्धं, पार्थिवा पार्थिवी तथा ॥ १८ ॥

## उत्सादेरञ् ॥ ६ ॥ १ ॥ १९ ॥

उत्सादेः प्रागजितीयेऽर्थे—ऽनिदम्यणपवादके ।
अञ्प्रत्ययो भवेदौत्स औदपानो यथायथम् ॥ १९ ॥

## बष्कयादसमासे ॥ ६ ॥ १ ॥ २० ॥

बष्कयात् प्रागजितीयेऽर्थे—ऽनिदम्यणपवादके ।
असमासे भवेदञ् तत्, सौबष्कयिश्च बाष्कयः ॥ २० ॥

## देवाद् यञ् च ॥ ६ ॥ १ ॥ २१ ॥

देवतः प्रागजितीयेऽर्थे—निदम्यणपवादके ।
भवेतां यञञौ दैव्यं, दैवं नैवं मुधा कुरु ॥ २१ ॥

## अः स्थाम्नः ॥ ६ ॥ १ ॥ २२ ॥

अः स्थाम्नः प्रागजितीयेऽर्थे, प्रत्ययोऽपत्यकार्थकः ।
अश्वत्थामो भवेदश्व—स्थाम्नोऽपत्यं पुमानिति ॥ २२ ॥

## लोम्नोऽपत्येषु ॥ ६ ॥ १ ॥ २३ ॥

स्याल्लोम्नो बह्वपत्यार्थे, प्रागजितीयार्थके तथा ।
उडुलोमा बहुत्वे स्या—दौडुलोमिर्न चेद्बहुः ॥ २३ ॥

---

श्लोकचरमचरणेऽग्रिमं प्रत्युदाहरणमुदाहरणञ्च बाष्कय इति ॥ २० ॥
सूत्रद्वयमतिरोहितम् ॥ २१ ॥ २२ ॥ तथा अः प्रत्ययः ॥ २३ ॥

**द्विगोरनपत्ये यस्वरादेर्लुबद्विः ॥ ६ ॥ १ ॥ २४ ॥**

अनपत्ये द्विगोर्यादेः, स्वरादेः प्रत्ययस्य लुप् ।
न तु द्विः प्रागजितीयेऽर्थे, पञ्चकपाल इष्यते ॥ २४ ॥

**प्राग्वतः स्त्रीपुंसात् नञ्स्नञ् ॥ ६ ॥ १ ॥ २५ ॥**

क्रमशः प्राग्वतोऽर्थेषु, स्त्रीपुंसाभ्यां तु नञ्स्नञौ ।
स्त्रीणां पुंसां समूहोऽयं, स्त्रैणं पौंस्नं पृथक् पृथक् ॥ २५ ॥

**त्वे वा ॥ ६ ॥ १ ॥ २६ ॥**

स्त्रीपुंसाभ्यां यथासङ्ख्यं, नञ्–स्नञौ त्वे विभाषया ।
स्त्रीत्वं स्त्रैणं भवेत् स्त्रीषु, पुंस्त्वं पौंस्नं च पूरुषे ॥ २६ ॥

**गोस्वरे यः ॥ ६ ॥ १ ॥ २७ ॥**

स्वरादितद्धितप्राप्तौ, गोशब्दाद् यो भवेत् ततः ।
पञ्चगव्यं पवित्रं चेत्, पवित्रं किन्न गोमयम् ॥ २७ ॥

**ङसोऽपत्ये ॥ ६ ॥ १ ॥ २८ ॥**

स्युः षष्ठ्यन्तादपत्येऽर्थे, यथाप्रोक्तमणादयः ।
औपगवस्तथा दैत्यो, भानवीयश्च भानवः ॥ २८ ॥

---

अस्यार्थः अपत्यादन्यस्मिन् प्रागजितीयेऽर्थे भूतस्य द्विगोः परस्य यादेः स्वरादेश्च प्रत्ययस्य लुप् स्यात् न तु द्विः । द्विरथः । अनपत्य इति किम् ? द्वैमातुरः । अद्विरिति किम् ? पाञ्चकपालम् ॥ २४ ॥ प्रागवत इति किम् ? स्त्रीवत् ॥ २५ ॥ स्पष्टं सूत्रद्वयम् ॥ २६ ॥ २७ ॥ भानवीय इति प्रत्युदाहरणम् ॥ २८ ॥

## आद्यात् ॥ ६ ॥ १ ॥ २९ ॥

परमप्रकृतेरेवा-ऽपत्ये यस्तद्धितः स हि।
औपगवस्तथैवौप-गविरौपगवः परम् ॥ २९ ॥

## वृद्धाद्यूनि ॥ ६ ॥ १ ॥ ३० ॥

आद्याद् वृद्धस्तदन्तात् स्याद्, यून्यपत्ये विवक्षिते।
युवापत्यं हि गार्ग्यस्य, गार्ग्यायण उदाहृतः ॥ ३० ॥

## अत इञ् ॥ ६ ॥ १ ॥ ३१ ॥

स्यात् षष्ठ्यन्ताददन्तादिञ्, प्रत्ययोऽपत्यके परः।
सैष दाशरथी रामो, दाक्षिः कैलालपस्तथा ॥ ३१ ॥

## बाह्वादिभ्यो गोत्रे ॥ ६ ॥ १ ॥ ३२ ॥

बाह्वादिभ्यो ङसन्तेभ्यो, गोत्रे इञ् प्रत्ययो भवेत्।
जनो बाहोरपत्यं ना, बाहविरौपबाहविः ॥ ३२ ॥

## वर्मणोऽचक्रात् ॥ ६ ॥ १ ॥ ३३ ॥

अचक्रात् परतो यश्च, वर्मन्शब्दस्तदन्ततः।
इञपत्ये भवेदैन्द्र-वर्मिर्ना चाक्रवर्मणः ॥ ३३ ॥

---

उपगोरपत्यमौपगवस्तस्यापत्यमौपगविः, औपगवेरपत्यमौपगवः ॥ २९ ॥ यूनि अपत्ये यः प्रत्ययः स आद्याद् वृद्धाद् यो वृद्धप्रत्ययस्तदन्तात् स्यादिति व्यक्तोऽर्थः ॥ ३० ॥ कैलालप इति प्रत्युदाहरणम् ॥ ३१ ॥ स्वापत्यसन्तानस्य स्वव्यपदेशहेतुर्य आद्यपुरुषस्तदपत्यं गोत्रम् ॥ ३२ ॥ सूत्रपञ्चकं व्यक्तम् ॥ ३३ ॥–

## अजादिभ्यो धेनोः ॥ ६ ॥ १ ॥ ३४ ॥

अजादिभ्यः परो यश्च, धेनुशब्दस्तदन्ततः ।
इञपत्ये भवेदाज–धेनविर्बाष्कधेनविः ॥ ३४ ॥

## ब्राह्मणाद्वा ॥ ६ ॥ १ ॥ ३५ ॥

ब्राह्मणशब्दतो धेनो–रिञपत्ये भवेन्नवा ।
ब्राह्मणधेनविश्चैवं, भवेद् ब्राह्मणधेनवः ॥ ३५ ॥

## भूयस्–सम्भूयो–ऽम्भो–ऽमितौजसः स्लुक् च ॥ ६ ॥ १ ॥ ३६ ॥

इञपत्ये भवेदेभ्यः, सस्यैतेषां तथा च लुक् ।
भौयिराम्भिश्च साम्भूयि–रामितौजिरुदाहृतिः ॥ ३६ ॥

## शालङ्क्यौदिषाडिवाड्वलिः ॥ ६ ॥ १ ॥ ३७ ॥

एतेऽपत्ये निपात्यन्ते, इञन्ता वेदसङ्ख्यकाः ।
औदिः षाडिश्च शालङ्कि–र्भवेत्तथैव वाड्वलिः ॥ ३७ ॥

## व्यास–वरुट–सुधातृ–निषाद–बिम्ब–चण्डालादन्त्यस्य चाक् ॥ ६ ॥ १ ॥ ३८ ॥

एभ्योऽपत्ये भवेदिञ् त–द्योगे चैषामकामतः ।
अन्त्यस्य बैम्बकिर्वैया–सकिर्वारुटकिस्तथा ॥ ३८ ॥

---

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ एवं सौधातकिः, नैषादकिः, चाण्डालकिः ॥ ३८ ॥

## पुनर्भू--पुत्र--दुहितृ--ननान्दुरनन्तरेऽञ् ॥ ६ ॥ १ ॥ ३९ ॥

अञ् षष्ठ्यन्तेभ्य एभ्योऽन-न्तरेऽपत्ये भवेत्ततः ।
पौत्रः पौनर्भवो दौहि-त्रो नानान्द्रो न किं प्रियः ? ॥३९॥

## परस्त्रियाः परशुश्चासावर्ण्ये ॥ ६ ॥ १ ॥ ४० ॥

अपत्येऽनन्तरे स्यादञ्-असावर्ण्ये परस्त्रियाः ॥
परशुश्चास्य तद्योगे, पारशवः क्वचिन्मतः ॥ ४० ॥

## विदादेर्वृद्धे ॥ ६ ॥ १ ॥ ४१ ॥

वृद्धेऽपत्ये विदादिभ्यो, भवेदञ् प्रत्ययः परः ॥
वैद और्वस्तथा ज्ञेयो, भारद्वाजश्च काश्यपः ॥ ४१ ॥

## गर्गादेर्यञ् ॥ ६ ॥ १ ॥ ४२ ॥

गर्गादिभ्यो ङसन्तेभ्यो, वृद्धेऽपत्ये तु यञ् भवेत् ॥
गार्ग्यो वात्स्यो भवेद्वृद्ध-मपत्यं गर्गवत्सयोः ॥ ४२ ॥

## मधुबभ्रोर्ब्राह्मणकौशिके ॥ ६ ॥ १ ॥ ४३ ॥

मधोर्बभ्रोर्यथासङ्ख्यं, ब्राह्मणे कौशिके तथा ॥
यञपत्ये भवेद् वृद्धे, माधव्यो ब्राह्मणो मतः ॥ ४३ ॥

---

स्पष्टम् ॥ ३९ ॥ असावर्ण्य इति किम् ? पारस्त्रैणेयः ॥ ४० ॥ स्पष्टे ॥ ४१ ॥ ४२ ॥ बाभ्रव्यः कौशिकः । माधवबाभ्रवायन्यौ ॥ ४३ ॥

## कपिबोधादाङ्गिरसे ॥ ६ ॥ १ ॥ ४४ ॥

आभ्यामाङ्गिरसे वृद्ध–ऽपत्ये यञ् प्रत्ययो भवेत् ॥
काप्यो बौध्यो भवे–दाङ्गि–रसश्चेद् यञ् नचान्यथा ॥ ४४ ॥

## वतण्डात् ॥ ६ ॥ १ ॥ ४५ ॥

अस्मादाङ्गिरसे वृद्धे, यञेव प्रत्ययो भवेत् ॥
आङ्गिरसस्तु वातण्ड्यो, वातण्डश्चान्यथा मतः ॥ ४५ ॥

## स्त्रियां लुप् ॥ ६ ॥ १ ॥ ४६ ॥

स्त्रियामाङ्गिरसे वृद्धे, वतण्डाल्लुप् यञो भवेत् ॥
आङ्गिरसी वतण्डी स्या–द्वातण्डी पुनरन्यथा ॥ ४६ ॥

## कुञ्जादेर्ञायन्यः ॥ ६ ॥ १ ॥ ४७ ॥

वृद्धे षष्ठ्यन्तकुञ्जादे,–र्ञायन्यः प्रत्ययो भवेत् ॥
कौञ्जायन्यो मतो वृद्धः, कौञ्जिस्तु वृद्धतोऽन्यतः ॥ ४७ ॥

## स्त्रीबहुष्वायनञ् ॥ ६ ॥ १ ॥ ४८ ॥

कुञ्जादिभ्यो ङसन्तेभ्यः, स्त्रीबहुष्वायनञ् भवेत् ॥
कुञ्जस्यापत्यमित्यर्थे, नारी कौञ्जायनी मता ॥ ४८ ॥

## अश्वादेः ॥ ६ ॥ १ ॥ ४९ ॥

अश्वादिभ्यो भवेद् वृद्धेऽ–पत्ये प्रत्यय आयनञ् ॥
आश्वायनस्तथा शाङ्खा–यनो वैश्वानरायणः ॥ ४९ ॥

---

सूत्रत्रयं स्पष्टम् ॥ ४४ ॥ ॥ ४५ ॥ ४६ ॥ एवं ब्राध्नायन्य इत्यादयः ॥ ४७ ॥ एवं कौञ्जायनाः ॥ ४७ ॥ सूत्रचतुष्कमतिरोहितार्थम् ॥ ४९ ॥ ...

## शपभरद्वाजादात्रेये ॥ ६ ॥ १ ॥ ५० ॥

आभ्यां स्यादायनञ् वृद्धे, आत्रेये तद्धितस्ततः ॥
भारद्वाजायनः शापा–यनश्चात्रेय उच्यते ॥ ५० ॥

## भर्गात् त्रैगर्ते ॥ ६ ॥ १ ॥ ४९ ॥

भर्गात् स्पादायनञ् वृद्धे, त्रैगर्ते तद्धितस्ततः ॥
भार्गायणो भवेदत्र, त्रैगर्तो भार्गिरन्यथा ॥ ५० ॥

## आत्रेयाद् भारद्वाजे ॥ ६ ॥ १ ॥ ५२ ॥

भारद्वाजे भवेद् यूनि, ह्यात्रेयादायनञ् ततः ॥
स्यादात्रेयायणो भार–द्वाज आत्रेय उत्तमः ॥ ५१ ॥

## नडादिभ्य आयनण् ॥ ६ ॥ १ ॥ ५३ ॥

नडादिभ्यो ङमन्तेभ्य, आयनण्प्रत्ययो भवेत् ॥
वृद्धेऽपत्ये जनो नाडा--यणश्चारायणस्तथा ॥ ५३ ॥

## यञिञः ॥ ६ ॥ १ ॥ ५४ ॥

वृद्धार्थयञिञन्तात् स्या–दायनण्प्रत्ययः परः ॥
यून्यपत्ये युवापत्यं, दाक्षेर्दाक्षायणो यथा ॥ ५४ ॥

## हरितादेरञः ॥ ६ ॥ १ ॥ ५५ ॥

आयनण् यूनि वृद्धार्था–ञन्ततो हरितादितः ॥
तद् हारितायनः कैन्दा–सायनोऽन्यत्र हारितः ॥ ५५ ॥

---

५० ॥ ५१ ॥ ५२ ॥ वृद्धाभावे नाडिः ॥ ५३ ॥ एवं गार्ग्यायणः ॥ ५४ ॥ स्पष्टं ॥ ५५ ॥

## कोष्टुशलङ्कोर्लुक् च ॥ ६ ॥ १ ॥ ५६ ॥

वृद्धे स्यादायनण् आभ्यां, तयोश्चान्तस्य लुग् भवेत्
क्रोष्टायनस्तथा शाल–ङ्कायनः साध्यतामितः ॥ ५६ ॥

## दर्भकृष्णाऽग्निशर्मरणशरद्वच्छुनका–दाग्रायणब्राह्मणवार्षगण्यवाशिष्ठभार्गववात्स्ये ॥ ६ ॥ १ ॥ ५७ ॥

एभ्यो यथाक्रमं वृद्धे–ष्वेषु स्यादायनण् ततः ॥
स्याच्चेदाग्रायणो दार्भा–यणः कार्ष्णायनो द्विजः ॥ ५७ ॥

## जीवन्तपर्वताद् वा ॥ ६ ॥ १ ॥ ५८ ॥

जीवन्तपर्वताभ्यां वा, वृद्धे स्यादायनण् ततः ॥
जैवन्तायनजैवन्ती, पार्वतिः पार्वतायनः ॥ ५८ ॥

## द्रोणाद् वा ॥ ६ ॥ १ ॥ ५९ ॥

द्रोणादपत्यमात्रे स्या–दायनण्प्रत्ययो नवा ॥
द्रौणिर्द्रौणायनोऽपत्यं, द्रोणस्य कस्यचिद्नृपः ॥ ५९ ॥

## शिवादेरण् ॥ ६ ॥ १ ॥ ६० ॥

शिवादिभ्यो ङसन्तेभ्यो–ऽपत्यमात्रेऽण् भवेत्ततः ॥
शैवः प्रौष्ठश्च काकुस्थ–स्तार्णः कार्णश्च वार्ष्णिकः ॥ ६० ॥

---

...५६ ॥ द्विजः–ब्राह्मणः । अग्निशर्मायणो वार्षगण्यः, राणायनो वाशिष्ठः, शारद्वतायनो भार्गवः, शौनकायनो वात्स्यः, ॥ ५७ ॥ सूत्रत्रयं स्पष्टम् ॥ ५८ ॥ ५९ ॥ ६० ॥

## ऋषिवृष्ण्यन्धककुरुभ्यः ॥ ६ ॥ १ ॥ ६१ ॥

अण् स्याद् ऋष्यादिवाचिभ्यो-ऽपत्ये प्रत्ययतद्धितः ॥
वाशिष्ठो वासुदेवश्च, श्वाफल्को नाकुलस्तथा ॥ ६१ ॥

## कन्यात्रिवेण्याः कनीनात्रिवणं च ॥ ६ ॥ १ ॥ ६२ ॥

अण् अपत्ये भवेदाभ्यां, कनीनत्रिवणौ क्रमात् ॥
आदेशावेतयोः स्यातां, कानीनस्त्रैवणस्ततः ॥ ६२ ॥

## शुङ्गाभ्यां भारद्वाजे ॥ ६ ॥ १ ॥ ६३ ॥

पुंस्त्रीकशुङ्गशुङ्गाभ्यां, भारद्वाजेऽण् भवेत्ततः ॥
भारद्वाजो भवेत् शौङ्गो-ह्यपत्यं शुङ्गशुङ्गयोः ॥ ६३ ॥

## विकर्ण-च्छगलाद् वात्स्यात्रेये ॥ ६ ॥ १ ॥ ६४ ॥

विकर्णच्छगलाभ्यां स्या-दण् वात्स्यात्रेययोः क्रमात् ॥
वैकर्णो वात्स्य आत्रेयः, च्छागलश्च यथायथम् ॥ ६४ ॥

## णश्च विश्रवसो विश्लुक् च वा ॥ ६ ॥ १ ॥ ६५ ॥

विश्रवसोऽणपत्ये ण-श्चान्तो विश्लुक् च वा भवेत् ॥
लङ्कायां रक्षसां स्वामी, वैश्रवणश्च रावणः ॥ ६५ ॥

---

उदाहरणचतुष्कं क्रमशः ऋष्यादिवाचिशब्दानामवसेयम् ॥ ६१ ॥ सूत्र-चतुष्कं व्यक्तार्थम् ॥ ६२ ॥-६३ ॥ ६४ ॥ ६५ ॥

**सङ्ख्यासंभद्रान्मातुर्मातुर्च ॥ ६ ॥ १ ॥ ६६ ॥**

सङ्ख्यासंभद्रतो मातृ–शब्दादण् प्रत्ययो भवेत् ॥
मातुश्च मातुरादेशो, द्वैमातुरो गजाननः ॥ ६६ ॥

**अदोर्नदीमानुषीनाम्नः ॥ ६ ॥ १ ॥ ६७ ॥**

अदुसंज्ञान्नदीनाम्नो, मानुषीनामतोऽपि च ॥
भवेदण् प्रत्ययोऽपत्ये, दैवदत्तश्च यामुनः ॥ ६७ ॥

**पीलासाल्वामण्डूकाद् वा ॥ ६ ॥ १ ॥ ६८ ॥**

त्रिभ्यः पीलादिशब्देभ्यो–ऽपत्ये स्यात् प्रत्ययोऽण् नवा
पैलः साल्वश्च पैलेयः, साल्वेयः साध्यते यतः ॥ ६८ ॥

**दितेश्चैयण् वा ॥ ६ ॥ १ ॥ ६९ ॥**

दितेर्मण्डूकतोऽपत्ये, स्यादेयण् वा ङसन्ततः ॥
माण्डूकेयश्च माण्डूकि–र्दैतेयो दैत्य इत्यपि ॥ ६९ ॥

**ङ्यापूत्यूङः ॥ ६ ॥ १ ॥ ७० ॥**

ङयन्तादाबन्ततस्त्यन्ता–दूङन्ताश्चापि शब्दतः ॥
स्यादेयणप्रत्ययोऽपत्ये, सौपर्णेयः खगेश्वरः ॥ ७० ॥

---

एवं साम्मातुरः, भाद्रमातुरः ॥ ६६ ॥ यामुनः प्रणेतः अदोरिति किम् ? चान्द्रभागेयः ॥ ६७ ॥ एवं माण्डूकः माण्डूकिः ॥ ६८ ॥ स्पष्टम् ॥ ६९ ॥ एवं वैनतेयः यौवतेयः, कामण्डलेयः ॥ ७० ॥

## द्विस्वरादनद्याः ॥ ६ ॥ १ ॥ ७१ ॥

अनदीवाचिनो ङ्यापत्यू-ङन्ताद् द्विस्वरकात् परः ॥
स्यादेयण् तेन दात्तेयो, गौप्तेयः सैप्र उत्तरः ॥ ७१ ॥

## इतोऽनिञः ॥ ६ ॥ १ ॥ ७२ ॥

इञ्वर्जेदन्ततोऽपत्ये, स्यादेयण् द्विस्वरात् परः ॥
नाभेयः स्यान्न मारीचो, दाक्षायणस्तथैव नो ॥ ७२ ॥

## शुभ्रादिभ्यः ॥ ६ ॥ १ ॥ ७३ ॥

शुभ्रादिभ्यो भवेदेय-णपत्ये प्रत्ययस्ततः ॥
शौभ्रेयश्चाम्बिकेयश्च, गाङ्गेयो भीष्म उच्यते ॥ ७३ ॥

## श्यामलक्षणाद् वाशिष्ठे ॥ ६ ॥ १ ॥ ७४ ॥

श्यामलक्षणशब्दाभ्यां, वाशिष्ठे एयणुच्यते ॥
श्यामेयो लाक्षणेयश्च, वाशिष्ठो विबुधैर्मतः ॥ ७४ ॥

## विकर्णकुषीतकात् काश्यपे ॥ ६ ॥ १ ॥ ७५ ॥

आभ्यामेयण् भवेत्काम-मपत्ये काश्यपे ततः ।
वैकर्णेयस्तथा कौषी-तकेयः काश्यपो मतः ॥ ७५ ॥

## भ्रुवो भ्रुव् च ॥ ६ ॥ १ ॥ ७६ ॥

भ्रुवोऽपत्ये भवेदेयण्, भ्रुवादेशश्च तद्भ्रुवः ॥
भ्रौवेयः स्याद्भ्रुवोऽपत्यं, भ्रूजन्माऽपि नचाद्भुतम् ॥ ७६ ॥

---

सूत्रनवकं स्पष्टार्थम् ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ...

## कल्याण्यादेरिन् चान्तस्य ॥ ६ ॥ १ ॥ ७७ ॥

एभ्योऽपत्ये भवेदेय–णन्तस्य चेन् मतस्ततः ॥
काल्याणिनेय–सौभागि–नेयादय उदाहृताः ॥ ७७ ॥

## कुलटाया वा ॥ ६ ॥ १ ॥ ७८ ॥

अतोऽपत्ये भवेदेय–णिन् चान्तस्य तथा च वा ॥
**कौलटेयस्तथा कौल–टिनेयः कुलटात्मजः ॥ ७८ ॥**

## चटकाण्णैरः स्त्रियां तु लुप् ॥ ६ ॥ १ ॥ ७९ ॥

अतोऽपत्ये भवेण्णैर–प्रत्ययस्तस्य लुप् स्त्रियाम् ॥
चाटकैरः पुमान् ज्ञेयो, स्त्रियां तु चटका मता ॥ ७९ ॥

## क्षुद्राभ्य एरण् वा ॥ ६ ॥ १ ॥ ८० ॥

क्षुद्रार्थेभ्यो भवेत् स्त्रीभ्यो–ऽपत्य एरण् नवा ततः ॥
**काणेरश्चाथ काणेयो, दासेरस्तद्धिताहितः ॥ ८० ॥**

## गोधाया दुष्टे णारश्च ॥ ६ ॥ १ ॥ ८१ ॥

दुष्टेऽपत्ये हि गोधाया, णार एरण् च जायते ॥
**गौधारश्चाथ गौधेरो, गोधाया जन्यतेऽहिना ॥ ८१ ॥**

## जण्ट–पण्टात् ॥ ६ ॥ १ ॥ ८२ ॥

जण्टपण्टेतिशब्दाभ्या–मपत्ये णारप्रत्ययः ॥
**जाण्टारश्चापि पाण्टार–श्चापत्ये जण्टपण्टयोः ॥ ८२ ॥**

---

॥ ७७ ॥ ॥ ७८ ॥ ॥ ७९ ॥ अङ्गहीना अनियतपुंस्का वा स्त्रियः क्षुद्राः । एवं दासेयः ॥ ८० ॥ गौधेयोऽन्यः ॥ ८१ ॥ स्पष्टार्थमिदं सूत्राणामष्टकम् ॥ ८२ ॥...

## चतुष्पाद्भ्य एयञ् ॥ ६ ॥ १ ॥ ८३ ॥

चतुष्पाद्वाचिशब्देभ्यो-ऽपत्य एयञ् भवेत्ततः ॥
कामण्डलेयजाम्बेय-शाबलेयादयो मताः ॥ ८३ ॥

## गृष्ट्यादेः ॥ ६ ॥ १ ॥ ८४ ॥

एभ्योऽपत्ये भवेदेयञ्-प्रत्ययस्ताद्धितोद्भवः ॥
गार्ष्टेयश्चाथ हार्ष्टेयः, कौद्रेयप्रमुखा अपि ॥ ८४ ॥

## वाडवेयो वृषे ॥ ६ ॥ १ ॥ ८५ ॥

वृषेऽर्थे एयञेयण् वा, वडवाशब्दतो भवेत् ॥
वडवाया वृषो वाड-वेयः स्याद् वाडवोऽन्यतः ॥ ८५ ॥

## रेवत्यादेरिकण् ॥ ६ ॥ १ ॥ ८६ ॥

अपत्ये प्रत्ययो ज्ञेयो, रेवतीप्रमुखादिकण् ॥
रैवतिकस्तथैवाश्व-पालिकः कौक्कुटाक्षिकः ॥ ८६ ॥

## वृद्धस्त्रियाः क्षेपे णश्च ॥ ६ ॥ १ ॥ ८७ ॥

शब्दात् स्त्रीवाचिनो वृद्ध-प्रत्ययान्ताद् णप्रत्ययः ॥
इकण् च जायते क्षेपे, जाल्मौ तौ गार्गगार्गिकौ ॥ ८७ ॥

## भ्रातुर्व्यः ॥ ६ ॥ १ ॥ ८८ ॥

भवेद् भ्रातुरपत्ये व्यः, प्रत्ययस्ताद्धितस्ततः ॥
भ्रातृव्यः स्यात् सुतो भ्रातु-र्नतेन तेन दीप्यते ॥ ८८ ॥

---

८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥

ईयः स्वसुश्च ॥ ६ ॥ १ ॥ ८९ ॥

स्यादीयप्रत्ययोऽपत्ये, भ्रातुः स्वसुश्च तद्धितः ॥
भ्रात्रीयं स्निह्यति स्निग्धः, स्वस्रीयं स्नेहपूरितम् ॥ ८९ ॥

मातृपित्रादेर्डेयणीयणौ ॥ ६ ॥ १ ॥ ९० ॥

स्वस्रन्तस्य भवेन्मातृ–पित्रादेर्डेयणीयणौ ॥
मातृष्वसेय मातृष्व–स्रीयौ ज्ञेयौ यथोचितम् ॥ ९० ॥

श्वशुराद् यः ॥ ६ ॥ १ ॥ ९१ ॥

श्वशुरशब्दतोऽपत्ये, भवेद् यः प्रत्ययस्ततः ॥
श्वशुर्यः श्यालपर्यायः, श्वाशुरिः पुनरन्यतः ॥ ९१ ॥

जातौ राज्ञः ॥ ६ ॥ १ ॥ ९२ ॥

राजन्शब्दादपत्येऽर्थे, जातौ यः प्रत्ययो भवेत् ॥
राज्ञोऽपत्यं तु राजन्यः क्षत्रियो राजनोऽन्यथा ॥ ९२ ॥

क्षत्रादियः ॥ ६ ॥ १ ॥ ९३ ॥

क्षत्रशब्दादपत्येऽर्थे, जाताविया भवेत्ततः ॥
क्षत्रस्य क्षत्रियोऽपत्यं, रक्षकः क्षात्रिरन्यथा ॥ ९३ ॥

मनोर्याणौ षश्चान्तः ॥ ६ ॥ १ ॥ ९४ ॥

मनुशब्दादपत्येऽर्थे, जातौ याणौ प्रमाणितौ ॥
तद्योगे च षकारोऽन्तो, मनुष्या मानुषा नराः ॥ ९४ ॥

---

एवं पैतृष्वसेयः पैतृष्वस्रीयः ॥ ९० ॥ सूत्रषट्कं व्यक्तम् ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ......

## माणवः कुत्सायाम् ॥ ६ ॥ १ ॥ ९५ ॥

कुत्सायां मनुशब्दस्यौ–त्सर्गिकेऽणि निपात्यते ॥
नस्य णत्वं मनोर्मूढ–मपत्यं माणवो यथा ॥ ९५ ॥

## कुलादीनः ॥ ६ ॥ १ ॥ ९६ ॥

कुलशब्दात्तदन्ताच्च, स्यादीनः प्रत्ययो यतः ॥
स्यादनाढ्यकुलीनोऽपि, कुलीनः कुलकृत्यकृत् ॥ ९६ ॥

## यैयकञावसमासे वा ॥ ६ ॥ १ ॥ ९७ ॥

कुलशब्दातदन्ताच्च, स्यातां यैयकञौ नवा ॥
ईनश्चाप्यसमासे चेत्, कुल्यो बाहुकुलेयकः ॥ ९७ ॥

## दुष्कुलादेयण् वा ॥ ६ ॥ १ ॥ ९८ ॥

दुष्कुलशब्दतोऽपत्ये, स्यादेयण् प्रत्ययो नवा ॥
दौष्कुलेयः सविद्योऽपि, त्यक्ता नो दुष्कुलीनताम् ॥९८॥

## महाकुलाद् वाऽञीनञौ ॥ ६ ॥ १ ॥ ९९ ॥

महाकुलान्नवा स्याता–मपत्येऽञीनञौ तथा ॥
ईनश्च प्रत्ययो माहा–कुलो माहाकुलीनवित् ॥ ९९ ॥

...... ९५ ॥ ९६ ॥ एवं कौलेयकः, कुलीनः, बहुकुल्यः, बहुकुलीनः । असमास इति किम् आढ्यकुलीनः ॥ ९७ ॥ स्पष्टम् ॥ ९८ ॥ एवं महाकुलीनः ॥ ९९ ॥

## कुर्वादेर्ञ्यः ॥ ६ ॥ १ ॥ १०० ॥

एभ्यो ञ्यः प्रत्ययो ज्ञेय-स्तद्धितेऽपत्यबोधकः ॥
शाङ्कव्यः शङ्कुतो जातः, कौरव्यः कुरुतो भवेत् ॥ १०० ॥

## सम्राजः क्षत्रिये ॥ ६ ॥ १ ॥ १०१ ॥

सम्राजः क्षत्रियेऽपत्ये, भवेद् ञ्यप्रत्ययस्ततः ॥
साम्राज्यः क्षत्रियो जात्या, सम्राजोऽपत्यमुच्यते ॥ १०१ ॥

## सेनान्तकारुलक्ष्मणादिञ् ॥ ६ ॥ १ ॥ १०२ ॥

सेनान्तात् कारुवाचिभ्यो, लक्ष्मणशब्दतोऽपि च ॥
इञ् प्रत्ययो भवेद् ञ्यश्च, लाक्ष्मण्यो लाक्ष्मणिस्तथा ॥१०२॥

## सुयाम्नः सौवीरेष्वायनिञ् च ॥ ६ ॥ १ ॥ १०३ ॥

सुयामन्शब्दतोऽपत्ये, सौवीरेष्वायनिञ् भवेत् ॥
सुयाम्नोऽपत्यमित्यर्थे, स्यात् सौयामायनिर्यथा ॥ १०३ ॥

## पाण्टाहृति-मिमताण्णश्च ॥ ६ ॥ १ ॥ १०४ ॥

सौवीरेषु भवेदाभ्या-मपत्ये णस्तथाऽऽयनिञ् ॥
पाण्टाहृतस्तथा पाण्टा-हृतायनिश्च मैमतः ॥ १०४ ॥

---

स्पष्टे ॥ १०० ॥ १०१ ॥ एवं हारिषेणिः, हारिषेण्यः, तान्तुवायिः, तान्तुवाय्यः ॥ १०२ ॥ स्पष्टम् ॥ १०३ ॥ एवं मैमतायनिः ॥ १०४ ॥

## भागवित्ति-तार्णविन्दवा-ऽऽकशापेयान्निन्दा-यामिकण् वा ॥ ६ ॥ १ ॥ १०५ ॥

सौवीरेषु भवेदेभ्यो, वृद्धेभ्यो यूनि कुत्सने ॥
इकण् वा भागवित्ताय-नो जाल्मो भागवित्तिकः ॥१०५॥

## सौयामायनि-यामुन्दायनि-वार्ष्यायणेरीयश्च वा ॥ ६ ॥ १ ॥ १०६ ॥

सौवीरवृद्धवृत्तिभ्य, एभ्य ईयेकणौ नवा ॥
निन्दायां यूनि वार्ष्याय-णीयो वार्ष्यायणिस्तथा ॥१०६॥

## तिकादेरायनिञ् ॥ ६ ॥ १ ॥ १०७ ॥

आयनिञ्प्रत्ययोऽपत्ये, तिकादिभ्यो भवेत्ततः ॥
स्यात् कैतवायनिस्तैका-यनिर्बालशिखायनिः ॥१०७॥

## दगु-कोशल-कर्मार-च्छाग-वृषाद् यादिः ॥ ६ ॥ १ ॥ १०८ ॥

एभ्योऽपत्ये भवेद् यादि-रायनिञ् प्रत्ययस्ततः ॥
छाग्यायनिश्च कौशल्या-यनिर्वार्ष्यायणिस्तथा ॥१०८॥

---

एवं तार्णविन्दविकः, तार्णविन्दविर्वा । आकशापेयिकः, आकशापेयिर्वा ॥ १०४ ॥ एवं वार्ष्यायणिकः । सौयामायनीयः, सौयामायनिकः, सौयामायनिर्वा । यामुन्दायनीयः, यामुन्दायनिकः, यामुन्दायनिर्वा निन्द्यो युवा ॥ १०६ ॥ स्पष्टम् ॥ १०७ ॥ एवं दागव्यायनिः कार्म्मार्य्यायणिः ॥ १०८ ॥

## द्विस्वरादणः ॥ ६ ॥ १ ॥ १०९ ॥

अणन्ताद् द्विस्वराच्छब्दा–दपत्ये आयनिञ् भवेत् ॥
कार्तः कर्तुरपत्यं स्या–त्तस्य कार्तायणिर्मतः ॥ १०९ ॥

## अवृद्धाद् दोर्नवा ॥ ६ ॥ १ ॥ ११० ॥

अवृद्धवाचिनो दोर्वा–ऽपत्ये प्रत्यय आयनिञ् ॥
आम्रगुप्तायनिश्चाम्र–गुप्तिर्वायुरथायनिः ॥ ११० ॥

## पुत्रान्तात् ॥ ६ ॥ १ ॥ १११ ॥

दुसंज्ञात् पुत्रशब्दान्ता–दपत्य आयनिञ् नवा ॥
गार्गीपुत्रायणिर्गार्गी – पुत्रकायणिरित्यपि ॥ १११ ॥

## चर्मि–वर्मि–गारेट–कार्कट्य–काक–लङ्का–वाकिनाच्च कश्चान्तोऽन्त्यस्वरात् ॥६॥१॥११२॥

एभ्यः पुत्रान्ततश्च स्याद्, दोरपत्ये नवाऽऽयनिञ् ॥
तद्योगेऽन्त्यस्वरात् कोऽन्त–श्चार्मिणश्चार्मिकायणिः ॥ ११२ ॥

## अदोरायनिः प्रायः ॥ ६ ॥ १ ॥ ११३ ॥

स्यादपत्येऽदुसंज्ञाद्वा, प्रायः प्रत्यय आयनिः ॥
प्राय इति भवेद्दाक्षि–र्ग्लैचुकिर्ग्लुचुकायनिः ॥ ११३ ॥

---

स्पष्टे ॥ १०९ ॥ ११० ॥— एवं गार्गीपुत्रिरित्यपि ॥ १११ ॥ एवं वार्मिणः वार्मिकायणिः, इत्यादयः ॥ ११२ ॥ स्पष्टम् ॥ ११३ ॥

## राष्ट्रक्षत्रियात् सरूपाद् राजापत्ये द्रिरञ् ॥ ६ ॥ १ ॥ ११४ ॥

स्याद्राजापत्ययोर्नित्यं, सरूपाद्राष्ट्रक्षत्रियात् ॥
अञ् स च स्यात् द्रिसंज्ञस्तद्, वैदेहप्रमुखा मताः ॥ ११४ ॥

## गान्धारि–साल्वेयाभ्याम् ॥ ६ ॥ १ ॥ ११५ ॥

राष्ट्रक्षत्रार्थकाभ्यां स्या–दाभ्यां द्रिरञ् यथाक्रमम् ॥
राजापत्ये च गान्धारः, साल्वेयो बुध्यतां बुधैः ॥ ११५ ॥

## पुरु–मगध–कलिङ्ग–सूरमस–द्विस्वरादण् ॥ ६ ॥ १ ॥ ११६ ॥

स्यादेभ्यो द्विस्वरेभ्यश्च, सरूपेभ्यो यथाक्रमम् ॥
राष्ट्रक्षत्रार्थकेभ्योऽण् द्री, राजापत्ये च पौरवः ॥ ११६ ॥

## साल्वांश–प्रत्यग्रथ–कलकूटाश्मकादिञ् ॥ ६ ॥ १ ॥ ११७ ॥

साल्वांशेभ्योऽश्मकात् प्रत्य–ग्रथाच्च कलकूटतः ॥
द्रिसंज्ञ इञ् भवेत् पूर्व–वदौदम्बरिराश्मकिः ॥ ११७ ॥

---

बहुत्वे तु विदेहा इति, एवम् ऐक्ष्वाकः, ऐक्ष्वाकौ, इक्ष्वाकवः, इत्यादयोऽपि ॥ ११४ ॥ स्पष्टम् ॥ ११५ ॥ एवं मागधादयोऽपि, पुरुग्रहणं राष्ट्रभिन्नसरूपार्थम् ॥ ११६ ॥ एवं प्रात्यग्रथिः कालकूटिरित्यादयः । एषां बहुत्वे लुप् ॥ ११७ ॥

## दुनादिकुर्वित्कोसलाजादाञ्ञ्यः ॥ ६ ॥ १ ॥ ११८ ॥

दुसंज्ञान्नादिशब्दाच्च—कुरोश्चेदन्तशब्दतः ॥
कोशलाजादशब्दाभ्यां, ञ्यो नैषध्यो नलो नृपः ॥ ११८ ॥

## पाण्डोर्ड्यण् ॥ ६ ॥ १ ॥ ११९ ॥

पाण्डुशब्दात् सरूपात् स्याद्, राष्ट्र-क्षत्रियवाचिनः ॥
पूर्ववद् ड्यण् स च द्रिः स्यात्, पाण्ड्यः पाण्ड्यौ च
पाण्डवः ॥ ११९ ॥

## शकादिभ्यो द्रेर्लुप् ॥ ६ ॥ १ ॥ १२० ॥

शकादिभ्यः परस्य द्रेः, प्रत्ययस्य तु लुग् भवेत् ॥
राजाऽपत्यं शकानां वा, शकस्य राजते शाकः ॥ १२० ॥

## कुन्त्यवन्तेः स्त्रियाम् ॥ ६ ॥ १ ॥ १२१ ॥

कुन्तेरवन्तिशब्दाच्च, स्त्रियां द्रेर्ञ्यस्य लुब् भवेत् ॥
कुन्ती कुन्तेरपत्यं स्त्री, पुमाँश्च कौन्त्य ईरितः ॥ १२१ ॥

## कुरोर्वा ॥ ६ ॥ १ ॥ १२२ ॥

कुरुशब्दात् परस्य द्रे-र्ञ्यस्य लुप् स्यात् स्त्रियां नवा ॥
अपत्यं स्त्री कुरोः कौर-व्यायणी च कुरूर्भवेत् ॥ १२२ ॥

---

एवमाम्बष्ठ्यः, कौरव्यः आवन्त्यः, कौशल्यः, आजाद्यः, इति ॥ ११८ ॥ स्पष्टम् ॥ ११९ ॥ एवं यवनादयः ॥ १२० ॥ एवमवन्ती, आवन्त्यः, इति ॥ १२१ ॥ कौरव्यमाण्डूक्यासुरेः २-४-१७ ! इति डायन् ॥ १२२ ॥

## द्रेरञणोऽप्राच्यभर्गादेः ॥ ६ ॥ १ ॥ १२३ ॥

प्राच्यभर्गादितोऽन्यस्माद्-द्रेरञोऽणश्च लुप् स्त्रियाम् ॥
ह्यपत्यं शूरसेनस्य, शूरसेनी च मागधी ॥ १२३ ॥

## बहुष्वस्त्रियाम् ॥ ६ ॥ १ ॥ १२४ ॥

बहुषु वर्तमानस्य, द्र्यन्तस्य द्रेर्लुबस्त्रियाम् ॥
अपत्यानि च राजानः, पञ्चालाः स्युर्यथायथम् ॥ १२४ ॥

## यस्कादेर्गोत्रे ॥ ६ ॥ १ ॥ १२५ ॥

यस्कादितोऽस्त्रियां गोत्रे, बहुत्वे प्रत्ययस्य लुप् ॥
यास्को यास्कौ तथा यस्का, यास्क्यो यन्ति पुरः पुरः ॥१२५॥

## यञञोऽश्यापर्णान्तगोपवनादेः ॥ ६ ॥ १ ॥ १२६ ॥

त्यक्त्वा गोपवनादिश्या-पर्णान्तविहितं भवेत् ॥
यञन्ताञन्तयोर्गोत्रे, लुब् बहुत्वेऽस्त्रियां बिदाः ॥ १२६ ॥

## कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च ॥ ६ ॥ १ ॥ १२७ ॥

कौण्डिन्यागस्त्ययोः प्राग्वद्, यञोऽणश्चास्त्रियां भवेत् ॥
लुप् तयोः कुण्डिनागस्ती, कुण्डिनाः स्युरगस्तयः ॥ १२७ ॥

---

मागधीति प्रत्युदाहरणम् ॥ १२३ ॥ अस्त्रियामिति पाञ्चाल्यः ॥ १२४ ॥ स्पष्टम् ॥ १२५ ॥ एवं गर्गाः, वत्साः इत्यादयः ॥ १२६ ॥ नयोः कुण्डिनीअगस्त्ययोः ॥ १२७ ॥

**भृग्वङ्गिरस्कुत्सवशिष्ठगोतमात्रेः ॥ ६ ॥ १ ॥ १२८ ॥**

भृग्वादिभ्यो भवेत् प्राग्वत्, प्रत्ययस्य लुबस्त्रियाम् ॥
वासिष्ठा भृगवः कुत्सा, गोतमा अत्रयः सुताः ॥ १२८ ॥

**प्राग्भरते बहुस्वरादिञः ॥ ६ ॥ १ ॥ १२९ ॥**

प्राग्गोत्रे भरते प्राग्व-न्नाम्नो बहुस्वराद् य इञ् ॥
तस्य लुब् जायते क्षीर-कलम्भा मन्थरेषणाः॥ १२९ ॥

**वोपकादेः ॥ ६ ॥ १ ॥ १३० ॥**

प्रत्यय उपकादिभ्यो, यस्तदन्तस्य यः स च ॥
तस्य गोत्रे बहौ वा स्या-दस्त्रियां लुब् यथोपकाः ॥१३०॥

**तिककितवादौ द्वन्द्वे ॥ ६ ॥ १ ॥ १३१ ॥**

स्यात्तिककितवादौ तु, द्वन्द्वे यः प्रत्ययः स च ॥
अस्त्रियां पूर्ववत्तस्य, लुप् तिककितवा यथा ॥ १३१ ॥

**द्व्यादेस्तथा ॥ ६ ॥ १ ॥ १३२ ॥**

द्व्याद्यन्तानां भवेद् द्वन्द्वे-ऽबहुष्वर्थेषु यः स च ॥
द्व्यादिस्तस्य यथापूर्वं, लुबङ्गवङ्गसौह्मकाः ॥ १३२ ॥

---

भृगु, अङ्गिरस, कुत्स, वशिष्ट, गोतम, अत्रि, इत्येतेभ्यो यः प्रत्ययस्तदन्तस्य बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानस्य यः स-प्रत्ययस्तस्यास्त्रियां लुप् स्यादिति स्पष्टोऽर्थः । एवमङ्गिरसोऽपि ॥ १२८ ॥ बहुस्वरान्नाम्नो य इञ् प्रत्ययस्तदन्तस्य बहुत्वेऽर्थे प्राग्गोत्रे भरतगोत्रे च वर्तमानस्य यः स प्रत्ययस्तस्यास्त्रियां लुप स्यात् । भरते पुनर्युधिष्ठिरा इत्यादयः ॥ १२९ ॥ स्पष्टे ॥ १३० ॥ १३१ ॥ वचनमबह्वर्थम् . ॥ १३२ ॥

## वान्येन ॥ ६ ॥ १ ॥ १३३ ॥

द्व्यादीनां द्व्यादिभिन्नेन, द्वन्द्वे बहुषु यः स च ॥
द्व्यादिस्तस्य यथापूर्वं लुग् वाङ्गवङ्गदाक्षयः ॥ १३३ ॥

## द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा ॥६॥१॥१३४॥

षष्ठीतत्पुरुषे षष्ठ्या, द्व्येकेषु वर्तते स यः ॥
यञादिस्तस्य वा लुक् स्यात् , तथा वैदकुलं यथा ॥ १३४ ॥

## न प्राग्जितीये स्वरे ॥ ६ ॥ १ ॥ १३५ ॥

प्राग्जितीये स्वरादौ तु, तद्धिते नोक्तलुब् भवेत् ॥
गार्गीया ननु गर्गाणां, छात्रा गर्गमयं तथा ॥ १३५ ॥

## गर्गभार्गविका ॥ ६ ॥ १ ॥ १३६ ॥

गर्गभार्गविकद्वन्द्वात् , प्राग्जितीये विधीयते ॥
विवाहे प्रत्ययो योऽकल् , तत्राऽणो लुब् निपात्यते ॥ १३६ ॥

## यूनि लुप् ॥ ६ ॥ १ ॥ १३७ ॥

युवापत्यार्थजातस्य, स्वरादौ प्राग्जितीयके ॥
लुबनुत्पन्न एव स्या-द्यथाप्राप्तं भवेदनु ॥ १३७ ॥

---

पक्षे-आङ्गवाङ्गदाक्षय इति ॥ १३३ ॥ स्पष्टं सूत्रद्वयम् ॥ १३४ ॥ १३५ ॥ यथा गर्गाणां वृद्धानां भृगूणां वृद्धानां यूनो च विवाहो गर्ग-'भार्गविका' इति ॥ १३६ ॥ यथा पाण्टाहृतस्यापत्यं पाण्टा इति तस्यापत्यं युवा पाण्टाहृतः, तस्यच्छात्रा इति प्राग्जितीये स्वरादौ चिकीर्षिते णस्य लुक् तत इयन्तं प्रकृतिरूपं सम्पन्नमिति 'वृद्धेऽञः' ६।३।२८। इति अञ् भवति पाण्टाहृता इति ॥ १३७ ॥

## वायनणायनिञोः ॥ ६ ॥ १ ॥ १३८ ॥

आयनणप्रत्ययस्याय–निञश्च यून्यपत्यके ॥
प्रागजितीये स्वरादौ लुब्, वा गर्गीया यथायथम् ॥ १३८ ॥

## द्रीञो वा ॥ ६ ॥ १ ॥ १३९ ॥

द्रिसंज्ञेञन्ततो लुप् स्याद्, युवार्थप्रत्ययस्य वा ॥
औदुम्बरिस्तथौदुम्ब–रायणः स्याद्विभाषया ॥ १३९ ॥

## ञिदार्षादणिञोः ॥ ६ ॥ १ ॥ १४० ॥

ञिदार्षापत्यरूपार्थ–प्रत्ययान्तात् परस्य लुप् ॥
युवार्थप्रत्ययस्याण, इञो वैदः पिता सुतः ॥ १४० ॥

## अब्राह्मणात् ॥ ६ ॥ १ ॥ १४१ ॥

वृद्धान्ताद् युनि जातस्या–ब्राह्मणवाचिनस्तु लुप् ॥
आङ्गः पिता तथा पुत्र, आङ्गः सोद्‍मस्तथैव हि ॥ १४१ ॥

## पैलादेः ॥ ६ ॥ १ ॥ १४२ ॥

पैलादिभ्यो भवेद्यूनि, विहितप्रत्ययस्य लुप् ॥
अप्राच्यार्थं वचो ब्राह्म–णार्थं पैलः पिता सुतः ॥ १४२ ॥

## प्राच्येञोऽतौल्वल्यादेः ॥ ६ ॥ १ ॥ १४३ ॥

अतौल्वल्यादितः प्राच्ये–अन्ततो यून्यपत्यके ॥
लुब् नित्यं प्रत्ययस्य स्यात्, पान्नागारिः पिता सुतः ॥१४३॥

इति षष्ठाध्याये प्रथमः पादः ॥

---

पक्षे गार्ग्यायणीया इति ॥ १३८ ॥ सूत्रपञ्चकं स्पष्टम् ॥ १३९ ॥ १४० ॥ १४१ ॥ १४२ ॥ १४३ ॥ इति षष्ठाध्याये प्रथमः पादः ॥

## द्वितीयः पादः

### रागाट्टो रक्ते ॥ ६ ॥ २ ॥ १ ॥

रक्तार्थे प्रत्ययष्टान्ता-न्नाम्नो रागविशेषतः ।
यथाविधि कुसुम्भेन, रक्तं कौसुम्भमम्बरम् ॥ १ ॥

### लाक्षारोचनादिकण् ॥ ६ ॥ २ ॥ २ ॥

टान्ताभ्यां रक्तमित्यर्थे, भवेदाभ्यामिकण् परः ।
लाक्षिकं लाक्षया रक्तं, तथा रौचनिकं तथा ॥ २ ॥

### शकलकर्दमाद्वा ॥ ६ ॥ २ ॥ ३ ॥

शकलकर्दमाभ्यां वा, रक्तमित्यर्थके त्विकण् ।
शाकलं कार्दमं शाक-लिकं कार्दमिकं गृहम् ॥ ३ ॥

### नीलपीतादकम् ॥ ६ ॥ २ ॥ ४ ॥

अः प्रत्ययो भवेन्नीलात्, पीतात् कः प्रत्ययस्तथा ।
टान्ततो रक्तमित्यर्थे, वासो नीलश्च पीतकम् ॥ ४ ॥

### उदितगुरोर्भाद्युक्तेऽब्दे ॥ ६ ॥ २ ॥ ५ ॥

भादुदितगुरोर्युक्ते, प्रत्ययोऽब्दे यथाविधि ।
यदि संवत्सरः सोऽर्थः, **पौषमपि च फाल्गुनम्** ॥ ५ ॥

---

रागशब्देन प्रसिद्धा एव कुसुम्भादयो रागा गृह्यन्ते तेनेह न भवति, कृष्णेन रक्तम् ॥ १ ॥ तथा पुनः, तथा रोचनया रक्तमिति ॥ २ ॥ शकलं रक्तचन्दनम् ॥ ३ ॥ स्पष्टम् ॥ ४ ॥ पुष्येणोदितगुरुणा युक्तं वर्षं पौषम्, एवं फल्गुनीभिरुदितगुरुभिर्युक्तं फाल्गुनम् ॥ ५ ॥

## चन्द्रयुक्तात् काले लुप्त्वप्रयुक्ते ॥ ६ ॥ २ ॥ ६ ॥

काले चन्द्रयुताद्भान्ताद्, युक्तेऽर्थे प्रत्ययः पुनः ।
अप्रयुक्ते तु लुप् काले, पौषमहो भवेदहो ॥ ६ ॥

## द्वन्द्वादीयः ॥ ६ ॥ २ ॥ ७ ॥

पूर्ववद् द्वन्द्वतश्चन्द्र-युतादीयस्तु टान्ततः ॥
ज्ञेयं राधानुराधीय-महर्द्वन्द्वविधेर्द्विधम् ॥ ७ ॥

## श्रवणाश्वत्थान्नाम्न्यः ॥ ६ ॥ २ ॥ ८ ॥

श्रवणादश्वत्थतश्चन्द्र-युतान्नक्षत्रवाचिनः ।
अः प्रत्ययो भवेत् काले, नाम्नि वै श्रवणा निशा ॥ ८ ॥

## षष्ठ्याः समूहे ॥ ६ ॥ २ ॥ ९ ॥

समूहे प्रत्ययान्नाम्नः, षष्ठ्यन्तात् स्युर्यथायथम् ।
काकं बाकं च, शौक्कं च समूहः स्यात् पृथक् पृथक् ॥ ९ ॥

## भिक्षादेः ॥ ६ ॥ २ ॥ १० ॥

भिक्षादितः समूहेऽर्थे, षष्ठ्यन्तात् प्रत्ययो भवेत् ।
सद् यथाविहितं भैक्षं, भिक्षूणाभमृतायते ॥ १० ॥

---

चन्द्रेण युक्तं यन्नक्षत्रं तद्वाचिनस्तृतीयान्ताद् युक्तेऽर्थे यथाविहितं प्रत्ययः स्यात् स चेद्युक्तोऽर्थः कालो भवति, अप्रयुक्ते तु कालवाचके शब्दे लुप् स्यादिति स्पष्टोऽर्थः ॥ ६ ॥ राधानुराधाभिश्चन्द्रयुक्ताभिर्युक्तमहः राधानुराधीयमहः ॥ ७ ॥ एवमश्वत्था रात्रिः पौर्णमासी वा; सत्यपि अन्वर्थयोगे न कालमात्रमेव उच्यते, अपि तु कालविशेष एवेति नामत्वम् ॥ ८ ॥ स्पष्टम् ॥ ९ ॥ अचित्तकणो बाधनार्थं वचनम् ॥ १० ॥

## क्षुद्रकमालवात् सेनानाम्नि ॥ ६ ॥ २ ॥ ११ ॥

अण् यथाविहितं सेना-नाम्नि क्षुद्रकमालवात् ।
षष्ठ्यन्ततः समूहेऽर्थे, सेना क्षौद्रकमालवी ॥ ११ ॥

## गोत्रोक्ष-वत्सोष्ट्र-वृद्धा-ऽजोरभ्र-मनुष्य-राज-राजन्य-राजपुत्रादकञ् ॥ ६ ॥ २ ॥ १२ ॥

स्याद् गोत्रप्रत्ययान्तेभ्य, उक्षादिभ्यश्च नामतः ।
प्रत्ययोऽकञ् समूहेऽर्थे, गार्गकं राजपुत्रकम् ॥ १२ ॥

## केदाराण्ण्यश्च ॥ ६ ॥ २ ॥ १३ ॥

केदाराण्ण्याकञौ स्यातां, समूहे प्रत्ययौ ततः ।
केदाराणां समूहः कै-दार्यं कैदारकं तथा ॥ १३ ॥

## कवचि-हस्त्यचित्ताच्चेकण् ॥ ६ ॥ २ ॥ १४ ॥

आभ्यामचित्तवाचिभ्यः, केदाराच्च भवेदिकण् ।
समूहेऽर्थे रणे दृष्टं, कावचिकश्च हास्तिकम् ॥ १४ ॥

## धेनोरनञः ॥ ६ ॥ २ ॥ १५ ॥

धेनुशब्दात् समूहेऽर्थे, स्यादिकण् प्रत्ययोऽनञः ।
आधैनवमधेनूनां, धेनूनां धैनुकं पुनः ॥ १५ ॥

---

गोत्राकञ्बाधनार्थं वचनम् ॥ ११ ॥ स्वापत्यसन्तानस्य स्वव्यपदेशकारिणः प्रथमपुरुषस्यापत्यं गोत्रम् ॥ १२ ॥ स्पष्टम् ॥ १३ ॥ एवम् आपूपिकम्. कैदारिकम् ॥ १४ ॥ स्पष्टं ॥ १५ ॥

श्री सोमचंद आतमचंद जैन ज्ञानभंडार,

**ब्राह्मण–माणव–वाडवाद् यः ॥ ६ ॥ २ ॥ १६ ॥**

एभ्यस्त्रिभ्यः समूहेऽर्थे, यः प्रत्ययो विधीयते ।
ब्राह्मण्यमथ माणव्यं, वाडव्यं पुनरिष्यते ॥ १६ ॥

**गणिकाया ण्यः ॥ ६ ॥ २ ॥ १७ ॥**

समूहे गणिकाशब्दा–ण्ण्यः प्रत्ययो विधीयते ।
गाणिक्यमपि किं चेतो, विकर्तुं योगिनामलम् ॥ १७ ॥

**केशाद्वा ॥ ६ ॥ २ ॥ १८ ॥**

केशशब्दात् समूहेऽर्थे, ण्यः प्रत्ययो भवेन्नवा ।
वार्षिकं कैशिकं कैश्यं, स्थविरैरपि लुञ्च्यते ॥ १८ ॥

**वाश्वादीयः ॥ ६ ॥ २ ॥ १९ ॥**

अश्वशब्दात् समूहेऽर्थे, स्यादीयः प्रत्ययो नवा ।
नृपतेराश्वमश्वीयं, मन्दुरायां विराजते ॥ १९ ॥

**पर्श्वा ड्वण् ॥ ६ ॥ २ ॥ २० ॥**

पर्शूशब्दात् समूहेऽर्थे, ड्वण्प्रत्ययो विधीयते
पार्श्वं नो भीषयेत्तं यः, पार्श्वपार्श्वं न मुञ्चति ॥ २० ॥

---

॥ १६ ॥ ण्यप्रत्ययादिह पुंवद्भावप्रतिषेध इति क्यायात्रइति ॥ १७ ॥ स्पष्टं सूत्रद्वयम् ॥ १८ ॥ १९ ॥ इकणोऽपवादः ॥ २० ॥

## ईनोऽह्नः क्रतौ ॥ ६ ॥ २ ॥ २१ ॥

अहन्शब्दात् समूहेऽर्थे, स्यादीनः प्रत्ययः क्रतौ।
अह्नीनः स्यात् क्रतुस्तस्मा- दन्यदाह्नमितीष्यते ॥ २१ ॥

## पृष्ठाद्यः ॥ ६ ॥ २ ॥ २२ ॥

पृष्ठशब्दात् समूहेऽर्थे, क्रतौ यप्रत्ययो भवेत् ।
अहः पर्यायशब्दोऽयं, पृष्ठ्यश्चान्यच्च पार्ष्ठिकम् ॥ २२ ॥

## चरणाद्धर्मवत् ॥ ६ ॥ २ ॥ २३ ॥

चरणाद् धर्मवज्ज्ञेयाः, समूहे प्रत्ययास्ततः ।
कठानां काठकं धर्मः, समूहोऽपि च काठकम् ॥ २३ ॥

## गो-रथ-वातात् त्रल्-कट्यलूलम् ॥६॥२॥२४॥

वातादूलो भवेद् गोस्त्रल्, रथात् कट्यल् समूहके ।
गोत्रा च रथकट्या च, वातूलैरपनीयते ॥ २४ ॥

## पाशादेश्च ल्यः ॥ ६ ॥ २ ॥ २५ ॥

पाशादिभ्यो गत्रादेश्च, ल्यः समूहे विधीयते ।
पाश्यां तृण्यां तथा गत्र्यां, रथ्यां वात्यां पठेदतः ॥ २५ ॥

---

आह्नमित्यश्वादिपाठादञि ॥ २१ ॥ अन्ये तु पृष्ठशब्दं रथन्तरादिसाम-पर्यायं ब्रुवते ॥ २२ ॥ स्पष्टम् ॥२३॥ लित्वात् स्त्रीत्वम् ॥२४॥ स्पष्टे ॥२५॥...

## श्वादिभ्योऽञ् ॥ ६ ॥ २ ॥ २६ ॥

शब्देभ्यः श्वनप्रकारेभ्यः, समूहेऽञ् प्रत्ययो भवेत् ।
शौवं शूनां समूहोऽह्ना–माह्नं गम्याः प्रयोगतः ॥ २६ ॥

## खलादिभ्यो लिन् ॥ ६ ॥ २ ॥ २७ ॥

खलादिभ्यः समूहेऽर्थे, भवेल्लिन् प्रत्ययस्ततः ।
ऊकिनी खलिनी खल्या, कुटुम्बिनी प्रयोगतः ॥ २७ ॥

## ग्राम–जन–बन्धु–गज–सहायात् तल् ॥ ६ ॥ २ ॥ २८ ॥

तल् प्रत्ययः समूहेऽर्थे, भवेद्ग्रामादिपञ्चकात् ।
ग्रामता जनता बन्धु – ता गजता सहायता ॥ २८ ॥

## पुरुषात् कृत–हित–वध–विकारे चैयञ् ॥ ६ ॥ २ ॥ २९ ॥

शब्दतः पुरुषादेयञ्, भवेत् कृते हिते वधे ।
विकारे च समूहे च, पौरुषेयं च पञ्चधा ॥ २९ ॥

---

...२६ ॥ खल्या पाशादित्वाल्ल्ये ॥ २७ ॥ लकारः स्त्रीत्वार्थः ॥ २८ ॥ पुरुषेण कृतः पुरुषाय हितम्, पुरुषस्य वधः, पुरुषस्य विकारः, पुरुषाणां समूहः, इति कृतादौ यथाभिधाने विभक्तियोगः ॥ २९ ॥

## विकारे ॥ ६ ॥ २ ॥ ३० ॥

षष्ठ्यन्ततो विकारेऽर्थे, स्युर्यथाविहितं हितम् ।
प्रत्यया आश्मनश्चाश्मो, भस्मनो भास्मनो भवेत् ॥३०॥

## प्राण्यौषधि-वृक्षेभ्योऽवयवे च ॥ ६ ॥ २ ॥ ३१ ॥

पूर्ववत् प्रत्ययाः प्राणिन् - औषधि-वृक्षवाचितः ।
विकारेऽवयवे चार्थे कापोतं सक्थि आऽऽमिषम् ॥३१॥

## तालाद्धनुषि ॥ ६ ॥ २ ॥ ३२ ॥

अण् यथाविहितं ताला - द्विकारे धनुषीष्यते ।
धनुस्तालं विकारे स्यात्, काण्डं तालमयं पुनः ॥३२॥

## त्रपुजतोः षोऽन्तश्च ॥ ६ ॥ २ ॥ ३३ ॥

भवेत् त्रपुजतुभ्यामण्, विकारेऽर्थे यथाविधि ।
षोऽन्तस्तयोर्विकारस्तु, त्रापुषं जातुषं तथा ॥ ३३ ॥

## शम्या लः ॥ ६ ॥ २ ॥ ३४ ॥

शमीशब्दाद्विकारेऽर्थे-ऽवयवे चाण् यथाविधि ।
लोऽन्तोऽस्य भस्म शामीलं, शामीलो विटपस्तथा ॥३४॥

---

"वाङ्मनो विकारे" ॥ ७ ॥ ४ ॥ ६३ ॥ इति अन्त्यस्वरादि लोपः ॥ ३० ॥ एवं दौर्वं काण्डं भस्म च कारीरमपि तथा ॥ ३१ ॥ दुर्लक्षणस्य मयटोऽपवादः ॥ ३२ ॥ षागमार्थं वचनम् ॥ ३३ ॥ स्पष्टम् ॥ ३४ ॥

## पयोद्रोर्यः ॥ ६ ॥ २ ॥ ३५ ॥

भवेत् पयोद्रुशब्दाभ्यां, विकारे यो विधानतः ।
पयस्यं पयसो द्रव्यं, प्रशस्यं द्रोर्विकारतः ॥ ३५ ॥

## उष्ट्रादकञ् ॥ ६ ॥ २ ॥ ३६ ॥

उष्ट्रशब्दाद्विकारेऽर्थे–ऽवयवे चाप्यकञ् भवेत् ।
औष्ट्रकं मांसमुष्ट्रस्य, जङ्घा चौष्ट्र्याः सदौष्ट्रिका ॥ ३६ ॥

## उमोर्णाद्वा ॥ ६ ॥ २ ॥ ३७ ॥

विकारेऽवयवे चाकञ्, उमोर्णाभ्यां विभाषया ।
उमाया औमकं चौम – मूर्णाया और्णमौर्णकम् ॥३७॥

## एण्या एयञ् ॥ ६ ॥ २ ॥ ३८ ॥

एणीशब्दाद् भवेदेयञ्, विकारेऽवयवे तथा ।
मांसमैणेयमैणेयी, जङ्घा पुंस्यैणमण्विधौ ॥ ३८ ॥

## कौशेयम् ॥ ६ २ ॥ २ ॥ ३९ ॥

कौशशब्दाद् विकारेऽर्थे, एयञ् रूढ्या निपात्यते ।
वस्त्रं सूत्रं च कौशेयं, भस्मादौ कौशमिष्यते ॥ ३९ ॥

---

पयसोऽणोऽपवादः द्रोरेकस्वरस्मयटः ॥ ३५ ॥ स्पष्टम् ॥ ३६ ॥ उमा अतसी ॥ ३७ ॥ एण्या इति स्त्रीलिङ्गनिर्देशात् पुंस्यणेव ॥ ३८ ॥ स्पष्टम् ॥ ३९ ॥

## परशव्याद्यलुक् च ॥ ६ ॥ २ ॥ ४० ॥

परशव्याद्विकारे स्या-दण् यथाविहितं यलुक् ।
विकारः परशव्यस्या-यसः पारशवं यथा ॥ ४० ॥

## कंसीयाञ् ञ्यः ॥ ६ ॥ २ ॥ ४१ ॥

कंसीयशब्दतो ञ्यः स्या-द्विकारेऽर्थे यलुक् तथा ।
कंसीयं कंसतः साधु, कांस्यं रणरणायते ॥ ४१ ॥

## हेमार्थान्माने ॥ ६ ॥ २ ॥ ४२ ॥

अण् स्यान्माने विकारेऽर्थे, हेमवाचकशब्दतः ।
सन्निष्को हाटको यष्टिः, स्याद्धाटकमयी न किम् ॥ ४२ ॥

## द्रोर्वयः ॥ ६ ॥ २ ॥ ४३ ॥

द्रुशब्दतो वयोमाने, विकारेऽर्थे विधीयते ।
विधिर्यस्यापवादोऽयं, द्रुवयं मानमुच्यते ॥ ४३ ॥

## मानात् क्रीतवत् ॥ ६ ॥ २ ॥ ४४ ॥

प्रत्ययः क्रीतवच्छब्दाद्, विकारे मानवाचिनः ।
शतेन क्रीतमित्यर्थे, शत्यं शतिकमुच्यते ॥ ४४ ॥

---

अणमिद्ध एव यलुगर्थं वचनम् ॥ ४० ॥ कंसाय इदं कंसीयं 'परिणामिनि तदर्थे' । ७ । १ । ४४ ॥ इतीयः ॥ ४१ ॥ अर्थग्रहण स्वरूपविधिव्युदासार्थम् ॥ ४२ ॥ स्पष्टम् ॥ ४३ ॥ वत् सर्वविधिसादृश्यार्थः, तेन लुबादिकस्यापि अतिदेशो भवति, द्विशतत्रिशत इति ॥ ४४ ॥

## हेमादिभ्योऽञ् ॥ ६ ॥ २ ॥ ४५ ॥

हेमादिभ्योऽञ् यथायोगं, विकारेऽवयवे भवेत् ।
हैमे सिंहासने स्थित्वा, विश्वं किं न विधीयते ॥ ४५ ॥

## अभक्ष्याच्छादने वा मयट् ॥ ६ ॥ २ ॥ ४६ ॥

षष्ठ्यन्ततो मयट् प्रागव-दभक्ष्याच्छादने नवा ।
यथायोगं भवेद्भस्म-मयं भास्मनमित्यपि ॥ ४६ ॥

## शरदर्भकूदीतृणसोम वल्वजात् ॥ ६ ॥ २ ॥ ४७ ॥

शरादिभ्यो यथायोगं, भक्ष्याच्छादनवर्जिते ।
विकारेऽवयवे नित्यं, मयट् शरमयं यथा ॥ ४७ ॥

## एकस्वरात् ॥ ६ ॥ २ ॥ ४८ ॥

नित्यमेकस्वरान्नाम्नः, पूर्ववत् प्रत्ययो मयट् ।
वाङ्मयं चिन्मयं चेत् स्यात्, मृन्मयं गीर्मयं भवेत् ॥४८॥

## दोरप्राणिनः ॥ ६ ॥ २ ॥ ४९ ॥

दुसंज्ञात् पूर्ववच्छब्दा-दप्राणिवाचिनो मयट् ।
प्राप्ते वसन्तसमये, भवेदाम्रमयं जगत् ॥ ४९ ॥

---

बहुवचनमाकृतिगणार्थम् ॥ ४५ ॥ भक्ष्याच्छादने तु मौद्गः सूपः, कार्पासः पट इति ॥ ४६ ॥ अणोऽपवादः ॥ ४७ ॥ पूर्ववत् भक्ष्याच्छादनवर्जिते विकारेऽवयवे च यथासम्भवमिति ॥ ४८ ॥ अणोऽपवादः ॥ ४९ ॥

## गोः पुरीषे ॥ ६ ॥ २ ॥ ५० ॥

गोशब्दतः पुरीषेऽर्थे, जायते प्रत्ययो मयट् ।
गोमयं गोः पुरीषं स्यात्, गव्यं सर्पिःपयोमुखम् ॥५०॥

## व्रीहेः पुरोडाशे॥ ६ ॥ २ ॥ ५१ ॥

व्रीहिशब्दात् पुरोडाशे, विकारेऽर्थे मयड् ध्रुवम् ।
व्रीहिमयः पुरोडाश-स्त्वन्यत्र व्रैह ओदनः ॥५१॥

## तिलयवादनाम्नि ॥ ६ ॥ २ ॥ ५२ ॥

विकारेऽवयवेऽनाम्नि, मयट् तिलाद् यवात्तथा ।
तैलं तिलमयं न स्याद्, यवमयो न यावकः ॥५२॥

## पिष्टात् ॥ ६ ॥ २ ॥ ५३ ॥

विकारे पिष्टतो नाम्नि, मयडणपवादकः ।
शिष्यौ परीक्षितौ कृत्वा, पिष्टमयं शिखण्डकम् ॥५३॥

## नाम्नि कः ॥ ६ ॥ २ ॥ ५४ ॥

पिष्टशब्दाद्विकारेऽर्थे, नाम्नि कः प्रत्ययो भवेत् ।
भोजं भोजं सदाकाल – मार्या जीवन्ति पिष्टिकाम् ॥५४॥

---

पुनर्भेे नियमार्थं वचनम् ॥ ५० ॥ स्पष्टम् ॥ ५१ ॥ नाम्नि तु अण् तेन तैलम् । याव एव यावकः स्वार्थे कः ॥ ५२ ॥ उदाहरणमिदं क्षीरकदम्बकाचार्यपरीक्षितनारदपर्वतककथानकोद्बोधकम् ॥ ५३ ॥ स्पष्टम् ॥ ५३ ॥

## ह्योगोदोहादीनञ् हियङ्गुश्चास्य

॥ ६ ॥ २ ॥ ५५ ॥

ह्यो-गोदोहाद्विकारेऽर्थे नाम्नीनञ् प्रत्ययो भवेत् ।
हियङ्गुश्चास्य हैयङ्ग—वीनमायुष्करं घृतम् ॥ ५५ ॥

## अपो यञ् वा ॥ ६ ॥ २ ॥ ५६ ॥

अप्शब्दतो विकारेऽर्थे, प्रत्ययो यञ् विभाषया ।
वर्षासु वार्षुकैर्वार्दै – राप्यं तथाम्मयं जगत् ॥५६॥

## लुप् बहुलं पुष्पमूले ॥ ६ ॥ २ ॥ ६७ ॥

विकारेऽवयवे पुष्पे, मूले वापि विवक्षिते ।
प्रत्ययस्य तयोर्लुप् स्याद्, बहुलं नवमालिका ॥ ५६ ॥

## फले ॥ ६ ॥ २ ॥ ५८ ॥

फले विवक्षिते लुप् स्याद्, विकारेऽवयवेऽथवा ।
हरीतकी हरीतक्याः, फलं पथ्यं प्रसूर्यथा ॥ ५८ ॥

## प्लक्षादेरण् ॥ ६ ॥ २ ॥ ५९ ॥

प्लक्षादिभ्यो विकारेऽर्थे—ऽवयवे वा फले भवेत् ।
अण् प्रत्ययो न लुक् तस्य, प्लाक्षं प्लक्षफलं यथा ॥ ५९ ॥

---

ह्योगोदोहमनाम्नि ॥ ५५ ॥ एकस्वरमयटोऽपवादः ॥ ५६ ॥ स्पष्टम् ॥ ५७ ॥ स्पष्टम् ॥ ५८ ॥ मयटोऽपवादः ॥ ५९ ॥

## जम्ब्वा वा ॥ ६ ॥ २ ॥ ६० ॥

जम्बूशब्दाद्विकारेऽर्थे-ऽवयवे वा फले नवा ।
अण् स्यात् पक्षे यथाप्राप्तं, तस्य लुब् जम्बु जाम्बवम् ॥६०॥

## न द्विरद्रुवयगोमयफलात् ॥ ६ ॥ २ ॥ ६१ ॥

द्रुवयादीन् विहायान्य-स्मान्न द्विः प्रत्ययो भवेत् ।
विकारादौ कपोतस्य, कापोतोऽवयवो यथा ॥ ६१ ॥

## पितृमातुर्व्यडुलं भ्रातरि ॥ ६ ॥ २ ॥ ६२ ॥

षष्ठयन्तपितृमातृभ्यां, भ्रातरि व्यडुलौ क्रमात् ।
पितृव्यः स्यात् पितुर्भ्राता, भ्राता मातुश्च मातुलः ॥ ६२ ॥

## पित्रोर्डामहट् ॥ ६ ॥ २ ॥ ६३ ॥

षष्ठयन्तपितृमातृभ्यां, मातापित्रोस्तु डामहट् ।
मातामही प्रसूर्मातुः, पितुः पिता पितामहः ॥ ६३ ॥

## अवेर्दुग्धे सोढदूसमरीसम् ॥ ६ ॥ २ ॥ ६४ ॥

सोढदूसमरीसाश्च, दुग्धषष्ठयन्ततो ह्यवेः ।
अविसोढा - विदूसावि - मरीसानि पयांस्यवेः ॥ ६४ ॥

---

लुपि स्त्री-नपुंसकत्वे तेन जम्बूरित्यपि ॥ ६० ॥ स्पष्टम् ॥ ६१ ॥
डोऽन्त्यस्वरादिलोपार्थः ॥ ६२ ॥ टित्वात् स्त्रीत्वे ङीः ॥ ६३ ॥ स्पष्टम् ॥ ६४ ॥

## राष्ट्रेऽनङ्गादिभ्यः ॥ ६ ॥ २ ॥ ६५ ॥

अण् यथाविहितं राष्ट्रे, षष्ठयन्ताङ्गादिवर्जितात् ।
शैबं राष्ट्रं शिबीनां स्याद्, गान्धारं गन्धबन्धुरम् ॥ ६५ ॥

## राजन्यादिभ्योऽकञ् ॥ ६ ॥ २ ॥ ६६ ॥

राजन्येत्यादिशब्देभ्यो, राष्ट्रे वाच्ये भवेदकञ् ।
दैवयानवकं राज-न्यकं च दैवयानकम् ॥ ६६ ॥

## वसातेर्वा ॥ ६ ॥ २ ॥ ६७ ॥

वसातिशब्दतो राष्ट्रे, वाच्येऽकञ् प्रत्ययो नवा ।
वासानकं वसातीनां, राष्ट्रं वैसानमित्यपि ॥६७॥

## भौरिक्यैषुकार्यादेर्विधभक्तम् ॥ ६ ॥ २ ॥ ६८ ॥

भौरिक्याद्येषुकार्य्यादे-र्विधभक्तौ यथाक्रमम् ।
राष्ट्रेऽर्थे भौरिकीनां रा-ष्ट्रं भौरिकिविधं यथा ॥६८॥

## निवासादूरभव इति देशे नाम्नि ॥ ६ ॥ २ ॥६९॥

निवासादूरभवयो - र्देशे नाम्नि यथायथम् ।
षष्ठ्यन्तात् प्रत्ययो वैदि - शं पुरं विदिशान्तिकम् ॥६९॥

---

केचित्तु अङ्गादि प्रतिषेधं नेच्छन्ति आङ्गमित्यादि ॥ ६५ ॥ अणोऽपवादः ॥ ६६ ॥ स्पष्टम् ॥ ६७ ॥ एवम् ऐषुकारिभक्तमित्यादि ॥ ६८ ॥ ऋजुनावानां निवास आर्जुनाव इति निवासे इति ॥ ६९ ॥

## तदत्रास्ति ॥ ६ ॥ २ ॥ ७० ॥

स्याद् यथाविहितं देशे, तदत्रास्तीति शब्दतः ।
प्रत्ययः पुरमौदुम्ब-रं सन्त्यस्मिन्नुदम्बरा ॥ ७० ॥

## तेन निर्वृत्ते च ॥ ६ ॥ २ ॥ ७१ ॥

तेनेति स्यात्तृतीयान्ता-न्निर्वृत्तेऽर्थे यथाविधि ।
प्रत्ययो नाम्नि देशेऽर्थे, कौशाम्बी नगरी यथा ॥ ७१ ॥

## नद्यां मतुः ॥ ६ ॥ २ ॥ ७२ ॥

स्यान्मतुश्चेन्नदीनाम, पूर्वोक्तश्चातुरर्थिकः ।
नदी शरावती वीर--णावती पुष्करावती ॥ ७२ ॥

## मध्वादेः ॥ ६ ॥ २ ॥ ७३ ॥

मध्वादिभ्यो मतुश्चातु-रर्थिको देशनामनि ।
अनद्यर्थोऽयमारम्भो, मधुमान् बिसवानगः ॥ ७३ ॥

## नड-कुमुद-वेतस-महिषाड् डित् ॥ ६ ॥ २ ॥ ७४ ॥

देशे नाम्नि नडादिभ्यो, मतुड्चातुरर्थिकः ।
कुमुद्वान् कुमुदप्रायो, वेतस्वान् बहुवेतसः ॥ ७४ ॥

एवमौदुम्बरो जानपदः औदुम्बरः पर्वत इत्यपि ॥ ७० ॥ कुशाम्बेन निर्वृत्ता कौशाम्बी ॥ ७१ ॥ भागीरथ्यादीनि नामान्यमत्वर्थात एव मतुः ॥ ७२ ॥ अगः पर्वतः, मध्वादयस्त्रिंशत् ॥ ७३ । मन्त्रिन्प्रभृतयः माहिष्मतीत्यपि ॥ ७४ ॥

## नडशादाद् ड्वलः ॥ ६ ॥ २ ॥ ७५ ॥

शब्दाभ्यां नडशादाभ्यां, डिद् वलश्चातुरर्थिकः ।
प्रत्ययो नाम्नि देशेऽर्थे, नड्वलं शाद्वलं यथा ॥ ७५ ॥

## शिखायाः ॥ ६ ॥ २ ॥ ७६ ॥

शिखाशब्दाद् वलो देशे, नाम्नि स्याच्चातुरर्थिकः ।
डिद् निवृत्तं पृथग् योगात्, पुरं नाम शिखावलम् ॥ ७६ ॥

## शिरीषादिककणौ ॥ ६ ॥ २ ॥ ७७ ॥

देशे नाम्नि शिरीषादि – ककणौ चातुरर्थिकौ ॥
ग्रामोऽदूरे शिरीषाणां, शैरीषकः शिरीषिकः ॥ ७७ ॥

## शर्कराया इकणीयाण् च ॥ ६ ॥ २ ॥ ७८ ॥

इककणिकणीयाणः, शर्करायास्तु पूर्ववत् ।
शर्करा सन्ति देशेऽस्मिन्, शार्करीयश्च शार्करः ॥ ७८ ॥

## रोऽश्मादेः ॥ ६ ॥ २ ॥ ७९ ॥

अश्मादिभ्यो भवेद्देशे, नाम्नि रश्चातुरर्थिकः ।
अश्मरो यूषरो मीन–रनगरौ च कन्दरा ॥ ७९ ॥

---

क्वचित्तु अपवादः ॥ ७५ ॥ मतुप्रकरणे शिखाया वलत्वं तत् अदेशार्थं ॥ ७६ ॥ स्पष्टम् ॥ स्पष्टम् ॥ ७७ ॥ एवं शार्करिकः, शर्करिकः, शार्करकः निवास आर्जुनाः स्पष्टम् ॥ ७९ ॥

## प्रेक्षादेरिन् ॥ ६ ॥ २ ॥ ८० ॥

स्यादिन् प्रेक्षादितो देशे, नामनि चातुरर्थिकः ।
प्रेक्षी च फलकी कुपी, न्यग्रोधी कण्टकी पुकी ॥८०॥

## तृणादेः सल् ॥ ६ ॥ २ ॥ ८१ ॥

तृणादिगणतो देशे, नाम्नि सल् चातुरर्थिकः ।
तृणसा नदसा पर्ण-सा जनसाऽपि वर्णसा ॥८१॥

## काशादेरिलः ॥ ८ ॥ २ ॥ ८२ ॥

काशादिगणतो देशे, नाम्नीलश्चातुरर्थिकः ।
काशिलं वाशिलं क्वचित्, कण्टकिलं कपित्थिलम्
॥ ८२ ॥

## अरीहणादेरकण् ॥ ६ ॥ २ ॥ ८३ ॥

अरीहणादितो देशे, नाम्न्यकण् चातुरर्थिकः ।
आरीहणक-सौमाय-नकैरवतकान्यपि ॥ ८३ ॥

## सुपन्थ्यादेर्ञ्यः ॥ ६ ॥ २ ॥ ८४ ॥

सुपन्थिन्नादितो देशे, नाम्नि ञ्यश्चातुरर्थिकः ।
सौपन्थ्यमथ सौवन्थ्यं, द्वयमेकार्थकं मतम् ॥ ८४ ॥

---

प्रेक्षादयोऽष्टादश ॥ ८० ॥ एकादशतृणादयः ॥ ८१ ॥ काशादय एकोविंशतिः ॥८२॥ द्वाचत्वारिंशदर्गणादयः ॥ ८३ ॥ सुपन्थिन्शब्दस्यात एव निपातनात् पकारात् परो वागमः, पस्य च वा वकार सुपन्थिन्प्रभृतयः पञ्चाशत् ॥ ८४ ॥

## सुतंगमादेरिञ् ॥ ६ ॥ २ ॥ ८५ ॥

सुतंगमादितो देशे, नाम्नीञ् स्याच्चातुरर्थिकः ।
सौतङ्गमिर्मौनि–चित्तिराजिरिराजुनिः ॥८५॥

## बलादेर्यः ॥ ६ ॥ २ ॥ ८६ ॥

बलादिगणतो देशे, नाम्नि यश्चातुरर्थिकः ।
बल्यं पुल्यमथो मुल्यं, कुल्यमुल्यश्च दुल्यकम् ॥८६॥

## अहरादिभ्योऽञ् ॥ ६ ॥ २ ॥ ८७ ॥

अहन्नित्यादितो देशे, नाम्न्यञ् स्याच्चातुरर्थिकः ।
आह्नं लौमं तथा गाङ्ग्यं, गणोऽहरादिराकृतिः ॥ ८७॥

## सख्यादेरेयण् ॥ ६ ॥ २ ॥ ८८ ॥

सख्यादेः सप्तविंशत्याः, स्यादेयण् पूर्ववत्ततः ।
साखेयः साखिदत्तेयः, सामलेयो विभाव्यताम् ॥८८॥

## पन्थ्यादेरायनण् ॥ ६ ॥ २ ॥ ८९ ॥

स्याद्देशे नाम्नि पन्थ्यादे–रायनण् चातुरर्थिकः ।
पान्थायनस्तथा पाक्षा–यणस्तौषायणस्तथा ॥ ८९ ॥

---

सुतङ्गमादयोऽष्टादश ॥ ८५ ॥ एकादश बलादयः; दुल्यकम्–स्वार्थे कः ॥ ८६ ॥ स्पष्टम् ॥ ८७ ॥ स्पष्टम् ॥ ८८ ॥ पन्थादयोऽष्टाविंशतिः ॥ ८९ ॥

## कर्णादेरायनिञ् ॥ ६ ॥ २ ॥ ९० ॥

कर्णादेरायनिञ् देशे, नाम्नि स्याच्चातुरर्थिकः ।
कार्णायनिस्तथा वासि-ष्ठायनिर्द्रौपदायनिः ॥ ९० ॥

## उत्करादेरीयः ॥ ६ ॥ २ ॥ ९१ ॥

देशे नाम्न्युत्करादिभ्यः, स्यादीयश्चातुरर्थिकः ।
उत्करीय-सुपर्णीयै-कीयाद्याः सप्तसप्ततिः ॥ ९१ ॥

## नडादेः कीयः ॥ ६ ॥ २ ॥ ९२ ॥

देशे नाम्नि नडादिभ्यः, कीयः स्याच्चातुरर्थिकः ।
नडकीयाम्रकीयश्च, कुञ्चकीयो यथागणम् ॥ ९२ ॥

## कृशाश्वादेरीयण् ॥ ६ ॥ २ ॥ ९३ ॥

देशे नाम्नि कृशाश्वादे-रीयण् स्याच्चातुरर्थिकः ।
कार्शाश्वीयादयस्त्वेक-चत्वारिंशद् गणक्रमात् ॥ ९३ ॥

## ऋश्यादेः कः ॥ ६ ॥ २ ॥ ९४ ॥

ऋश्यादिगणतो देशे, नाम्नि कश्चातुरर्थिकः ।
न्यग्रोधकर्श्यकस्थूल-बाहुकस्थूलकांशुकाः ॥ ९४ ॥

---

कर्णादयः सप्तदश ॥ ९० ॥ स्पष्टम् ॥ ९१ ॥ नडादय एकादश ॥ ९२ ॥ स्पष्टम् ॥ ९३ ॥ ऋश्यादयश्चतुस्त्रिंशत् ॥ ९४ ॥

## वराहादेः कण् ॥ ६ ॥ २ ॥ ९५ ॥

देशे नाम्नि वराहादेः, कण् भवेच्चातुरर्थिकः ।
वाराहकस्तथा पाला–शकादयश्चतुर्दश ॥ ९५ ॥

## कुमुदादेरिकः ॥ ६ ॥ २ ॥ ९६ ॥

कुमुदादिगणाद्देशे, नाम्नीकश्चातुरर्थिकः ।
स्यात् कुमुदिकमेकोन–त्रिंशतिः कुमुदादयः ॥ ९६ ॥

## अश्वत्थादेरिकण् ॥ ६ ॥ २ ॥ ९७ ॥

अश्वत्थादिगणाद्देशे, नाम्नीकण् चातुरर्थिकः ।
ग्रामिकं दाशिकं कौमु–दिकमाश्वत्थिकं यथा ॥ ९७ ॥

## साऽस्य पौर्णमासी ॥ ६ ॥ २ ॥ ९८ ॥

स्यात् साऽस्य पौर्णमासीति, षष्ठ्यर्थे प्रथमान्ततः ।
प्रत्ययान्तस्य नामत्वे, प्रत्ययो हि यथाविधि ॥ ९८ ॥

## आग्रहायण्यश्वत्थादिकण् ॥ ६ ॥ २ ॥ ९९ ॥

पूर्ववदाग्रहायण्य–श्वत्थान्नाम्नि भवेदिकण् ।
आग्रहायणिको मासो, मास आश्वत्थिकस्तथा ॥ ९९ ॥

---

स्पष्टे ॥ ९५ ॥ ९६ ॥ अश्वत्थादयः सप्तदश ॥ ९७ ॥ पौषी पौर्णमासी अस्य मासस्येति पौषो मासः ॥ ९८ ॥ आश्वत्था आश्वयुजी ॥ ९९ ॥

## चैत्री – कार्तिकी – फाल्गुनी – श्रवणाद्वा ॥ ६ ॥ २ ॥ १०० ॥

इकण्णेभ्यश्चतुर्भ्यो वा, भवेन्नामनि पूर्ववत् ।
चैत्रो वा चैत्रिको मासः, कार्तिकिकश्च कार्तिकः ॥ १०० ॥

## देवता ॥ ६ ॥ २ ॥ १०१ ॥

स्याद् यथाविहितं साऽस्य, प्रत्ययो यदि देवता ।
देवताऽस्य जिनो जैनो–ऽर्हन्नस्य देवताऽऽर्हतः ॥ १०१ ॥

## पैङ्गाक्षीपुत्रादेरीयः ॥ ६ ॥ २ ॥ १०२ ॥

पैङ्गाक्षीपुत्र इत्येव–मादिभ्य ईय इष्यते ।
पूर्ववत् तेन पैङ्गाक्षी–पुत्रीयं हविरुच्यते ॥ १०२ ॥

## शुक्रादियः ॥ ६ ॥ २ ॥ १०३ ॥

स्यात् साऽस्य देवतेत्यस्मिन्, विषये शुक्रतस्त्वियः ।
शुक्रोऽस्य देवताऽध्यायः, शुक्रियः शुक्रेयं हविः ॥ १०३ ॥

## शतरुद्रात्तौ ॥ ६ ॥ २ ॥ १०४ ॥

पूर्ववत् प्रत्ययौ स्याता–मीयेयौ शतरुद्रतः ।
श्रेयसे शतरुद्रीयं, स्नपनं शतरुद्रियम् ॥ १०४ ॥

---

एवं फाल्गुनिकः, फाल्गुनः, श्रावणिकः, श्रावणः ॥ १०० ॥ सेति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययः स्याद् यत् तत् प्रथमान्तं देवता चेत् मा भवेदिति स्पष्टोऽर्थः ॥ १०१ ॥ पूर्ववत् साऽस्य देवतेत्यस्मिन् । पैङ्गाक्षीपुत्रादयः प्रयोगगम्याः ॥ १०२ ॥ स्पष्टम् ॥ १०३ ॥ शतसङ्ख्या रुद्राः शतरुद्रास्ते देवता अस्येति; विधानसामर्थ्याद् द्विगावपि प्रत्ययस्य लुग् ॥ १०४ ॥

**अपोनपादपान्नपातस्तृचान्तः ॥ ६ ॥ २ ॥ १०५ ॥**

ईयेयौ पूर्ववच्चाभ्या--मातस्तृ इति जायते ।
अपोनप्त्रीयमित्याहु- र्देवताऽस्य ह्यपोनपात् ॥ १०५ ॥

**महेन्द्राद्वा ॥ ६ ॥ २ ॥ १०६ ॥**

महेन्द्रात् पूर्ववत् स्याता–मीयेयौ प्रत्ययौ नवा ।
माहेन्द्रियं महेन्द्रीयं, हविर्माहेन्द्रमित्यपि ॥ १०६ ॥

**क-सोमात् ट्यण् ॥ ६ ॥ २ ॥ १०७ ॥**

कशब्दात् सोमशब्दाच्च, पूर्ववट्ट्यण् भवेत्ततः ।
इष्टिः कायी हविः कायं, सौमी सौम्यं च ऋग्घविः ॥१०७॥

**द्यावा–पृथिवी–शुनासीराग्नीषोममरुत्वद्वास्तोष्पतिगृहमेधादीययौ ॥ ६ ॥ २ ॥ १०८ ॥**

ईययौ प्रत्ययौ स्याता–मेभ्यः षड्भ्योऽपि पूर्ववत् ।
हविर्द्यावापृथिव्यं द्या–वापृथिवीयमित्यपि ॥ १०८ ॥

---

एवमपोनप्त्रीयम्; अपान्नप्त्रीयम्, अपान्नप्त्रीयमिति ॥ १०५ ॥ स्पष्टम् ॥ १०६ ॥ टित्वान् ङीः; कशब्दं प्रति णित्वस्य वैयर्थ्यादालोपो न ॥ १०७ ॥ एवं शुनासीरीयम्, शुनासीर्यम्, अग्नीषोमीयम्, अग्नीषोम्यम्, मरुत्वतीयम्, मरुत्वत्यम्, वास्तोष्पतीयम्, वास्तोष्पत्यम्, गृहमेधीयम्, गृहमेध्यम्। शुनश्च वायुः, सीरश्चादित्य इति ॥ १०८ ॥

## वाय्वृतुपित्रुषसो यः ॥ ६ ॥ २ ॥ १०९ ॥

वायोर्ऋतोः पितुश्चोषः, शब्दाद् यः पूर्ववद्भवेत् ।
वायव्यं देवता वायुः, पित्र्यं पिताऽस्य सा ॥ १०९ ॥

## महाराजप्रोष्ठपदादिकण् ॥ ६ ॥ २ ॥ ११० ॥

प्रोष्ठपदान्महाराजात्, स्यादिकण् पूर्ववत्ततः ।
देवताऽस्य महाराजो, माहाराजिक उच्यते ॥ ११० ॥

## कालाद्भववत् ॥ ६ ॥ २ ॥ १११ ॥

कालविशेषवाचिभ्यो, भववत् प्रत्यया मताः ।
स्युः साऽस्य देवतेत्यस्मिन्, सांवत्सरिकमासिके ॥ १११ ॥

## आदेश्छन्दसः प्रगाथे ॥ ६ ॥ २ ॥ ११२ ॥

छन्दसोऽस्येति षष्ठयर्थे, स्यात् सेति प्रथमान्ततः ।
आदिभूतात् प्रगाथेऽर्थे, प्रत्ययो हि यथाविधि ॥ ११२ ॥

## योद्धृप्रयोजनाद्युद्धे ॥ ६ ॥ २ ॥ ११३ ॥

योद्धुः प्रयोजनात् सेति, प्रथमान्ताद् यथाविधि ।
षष्ठयर्थे प्रत्ययो युद्धे, सौभद्रं भारतं मृधम् ॥ ११३ ॥

---

एवम् ऋतव्यम्, उषस्यमिति ॥ १०९ ॥ एवं प्रौष्ठपदिक इति ॥ ११० ॥ वन् सर्वसादृश्यार्थः ॥ १११ ॥ प्राकृतः प्रगाथः ॥ ११२ ॥ भरता योद्धारः अस्य युद्धस्य भारतं युद्धम्; सुभद्रा प्रयोजनमस्य युद्धस्य सौभद्रं युद्धम् ॥ ११३ ॥

## भावघञोऽस्यां णः ॥ ६ ॥ २ ॥ ११४ ॥

भावघञन्ततः सेति, णो भवेत् प्रथमान्ततः ।
अस्यामिति च सप्तम्य–र्थे प्रापाता तिथिर्यथा ॥ ११४ ॥

## श्यैनंपाता तैलंपाता ॥ ६ ॥ २ ॥ ११५ ॥

श्यैनंपाता तथा तैलं–पाता मान्तो निपात्यते ।
पूर्वेण प्रत्ययः सिद्धः, क्रीडा क्रिया क्षितिस्तिथिः ॥ ११५ ॥

## प्रहरणात् क्रीडायां णः ॥ ६ ॥ २ ॥ ११६ ॥

क्रीडायां पूर्ववज्ज्ञेयो, णः प्रहरणवाचिनः ।
क्रीडा दाण्डा तथा मौष्टा, पादा क्रीडा यथायथम् ॥ ११६ ॥

## तद्वेत्त्यधीते ॥ ६ ॥ २ ॥ ११७ ॥

स्यात्तदिति द्वितीयान्ता – दधीते वेत्ति वार्थयोः ।
यथोक्तप्रत्ययो वैया–करणश्छान्दसो भवेत् ॥ ११७ ॥

## न्यायादेरिकण् ॥ ६ ॥ २ ॥ ११८ ॥

वेत्त्यधीतेऽथवेत्यर्थे, न्यायादिभ्यो भवेदिकण् ।
अधीते वेत्ति वा न्यायं, स नैयायिक उच्यते ॥ ११८ ॥

---

भावे यो घञ् तदन्तात् प्रथमान्तादस्यामिति स्त्रीलिङ्गे सप्तम्यर्थे णः प्रत्ययो भवति इति स्पष्टोऽर्थः । प्रपातोऽस्यां वर्तते तिथौ प्रापाता ॥ ११४ ॥ स्पष्टानि ॥ ११५ ॥ ११६ ॥ ११७ ॥ न्यायादयः षट्चत्वारिंशत् ॥ ११८ ॥

## पदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकात्
॥ ६ ॥ २ ॥ ११९ ॥

भवेदिकण् पदाद्यन्तात्, क्रत्वाद्यर्थाच्च पूर्ववत् ।
स्युः पौर्वपदिकाग्निष्टो-मिकवासवदत्तिकाः ॥ ११९ ॥

## अकल्पात् सूत्रात् ॥ ६ ॥ २ ॥ १२० ॥

वेत्त्यधीतेऽथवेत्यर्थे-ऽकल्पात् सूत्राद्भवेदिकण् ।
वृत्तिसूत्रमधीते वा, वेत्ति स वार्त्तिसूत्रिकः ॥ १२० ॥

## अधर्मक्षत्रत्रिसंसर्गाङ्गाद्विद्यायाः ॥६॥२॥१२१॥

विद्याशब्दादधर्मादेः, स्यादिकण् पूर्ववत् परात् ।
वायसविद्यिको वेद्य – स्त्रिविद्यः सार्पविद्यिकः ॥ १२१ ॥

## याज्ञिकौक्थिकलौकायितिकम् ॥ ६ ॥ २ ॥ १२२ ॥

इकणन्ता निपात्यन्ते, पूर्ववद् याज्ञिकादयः ।
याज्ञिक औक्थिको लौका-यतिको बुध्यते बुधैः ॥१२२॥

## अनुब्राह्मणादिन् ॥ ६ ॥ २ ॥ १२३ ॥

वेत्त्यधीतेऽथवेत्यर्थे, इन्ननुब्राह्मणाद्भवेत् ।
वेत्त्यनुब्राह्मणं यो वाऽ-धीतेऽनुब्राह्मणी स वै ॥ १२३ ॥

---

एवम्, मातृकल्पकः, गौलक्षणिकः, यावक्रीतिकः इत्यादि ॥ ११९ ॥ स्पष्टम् ॥ १२० ॥ स्पष्टं सूत्रद्वयम् ॥ १२१ ॥ १२२ ॥ ब्रह्मणा प्रोक्तो ग्रन्थो ब्राह्मणम्, ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणम्, सदृशार्थेऽव्ययीभावः । मत्वर्थीयेनैवेना सिद्धे अनभिधानाच्च इकस्याप्रवृत्तावणबाधनार्थमिणो विधानम् ॥ १२३ ॥

## शतषष्टेः पथ इकट् ॥ ६ ॥ २ ॥ १२४ ॥

पथिनशब्दादिकट् प्राग्वत्, शतषष्टिपराद्भवेत् ।
स्यात् शतपथिकः, षष्टि–पथिकस्तद्विदां मतः ॥ १२४ ॥

## पदोत्तरपदेभ्य इकः ॥ ६ ॥ २ ॥ १२५ ॥

पदोत्तरपदेभ्यः स्या–दिको झगिति पूर्ववत् ।
उत्तरपदिकः पूर्व–पदिकः पदिकस्तथा ॥ १२५ ॥

## पदक्रमशिक्षामीमांसासाम्नोऽकः ॥६॥२॥१२६॥

पदादिपञ्चकात् प्राग्वत्, स्यादकः प्रत्ययस्ततः ।
पदकक्रमकौ मीमां–सकशिक्षकसामकाः ॥ १२६ ॥

## ससर्वपूर्वाल्लुप् ॥ ६ ॥ २ ॥ १२७ ॥

स–पूर्वात् सर्वपूर्वाच्च, विहितप्रत्ययस्य लुप् ।
सकल्पः सर्वतन्त्रश्च, सर्वविद्यः सवार्तिकः ॥ १२७ ॥

## सङ्ख्याकात् सूत्रे ॥ ६ ॥ २ ॥ १२८ ॥

संख्याकान्नामतः सूत्रे, पूर्वार्थविहितस्य लुप् ।
अधीयतेऽष्टकं ये ते, पाणिनीयाः स्युरष्टकाः ॥ १२८ ॥

---

स्पष्टम् ॥ १२४ ॥ बहुवचनं सर्वभङ्गपरिग्रहार्थम् ॥ १२५ ॥ स्पष्टम् ॥ १२६ ॥ स्पष्टम् ॥ १२७ ॥ संख्यायाः परो यः कः प्रत्ययो विहितस्तदन्तात् सूत्रे वर्तमानान्नाम्नो वेत्त्यधीते वेत्त्यर्थे उत्पन्नस्य प्रत्ययस्य लुप् स्यात् । अप्रोक्तार्थ आरम्भ इति स्पष्टोऽर्थः ॥ १२८ ॥

## प्रोक्तात् ॥ ६ ॥ २ ॥ १२९ ॥

प्रोक्तार्थविहितः प्रोक्त—स्तदन्ताद्विहितस्य लुप् ।
सौधर्मं वेत्त्यधीते वा. सौधर्मो गौनमस्तथा ॥ १२९ ॥

## वेदेन ब्राह्मणमत्रैव ॥ ६ ॥ २ ॥ १३० ॥

प्रोक्तान्तं वेदवाचीन – न्तकं ब्राह्मणवाची च ।
प्रयुज्यत इहैवार्थे, कठ – कालापताण्डिनः ॥ १३० ॥

## तेन छन्ने रथे ॥ ६ ॥ २ ॥ १३१ ॥

तृतीयान्ताद्रथे छन्ने, प्रत्ययः स्याद् यथाविधि ।
वैयाघ्रश्चार्मणो वास्त्रो, द्वैपश्च काम्बलो रथः ॥ १३१ ॥

## पाण्डुकम्बलादिन् ॥ ६ ॥ २ ॥ १३२ ॥

तेनच्छन्ने रथे वाच्ये, भवेदिन् पाण्डुकम्बलात् ।
पाण्डुकम्बलतश्छन्नो, रथः स्यात् पाण्डुकम्बली ॥ १३२ ॥

## दृष्टे साम्नि नाम्नि ॥ ६ ॥ २ ॥ १३३ ॥

स्याद्यथाविहितं तेन, दृष्टे सामनि नामनि ।
दृष्टं क्रुञ्चेन साम स्यात्, क्रौञ्चं मार्गीयवं तथा ॥ १३३ ॥

प्रोक्तार्थविहितः प्रत्यय उपचारात् प्रोक्त इत्युच्यते । तदन्तान्नाम्नो वेत्त्यधीते वेत्त्यर्थे उत्पन्नस्य प्रत्ययस्य लुप् स्यात् ॥ १२९ ॥ प्रोक्तग्रहणमिहानुवर्तते । तच्च प्रथमान्त विपरिणम्यते । प्रोक्तप्रत्ययान्तं वेदवाचि इनन्तं च ब्राह्मणवाची, अत्रैव वेत्त्यधीते वेत्त्येतद्विषये एव प्रयुज्यते । तेन स्वातन्त्र्यम् उपाध्यन्तरयोगो वाक्यं च निवर्तते, इति व्यक्तोऽर्थः ॥ १३० ॥ स्पष्टे ॥ १३१ ॥ १३२ ॥ स्पष्टम ॥ १३३ ॥

## गोत्रादङ्कवत् ॥ ६ ॥ २ ॥ १३४ ॥

क्तेऽर्थे स्यात्तृतीयान्तात्, प्रत्ययो गोत्रतोऽङ्कवत् ।
स्यादौपगवकं साम, दृष्टमौपगवेन यत् ॥ १३४ ॥

## वामदेवाद्यः ॥ ६ ॥ २ ॥ १३५ ॥

वामदेवात्तृतीयान्ताद्, दृष्टे सामनि यो भवेत् ।
यद् दृष्टं वामदेवेन, वामदेव्यं तु साम तत् ॥ १३५ ॥

## डिद्वाण् ॥ ६ ॥ २ ॥ १३६ ॥

प्रत्ययोऽण् विहितो यः स, दृष्टे सामनि डिद्वा ।
दृष्टमुशनसा साम, स्यादौशनसमौशनम् ॥ १३६ ॥

## वा जाते द्विः ॥ ६ ॥ २ ॥ १३७ ॥

अण् यो द्विर्विहितो जाते, डिद् भवेत् स विभाषया ।
स्याच्छातभिषजः शात-भिषः शातभ इत्यपि ॥ १३७ ॥

## तत्रोद्धृते पात्रेभ्यः ॥ ६ ॥ २ ॥ १३८ ॥

स्याद् यथाविहितं पात्रात्, प्रत्ययस्तत्र चोद्धृते ।
ओदनः किल शारावः, शरावेषु समुध्धृतः ॥ १३८ ॥

---

यथा तस्यायमङ्क इत्यत्रेदमर्थे प्रत्ययो भवति तथा दृष्टं सामेत्यतस्मिन्नर्थेऽपि ॥ १३४ ॥ स्पष्टम् ॥ १३५ ॥ स्पष्टम् ॥ १३६ ॥ केचित्तु द्विर्डित्वमिच्छन्ति तन्मते शातभ इत्यपि ॥ १३७ ॥ बहुवचनं पात्रविशेषपरिग्रहार्थम् ॥ १३८ ॥

## स्थण्डिलाच्छेते व्रती ॥ ६ ॥ २ ॥ १३९ ॥

सप्तम्यन्ताद्भवेच्छेते, इत्यर्थे स्थण्डिलाद् व्रते ।
प्रत्ययो विहितः शेते, स्थण्डिले स्थाण्डिलो मुनिः ॥ १३९ ॥

## संस्कृते भक्ष्ये ॥ ६ ॥ २ ॥ १४० ॥

स्याद्यथाविहितं भक्ष्ये, संस्कृते प्रत्ययस्ततः ।
सप्तम्यन्तादपूपाः स्यु-र्भाष्ट्रा भ्राष्ट्रे सुसंस्कृताः ॥ १४० ॥

## शूलोखाद्यः ॥ ६ ॥ २ ॥ १४१ ॥

शूलोखाद्यो भवेत् सप्त-म्यन्ताद्भक्ष्ये तु संस्कृते ।
स्याच्छूले संस्कृतं शूल्य-मुखायामुख्यमामिषम् ॥ १४१ ॥

## क्षीरादेयण् ॥ ६ ॥ २ ॥ १४२ ॥

सप्तम्यन्ताद्भवेत् क्षीरा-देयण् भक्ष्ये तु संस्कृते ।
क्षैरेयं संस्कृतं क्षीरे, पारणायां भवेद्धितम् ॥ १४२ ॥

## दध्न इकण् ॥ ६ ॥ २ ॥ १४३ ॥

सप्तम्यन्तादिकण् भक्ष्ये, संस्कृते दधि शब्दतः ।
अतीसारे भवेद्भक्ष्यं, दाधिकं दध्नि संस्कृतम् ॥ १४३ ॥

---

व्रती इति किम् ? स्थण्डिले शेते बालः ॥ १३९ ॥ स्पष्टं सूत्रद्वयम् ॥ १४० ॥ १४१ ॥ स्पष्टं सूत्रद्वयम् ॥ १४२ ॥ १४३ ॥

**वोदश्वितः ॥ ६ ॥ २ ॥ १४४ ॥**

इकण् वा संस्कृते भक्ष्ये, सप्तम्यन्तादुदश्वितः ।
औदश्वित्कं तथौदश्वि-नं संस्कृतमुदश्विति ॥ १४४ ॥

**क्वचित् ॥ ६ ॥ २ ॥ १४५ ॥**

अपत्याद्यर्थतोऽन्यस्मि-न्नर्थेऽपि प्रत्ययः क्वचित् ।
स्याद्यथाविहितं तेन, चाक्षुषं चातुरं मतम् ॥ १४५ ॥

---

## तृतीयः पादः

**शेषे ॥ ६ ॥ ३ ॥ १ ॥**

इतोऽपत्यादितोऽन्यस्मिन्, प्रत्ययः प्राग्जितीयके ।
वेदितव्यमनुक्रम्य - माणं शेषेऽधिकारतः ॥ १ ॥

**नद्यादेरेयण् ॥ ६ ॥ ३ ॥ २ ॥**

नद्यादेः प्राग्जितीये स्या - देयण् शेषे यथायथम् ।
नादेयमम्बु नादेयं, दृष्ट्वा वर्षासु नादिकम् ॥ २ ॥

**राष्ट्रादियः ॥ ६ ॥ ३ ॥ ३ ॥**

शेषेऽर्थे प्राग्जितीये स्या - द्राष्ट्रशब्दादियस्ततः ।
राष्ट्रे क्रीतो भवो जातो, राष्ट्रियो राष्ट्रिरन्यथा ॥ ३ ॥

---

उदश्वित् तक्रम् ॥ १४४ ॥ स्पष्टम् ॥ १४५ ॥

स्पष्टम् ॥ १ ॥ नद्यादयस्त्रयोविंशतिः ॥ २ ॥ सूत्रत्रयं व्यक्तम् ॥ ३ ॥...

## दूरादेत्यः ॥ ६ ॥ ३ ॥ ४ ॥

एत्यप्रत्यय उन्नेयः, शेषेऽर्थे दूरशब्दतः ।
दूरेत्यो वल्लभो यस्याः, सा स्त्री प्रोषितभर्तृका ॥ ४ ॥

## उत्तरादाहञ् ॥ ६ ॥ ३ ॥ ५ ॥

स्यादाहञ् प्रत्ययः शेष, उत्तरादभिधानतः ।
औत्तराहौत्तराहे स्त, औत्तरायुहूत्तराहितः ॥ ५ ॥

## पारावारादीनः ॥ ६ ॥ ३ ॥ ६ ॥

स्यादीनप्रत्ययः शेषे-ऽर्थे पारावारशब्दतः ।
पारावारे भवः पारा-वारीणोऽम्बुधिपारगः ॥ ६ ॥

## व्यस्तव्यत्यस्तात् ॥ ६ ॥ ३ ॥ ७ ॥

इनो व्यस्ताद् विपर्यस्तात्, स्यात् पारावारशब्दतः ।
पारीणावारपारीणा--वारीणा एकसूत्रतः ॥ ७ ॥

## द्युप्रागपागुदक्प्रतीचो यः ॥ ६ ॥ ३ ॥ ८ ॥

अव्ययानव्ययेभ्यश्च, प्रागादिभ्यो दिवश्च यः ।
दिव्यं प्राच्यमपाच्यश्चो-दीच्यं प्रतीच्यमिष्यते ॥ ८ ॥

---

...४ ॥ ५ ॥ अवारः समुद्रस्तस्य पारं, राजदन्तादित्वात् पारावारः ॥ ६ ॥
स्पष्टं सूत्रद्वयम् ॥ ७ ॥ ८ ॥

## ग्रामादीनञ् च ॥ ६ ॥ ३ ॥ ९ ॥

ग्रामशब्दाद्भवेदीनञ्, शेषे यश्चानुवर्तते ।
ग्रामीणोऽपि भवेत् कश्चि–दग्राम्यो बुद्धिवैभवात् ॥ ९ ॥

## कत्र्यादेश्चैयकञ् ॥ ६ ॥ ३ ॥ १० ॥

कत्त्र्यादिभ्यस्तथाग्राम – शब्दाच्छेषेऽर्थ एयकञ् ।
कात्त्रेयकस्तथा ग्रामे – यकश्च पौष्करेयकः ॥ १० ॥

## कुण्डयादिभ्यो यलुक् च ॥ ६ ॥ ३ ॥ ११ ॥

एयकञ्प्रत्ययः कुण्ड्या–दिभ्यः शेषे यलुक् तथा ।
दश कुण्डयादयो ज्ञेया–स्ततः कौण्डेयकादयः ॥ ११ ॥

## कुलकुक्षिग्रीवाच्छ्वास्यलङ्कारे ॥ ६ ॥ ३ ॥ १२ ॥

ग्रीवाया भूषणे कुक्षे–रसौ स्यात् कुलतः शुनि ।
एयकञ्प्रत्ययः शेषे, कौक्षेयकः कृपाणकः ॥ १२ ॥

## दक्षिणापश्चात्पुरसस्त्यण् ॥ ६ ॥ ३ ॥ १३ ॥

शेषे त्यण् दक्षिणापश्चात्–पुरोभ्यः प्रत्ययो भवेत् ।
हिंसका दाक्षिणात्याः स्युः, पाश्चात्या नास्तिकाः पुनः ॥ १३ ॥

---

ञकारः पुंवद्भावप्रतिषेधार्थस्तेन ग्रामीणा भार्या यस्य स ग्रामीणाभार्य इति ॥ ९ ॥ कत्त्र्यादयस्त्रयोदश ॥ १० ॥ बहुवचनं प्रयोगानुसरणार्थम् ॥ ११ ॥ एवम् कौल्येयकः श्वा, कौलोऽन्यः, कौक्षोऽन्यः, ग्रैवेयकोऽलङ्कारः, ग्रैवोऽन्य इति ॥ १२ ॥ एवम् पौरस्त्यः ॥ १३ ॥

## वहूल्यूर्दिपर्दिकापिश्याष्टायनण् ॥ ६ ॥ ३ ॥ १४ ॥

वहूल्यूर्दिपर्दिकापिश्याः, शेषेऽर्थे टायनण् भवेत् ।
स्यात् कापिशायनो वाह्ला–यनः पार्दायनस्तथा ॥ १४ ॥

## रङ्कोः प्राणिनि वा ॥ ६ ॥ ३ ॥ १५ ॥

प्राणिविशिष्टशेषेऽर्थे, रङ्कुतष्टायनण् नवा ।
राङ्कवः कम्बलो गावो, राङ्कवा राङ्कवायणाः ॥ १५ ॥

## केहामात्रतसस्त्यच् ॥ ६ ॥ ३ ॥ १६ ॥

केहामातो भवेच्छेषे, त्यच् तथात्रतसन्ततः ।
क्वत्योऽमात्यः कुतस्त्योऽपी-हत्योऽत्रत्यो यथायथम्॥१६॥

## नेर्ध्रुवे ॥ ६ ॥ ३ ॥ १७ ॥

निशब्दतो ध्रुवेऽर्थे त्यच्, द्रव्यतो नित्यमम्बरम् ।
नच पर्यायतोऽनित्य – मित्यनेकान्तमुद्रितम् ॥ १७ ॥

## निसो गते ॥ ६ ॥ ३ ॥ १८ ॥

निस्शब्दाद् गतेऽर्थे त्यच्, प्रत्ययः परिकीर्तितः ।
चाण्डालः कथ्यते निष्ट्यो, वर्णाश्रमविनिर्गतः ॥ १८ ॥

---

एवम् और्दायनः ॥ १४ ॥ सूत्रचतुष्कं स्पष्टम् ॥ १५ ॥ १६ ॥
॥ १७ ॥ १८ ॥

## ऐषमोह्यस्श्वसो वा ॥ ६ ॥ ३ ॥ १९ ॥

ऐषमोह्यःश्व इत्येभ्यः, शेषे त्यच् प्रत्ययो नवा ।
ऐषमस्त्यं तथा ह्यस्त्यं, श्वस्त्यं श्वस्तनमित्यपि ॥१९॥

## कन्थाया इकण् ॥ ६ ॥ ३ ॥ २० ॥

कन्थातः स्यादिकण् शेषे, ग्रामविशेषवाचिनः ।
कन्थायां जायमानोऽसौ, कान्थिको व्यपदिश्यते ॥२०॥

## वर्णावकञ् ॥ ६ ॥ ३ ॥ २१ ॥

वर्णुहृदसमीपस्थ–देशकन्थाभिधानतः ।
प्रत्ययोऽकञ् भवेच्छेषे, कान्थकः कान्थिकात् परः ॥२१॥

## रूप्योत्तरपदारण्याण्णः ॥ ६ ॥ ३ ॥ २२ ॥

रूप्योत्तरादरण्याच्च, शेषे णः प्रत्ययो भवेत् ।
वार्करूप्यास्तथारण्याः, पशवः पशवः खलु ॥ २२ ॥

## दिक्पूर्वपदादनाम्नः ॥ ६ ॥ ३ ॥ २३ ॥

दिक्पूर्वपदतः शेषे, णोऽसंज्ञाविषयाद्भवेत् ।
पौर्वशालश्च पूर्वेषु–कामशमस्तु नामतः ॥ २३ ॥

---

एवमैषमस्तनम्, ह्यस्तनमित्यादि ॥ १९ ॥ स्पष्टानि ॥ २० ॥ २१ ॥ २२ ॥ स्पष्टम् ॥ २२ ॥ पूर्वेषुकामशमीनामग्रामः ॥ २३ ॥

## मद्रादञ् ॥ ६ ॥ ३ ॥ २४ ॥

शेषे मद्रान्तादिक्पूर्व-पदादञ् प्रत्ययो भवेत् ।
भवः पूर्वेषु मद्रेषु, पौर्वमद्रोऽस्तु मद्रकृत् ॥ २४ ॥

## उदग्ग्रामाद्यक्कृल्लोम्नः ॥ ६ ॥ ३ ॥ २५ ॥

यक्कृल्लोम्न उदग्ग्राम-वाचिनः शैषिकोऽञ् भवेत् ।
याक्कृल्लोम उदग्ग्रामः, स्याद् याक्कृल्लोमनोऽन्यथा ॥२५॥

## गौष्ठीतैकीनैकेतीगोमतीशूरसेनवाहीकरोमक-पटच्चरात् ॥ ६ ॥ ३ ॥ २६ ॥

गौष्ठ्याद्यष्टकतः शेषे, भवेदञ् प्रत्ययस्ततः ।
गौष्ठस्तैकश्च नैकेत-स्तथा गौमतरौमकौ ॥ २६ ॥

## शकलादेर्यञः ॥ ६ ॥ ३ ॥ २७ ॥

यञन्तशकलादिभ्यो, भवेदञ् शैषिकस्ततः ।
शाकल्यस्य मुनेरन्ते-वासिनः शाकला मताः ॥ २७ ॥

## वृद्धेञः ॥ ६ ॥ ३ ॥ २८ ॥

वृद्धे य इञ् तदन्तादञ्-प्रत्ययः शैषिको भवेत् ।
दक्षापत्यस्य वृद्धस्य, दाक्षदाक्षाः श्रुतार्थिनः ॥ २८ ॥

स्पष्टे ॥ २४ ॥ २५ ॥ एवं शौरसेनः, वाहीकः, पाटच्चरोऽपि ॥ २६ ॥ सूत्राणां पञ्चकमतिरोहितार्थम् ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

## न द्विस्वरात् प्रागभरतात् ॥ ६ ॥ ३ ॥ २९ ॥

प्राच्यभरतगोत्रार्थाद्, द्विस्वरादञ् न पूर्ववत् ।
प्राच्याश्वङ्कीयपौष्पीयाः, काशीया भरतान्वयाः ॥ २९ ॥

## भवतोरिकणीयसौ ॥ ६ ॥ ३ ॥ ३० ॥

भवतुशब्दतः स्यातां, शैषिकाविकणीयसौ ।
भावत्कं भवदीयं च, वचः कं कं न मोहयेत् ॥ ३० ॥

## परजनराज्ञोऽकीयः ॥ ६ ॥ ३ ॥ ३१ ॥

पराज्जनात्तथा राज्ञो-ऽकीयो भवति शैषिकः ।
परकीयं पुना राज-कीयश्च जनकीयकम् ॥ ३१ ॥

## दोरीयः ॥ ६ ॥ ३ ॥ ३२ ॥

दुसंज्ञकाद्भवेदीयः, प्रत्ययः शैषिकस्ततः ।
नदीयं देवदत्तीयं, पाठशालीयमित्यपि ॥ ३२ ॥

## उष्णादिभ्यः कालात् ॥ ६ ॥ ३ ॥ ३३ ॥

उष्णादिपूर्वकात् कालात्, स्यादीयः शैषिकस्ततः ।
नभस्वानुष्णकालीयः, सायंकाले सुखावहः ॥ ३३ ॥

## व्यादिभ्यो णिकेकणौ ॥ ६ ॥ ३ ॥ ३४ ॥

व्यादिभ्यः परतः काला-च्छैषिकौ स्तो णिकेकणौ ।
ततो वैकालिको वैका-लिका वैकालिकी भवेत् ॥ ३४ ॥

---

एवं गोनर्दीय इत्यादि ॥ ३२ ॥ बहुवचनं प्रयोगानुसरणार्थम् ॥ ३३ ॥ व्यादयः प्रयोगगम्याः ॥ ३४ ॥

## काश्यादेः ॥ ६ ॥ ३ ॥ ३५ ॥

स्यातां णिकेकणौ शेषे, काश्यादितो दुसंज्ञकात् ।
काशिकः काशिकी काश्यां, चेद्यां चैदिकचैदिके ॥ ३५ ॥

## वाहीकेषु ग्रामात् ॥ ६ ॥ ३ ॥ ३६ ॥

वाहीकग्रामवाचिभ्यो, दुभ्यः शेषे णिकेकणौ ।
स्त्री कारन्तापिका कार-न्तापिकी प्रियमण्डना ॥ ३६ ॥

## वोशीनरेषु ॥ ६ ॥ ३ ॥ ३७ ॥

उशीनरेषु दोर्ग्रामा-च्छैषिकौ वा णिकेकणौ ।
सौदर्शनीय-सौदर्श-निके सौदर्शनिक्यपि ॥ ३७ ॥

## वृजिमद्राद् देशात् कः ॥ ६ ॥ ३ ॥ ३८ ॥

देशार्थवृजिमद्राभ्यां, शैषिकः को विधीयते ।
वृजिको मद्रकः सर्व-मद्रकोऽप्यर्धमद्रकः ॥ ३८ ॥

## उवर्णादिकण् ॥ ६ ॥ ३ ॥ ३९ ॥

शेषेऽर्थे स्यादिकण् देश-वाच्युवर्णान्तशब्दतः ।
शाबरजम्बुको दाक्षि-कर्षुकः प्लाक्षिकर्षुकः ॥ ३९ ॥

सूत्राणां पञ्चकमुत्तानार्थम् ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

## दोरेव प्राचः ॥ ६ ॥ ३ ॥ ४० ॥

प्राचो देशादुवर्णान्ता-दिकण् दोरेव शैषिकः ।
आषाढजम्बुकः कश्चित्, कश्चिन्नापितवास्तुकः ॥ ४० ॥

## ईतोऽकञ् ॥ ६ ॥ ३ ॥ ४१ ॥

ईकारान्तादकञ् शेषे, दोः प्राचो देशतो भवेत् ।
भवेत् काकन्दको माक-न्दकस्तद्देशविश्रुतः ॥ ४१ ॥

## रोपान्त्यात् ॥ ६ ॥ ३ ॥ ४२ ॥

रोपान्त्यात् स्यादकञ् शेषे, प्राचो देशाद् दुसंज्ञकात् ।
पाटलिपुत्रकः कश्चित्, कश्चित् स्यादैकचक्रकः ॥ ४२ ॥

## प्रस्थपुरवहान्तयोपान्त्यधन्वार्थात् ॥ ६ ॥ ३ ॥ ४३ ॥

प्रस्थपुरवहान्ताद्यो-पान्त्याद् धन्वार्थकादकञ् ।
दोर्देशाच्छैषिको नान्दी-पुरको माणिरूप्यकः ॥ ४३ ॥

## राष्ट्रेभ्यः ॥ ६ ॥ ३ ॥ ४४ ॥

राष्ट्रेभ्यो देशवाचिभ्यो, दुसंज्ञेभ्यो भवेदकञ् ।
स श्यामायनकश्चाभू, आदर्शकाभिसारकौ ॥ ४४ ॥

---

शरावत्या नद्याः प्राच्यां दिशि देशः प्राग्देशः ॥ ४० ॥ प्राच इत्येव दात्तामित्रीयः ॥ ४१ ॥ ईयस्यापवादः ॥ ४२ ॥ एवं मालाप्रस्थकः; फाल्गुनीवहकः, पारेधन्वकः इति ॥ ४३ ॥ ईयस्यापवादः ॥ ४४ ॥

## बहुविषयेभ्यः ॥ ६ ॥ ३ ॥ ४५ ॥

बहुविषयराष्ट्रेभ्यो, देशेभ्योऽकञ् च शैषिकः ।
आङ्गकोऽङ्गेषु सञ्जातो, जातो बङ्गेषु वाङ्गकः ॥ ४५ ॥

## धूमादेः ॥ ६ ॥ ३ ॥ ४६ ॥

धूमादिदेशवाचिभ्यः, शैषिकोऽकञ् विधीयते ।
धौमकः स्याद्भवो धूमे, षाडण्डिकोऽपि तद्भवः ॥ ४६ ॥

## सौवीरेषु कूलात् ॥ ६ ॥ ३ ॥ ४७ ॥

शेषेऽर्थेऽकञ् भवेत् कूलात्, सौवीरदेशवाचिनः ।
सौवीरेषु मतः कौल-कः कौलः पुनरन्यथा ॥ ४७ ॥

## समुद्रान्नृनावोः ॥ ६ ॥ ३ ॥ ४८ ॥

शेषेऽर्थेऽकञ् नृनावोः स्यात्, समुद्राद् देशवाचिनः ।
सामुद्रको नरो नावं, सामुद्रिकां न मुञ्चति ॥ ४८ ॥

## नगरात् कुत्सादाक्ष्ये ॥ ६ ॥ ३ ॥ ४९ ॥

कुत्सादाक्ष्ये च शेषेऽकञ्, नगराद् देशवाचिनः ।
चौरा नागरका दक्षा, नागरो नागरेयकः ॥ ४९ ॥

## कच्छाग्निवक्त्रवर्तोत्तरपदात् ॥ ६ ॥ ३ ॥ ५० ॥

कच्छाद्युत्तरतो देश-वाचिनः शैषिकोऽह्यकञ् ।
स्याद् भारुकच्छको बाहु-वर्तकश्चैन्द्रवक्त्रकः ॥ ५० ॥

---

अणाद्यपवादः ॥ ४५ ॥ स्पष्टे ॥ ४६ ॥ ४७ ॥ नृनावोरिति किं सामुद्रं लवणम् ॥ ४८ ॥ स्पष्टम् ॥ ४९ ॥ एवं काण्डाग्नकः इति ॥ ५० ॥

**अरण्यात् पथिन्यायाध्यायेभनरविहारे ॥६॥३॥५१॥**

पथ्यादिषु च शेषेऽकञ्, अरण्याद्देशवाचिनः ॥
आरण्यको विहारोऽध्वा, न्यायोऽध्याय इभो नरः ॥ ५१ ॥

**गोमये वा ॥ ६ ॥ ३ ॥ ५२ ॥**

शेषेऽकञ् गोमये वाच्ये, वाऽरण्याद् देशवाचिनः ।
गोमयानि स्युरारण्या-न्यारण्यकाश्च गोमयाः ॥ ५२ ॥

**कुरुयुगन्धराद्वा ॥ ६ ॥ ३ ॥ ५३ ॥**

कुरोर्युगन्धराद् वा स्या-च्छेषेऽकञ् देशवाचिनः ।
यौगन्धरकयौगन्ध-रकौरवककौरवाः ॥ ५३ ॥

**साल्वाद् गोयवाग्वपत्तौ ॥ ६ ॥ ३ ॥ ५४ ॥**

गोयवाग्वोर्नरेऽपत्तौ, साल्वाद् देशाद्भवेदकञ् ।
साल्वको गौर्मनुष्यो वा, यवागूरथ साल्विका ॥ ५४ ॥

**कच्छादेर्नृनृस्थे ॥ ६ ॥ ३ ॥ ५५ ॥**

कच्छादिदेशतः शेषे, नरि नृस्थे भवेदकञ् ।
मनुष्यो काच्छको मुग्धो, हसितमस्य काच्छकम् ॥ ५५ ॥

---

पथ्यादाविति किम् ? आरण्याः सुमनसः ॥ ५१ ॥ स्पष्टे ॥ ५२ ॥ ५३ ॥ साल्वा व्रीहयः, साल्वः पत्तिरिति ॥ ५४ ॥ नृ-नृस्थ इति किम् ? काच्छो गौः, सैन्धवं लवणम् ॥ ५५ ॥

## कोपान्त्याच्चाण् ॥ ६ ॥ ३ ॥ ५६ ॥

कोपान्त्यादथ कच्छादे-रण् शेषे देशवाचिनः ।
आर्षिकः सैन्धवः काच्छ-स्तत्तद्देशभवो मतः ॥ ५६ ॥

## गर्तोत्तरपदादीयः ॥ ६ ॥ ३ ॥ ५७ ॥

गर्तोत्तरपदाद्देशात्, स्यादीयः शैषिकस्ततः ।
कश्चन वृकगर्तीयो, श्वाहुगर्तोऽपि कश्चन ॥ ५७ ॥

## कटपूर्वात् प्राचः ॥ ६ ॥ ३ ॥ ५८ ॥

कटपूर्वपदात् प्राचो, देशादीयोऽपि शैषिकः ।
कटग्रामीय उन्नयः, प्राक्कटग्रामसम्भवः ॥ ५८ ॥

## कखोपान्त्यकन्थापलदनगरग्रामह्रदोत्तरपदाद् दोः ॥ ६ ॥ ३ ॥ ५९ ॥

कखोपान्त्याच्च कन्थादि-पञ्चोत्तरपदाच्च दोः ।
देशादीयो भवेच्छेषे, दाक्षिकन्थीय आमतः ॥ ५९ ॥

## पर्वतात् ॥ ६ ॥ ३ ॥ ६० ॥

शैषिकेऽर्थे भवेदीयः, पर्वताद्देशवाचिनः ।
पर्वतीयो महाराजो, राजराजेषु राजते ॥ ६० ॥

---

स्पष्टानि ॥ ५६ ॥ ५७ ॥ ५८ ॥ एवम् आरोहणकीयः, कौटशिखीयः, दाक्षिपलदीयः, दाक्षिनगरीयः, दाक्षिग्रामीयः, दाक्षिह्रदीयः ॥ ५९ ॥ स्पष्टं सूत्रत्रयम् ॥ ६० ॥......

## अनरे वा ॥ ६ ॥ ३ ॥ ६१ ॥

ईयः स्याद्वाऽनरे शेषे, पर्वताद् देशवाचिनः ।
फलानि पर्वतीयानि, पार्वतानि रसाश्च वै ॥ ६१ ॥

## पर्णकृकणाद् भारद्वाजात् ॥ ६ ॥ ३ ॥ ६२ ॥

ईयः कृकणतः पर्णाद्, भारद्वाजे हि शैषिकः !
कृकणीयश्च पर्णीयो–ऽन्यथा पार्णश्च कार्कणः ॥ ६२ ॥

## गहादिभ्यः ॥ ६ ॥ ३ ॥ ६३ ॥

देशार्थेभ्यो गहादिभ्यः, शेष ईयो यथायथम् ।
अन्तःस्थीयो गहीयश्च, बहवः स्युर्गहादयः ॥ ६३ ॥

## पृथिवीमध्यान्मध्यमश्चास्य ॥ ६ ॥ ३ ॥ ६४ ॥

पृथिवीमध्यतो देशा–दीयः शेषेऽस्य मध्यमः ।
भवो यः पृथिवीमध्ये, मध्यमीयः स उच्यते ॥ ६४ ॥

## निवासाच्चरणेऽण् ॥ ६ ॥ ३ ॥ ६५ ॥

स्याच्चरणे निवासादण्, शैषिकः पूर्ववत्ततः ।
निवासः पृथिवीमध्यं, माध्यमाश्चरणा अमी ॥ ६५ ॥

## वेणुकादिभ्य ईयण् ॥ ६ ॥ ३ ॥ ६६ ॥

देशेभ्यो वेणुकादिभ्य, ईयण् शेषे यथायथम् ।
वैणुकीयस्तथा वैत्रकीयः स्वकीयदेशजः ॥ ६६ ॥

......६१ ॥ ६२ ॥ अणाद्यपवादः ॥ ६३ ॥ स्पष्टं ॥ ६४ ॥ ६५ ॥ बहुवचनं प्रयोगानुसरणार्थम् ॥ ६६ ॥

## वा युष्मदस्मदोऽञीनञौ युष्माकास्माकं चास्यैकत्वे तु तवकममकम् ॥ ६ ॥ ३ ॥ ६७ ॥

वाऽऽभ्यामञीनञौ युष्मा–कास्माकौ भवतोऽनयोः ।
तवकममकौ शेषे, चैकत्वे तावकं यथा ॥ ६७ ॥

## द्वीपादनुसमुद्रं ण्यः ॥ ६ ॥ ३ ॥ ६८ ॥

स्यात् समुद्रसमीपस्थाद्, द्वीपाण्ण्यः शैषिकस्ततः ।
द्वैप्यो नरोऽस्य हास्यं स्याद्, द्वैप्यं द्वैप्यमपीतरत् ॥ ६८ ॥

## अर्धाद्यः ॥ ६ ॥ ३ ॥ ६९ ॥

स्यादर्धशब्दतः शेषे, प्रत्ययो यस्ततस्ततः ।
मूर्धन्यर्धं भवं दुःख – मर्ध्यं स्यादतिदुस्सहम् ॥ ६९ ॥

## सपूर्वादिकण् ॥ ६ ॥ ३ ॥ ७० ॥

अर्धशब्दादिकण् शेषे, सपूर्वपदतो भवेत् ।
पाठशालार्धिकः पौष्क–रार्धिको वैजयार्धिकः ॥७०॥

---

देशादिति निवृत्तम् । युष्मद् अस्मद् इत्येताभ्यां शेषेऽर्थे अञ् ईनञ् इत्येतौ प्रत्ययौ वा भवतः, तन्संनियोगे च यथासङ्ख्यं युष्मदस्मदोर्युष्माकास्माकौ, एकत्वविशिष्टे त्वर्थे वर्तमानयोस्तवकममकावादेशौ भवतः । यौष्माकीणः, आस्माकः, आस्माकीनः, युस्मदीयः, अस्मदीयः, मामकः, तावकीनः, मामकीनः, त्वदीयः, मदीयः इति ॥ ६७ ॥ कच्छाद्यकञणोरपवादः ॥ ६८ ॥ स्पष्टानि ॥ ६९ ॥ ७० ॥......

## दिक्पूर्वात्तौ ॥ ६ ॥ ३ ॥ ७१ ॥

दिक्पूर्वपदतः स्याता-मर्धाच्छेषे तु येकणौ ।
**पौर्वार्धिकं च पूर्वार्ध्यं, पश्चार्ध्यं दाक्षिणार्धिकम् ॥७१॥**

## ग्रामराष्ट्रांशादणिकणौ ॥ ६ ॥ ३ ॥ ७२ ॥

दिक्पूर्वार्धतः शेषे, ग्रामराष्ट्रांशतोऽणिकण् ।
**पौर्वार्धिकश्च पौर्वार्धः, पाश्चार्धो दाक्षिणार्धिकः ॥७२॥**

## परावराधमोत्तमादेर्यः ॥ ६ ॥ ३ ॥ ७३ ॥

परादिपूर्वतः शेषे, यो भवेदर्धशब्दतः ।
**परार्ध्यमवरार्ध्यश्चा-धमार्ध्यमुत्तमार्ध्यकम् ॥ ७३ ॥**

## अमोऽन्तावोधसः ॥ ६ ॥ ३ ॥ ७४ ॥

अन्त अवस् अधस् इत्ये-तेभ्यः शेषे भवेदमः ।
**अन्तमोऽप्यवमः कश्चित्, कश्चित् स्या दधमाधमः ॥७४॥**

## पश्चादाद्यन्ताग्रादिमः ॥ ६ ॥ ३ ॥ ७५ ॥

स्यादिमः प्रत्ययः पश्चा-दाद्यन्ताग्राच्च शैषिकः ।
**अन्तिमः पश्चिमो वीरोऽ-र्हन्नाद्योऽग्रिम आदिमः ॥७५॥**

---

......॥ ७१ ॥ यापवादौ ॥ ७२ ॥ परावरयोर्दिक्शब्दत्वेऽपि परत्वादयमेव यः ॥ ७३ ॥ अकारादित्त्वमवोऽधसोऽन्त्यस्वरादिलोपार्थम् । 'उत्तमा आत्मना ख्याताः, पितुः ख्यातास्तु मध्यमाः । मातुलादधमाः ख्याताः, श्वशुरादधमाधमाः ॥ १ ॥' इतिनीतिवचनमुद्बोधयत्युदाहरणम् ॥ ७४ ॥ स्पष्टे ॥ ७५ ॥ ७६ ॥

## मध्यान्मः ॥ ६ ॥ ३ ॥ ७६ ॥

मप्रत्ययोऽभवे शेषे, जायते मध्यशब्दतः ।
पार्श्वान्ता अजितात् सार्वा, मध्यमा द्वयधिविंशतिः ॥७६॥

## मध्य उत्कर्षापकर्षयोरः ॥ ६ ॥ ३ ॥ ७७ ॥

अः शेषे मध्यतो मध्ये, स्यादुत्कर्षापकर्षयोः ।
मेधाविनोऽपि मध्याः स्यु-रपेक्षाभेदतो भुवि ॥ ७७ ॥

## अध्यात्मादिभ्य इकण् ॥ ६ ॥ ३ ॥ ७८ ॥

अध्यात्मेत्यादिशब्देभ्यः, शैषिकेऽर्थे भवेदिकण् ।
एते प्रयोगगम्याः स्यु-र्ज्ञानमाध्यात्मिकं परम् ॥ ७८ ॥

## समानपूर्वलोकोत्तरपदात् ॥ ६ ॥ ३ ॥ ७९ ॥

शेषे समानपूर्वाच्च, लोकोत्तरपदादिकण् ।
सामानग्रामिकः पार-लौकिकः सार्वलौकिकः ॥ ७९ ॥

## वर्षाकालेभ्यः ॥ ६ ॥ ३ ॥ ८० ॥

वर्षाशब्दात्तथाकाल-विशेषात् शैषिकस्त्विकण् ।
वार्षिको मासिकः पूर्व-वार्षिकोऽप्यार्धमासिकः ॥ ८० ॥

---

मापवादः ॥ ७७ ॥ सूत्रसप्तकं स्पष्टम् ॥ ७८ ॥ ७९ ॥ ८० ॥......

## शरदः श्राद्धे कर्मणि ॥ ६ ॥ ३ ॥ ८१ ॥

पितृकार्य्ये त्विकण् शेषे, शरदः कालवाचिनः ।
श्राद्धं शारदिकं श्राद्धः शारदः शारदं तपः ॥ ८१ ॥

## नवा रोगातपे ॥ ६ ॥ ३ ॥ ८२ ॥

वा रोगातपयोः काल-वाचिनः शरदस्त्विकण् ।
शारदिकौ रुजोद्योतौ शारदौ दधि शारदम् ॥ ८२ ॥

## निशाप्रदोषात् ॥ ६ ॥ ३ ॥ ८३ ॥

निशाप्रदोषशब्दाभ्यां, कालार्थाभ्यामिकण् नवा ।
शेषे प्रादोषिको नैशः, प्रादोषो नैशिको यथा ॥ ८३ ॥

## श्वसस्तादिः ॥ ६ ॥ ३ ॥ ८४ ॥

कालार्थतः श्वसस्तादि-रिकण् शेषे भवेन्नवा ।
स्यात् श्वःकाले भवं शौव-स्तिकं श्वस्त्यं च श्वस्तनम् ॥८४॥

## चिरपरुत्परारेस्त्नः ॥ ६ ॥ ३ ॥ ८५ ॥

चिरपरुत्परारेस्त्नः, शेषे वा कालवाचिनः ।
पुरारित्नं परुत्नश्च, चिरत्नं च चिरन्तनम् ॥ ८५ ॥

---

...८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ पक्षे 'सायम्' इत्यादिना तनट् ॥ ८५ ॥

## पुरो नः ॥ ६ ॥ ३ ॥ ८६ ॥

नःप्रत्ययो नवा शेषे, कालवाचिपुराऽव्ययात् ।
पुराभवं पुराणं च, पुरातनमुदाहृतम् ॥ ८६ ॥

## पूर्वाह्णापराह्णात्तनट् ॥ ६ ॥ ३ ॥ ८७ ॥

एताभ्यां कालवाचिभ्यां, शेषे वा प्रत्ययस्तनट् ।
अपराह्णतनं साध्य-मपराह्णतनं ततः ॥ ८७ ॥

## सायंचिरंप्राह्णेप्रगेऽव्ययात् ॥ ६ ॥ ३ ॥ ८८ ॥

सायंचिरंप्रगेप्राह्णे, इत्येतेभ्यस्तथाऽव्ययात् ।
कालार्थकात्तनट् शेषे, नित्यं सायन्तनं यथा ॥ ८८ ॥

## भर्तुसंध्यादेरण् ॥ ६ ॥ ३ ॥ ८९ ॥

भवाचिऋतुवाचिभ्यः, सन्ध्यादिभ्यश्च जायते ।
अण् शेषे कालवाचिभ्यः, पौषः सान्ध्यश्च शैशिरः ॥८९॥

## संवत्सरात् फलपर्वणोः ॥ ६ ॥ ३ ॥ ९० ॥

अण् संवत्सरतः शेषे, फले पर्वणि जायते ।
सांवत्सरं फलं पर्व, सांवत्सरिकमन्यथा ॥ ९० ॥

स्पष्टम् ॥ ८६ ॥ एवं पूर्वाह्णेतनम्, पूर्वाह्णतनः, पौर्वाह्णिकः, आपराह्णिकः इति ॥ ८७ ॥ सायंचिरंप्राह्णेप्रगेइत्यव्ययेभ्योऽव्ययादित्येव सिद्धे सायंचिरप्राह्णप्रग-शब्देभ्यस्तनड्विधानं कालेकणबाधनार्थम्, एवं चिरन्तनम्, प्रगेतनम्, प्राह्णेतनम्, दिवातनम् इत्यादि ॥ ८८ ॥ सन्ध्यादयो नव ॥ ८९ ॥ स्पष्टम् सूत्रचतुष्कम् ॥ ९०.......

## हेमन्ताद्वा तलुक् च ॥ ६ ॥ ३ ॥ ९१ ॥

शेषे ऋत्वर्थहेमन्ता–दण् नवा तश्च लुग् नवा ।
हेमन्तजं च हैमन्तं, हैमन्तिकं च हैमनम् ॥ ९१ ॥

## प्रावृष एण्यः ॥ ६ ॥ ३ ॥ ९२ ॥

स्यादेण्यः प्रत्ययः शेषे, प्रावृष ऋतुवाचिनः ।
अगर्जन् वर्षति प्रायः, प्रावृषेण्यो बलाहकः ॥ ९२ ॥

## स्थामाजिनान्ताल्लुप् ॥ ६ ॥ ३ ॥ ९३ ॥

स्थामान्तादजिनान्ताच्च, शैषिकप्रत्ययस्य लुप् ।
अश्वत्थामाऽपि विक्रान्तः, सिंहाजिनो वृकाजिनः ॥९३॥

## तत्र कृतलब्धक्रीतसंभूते ॥ ६ ॥ ३ ॥ ९४ ॥

सप्तम्यन्तात् कृताद्यर्थे, यथायोगमणादयः ।
प्रत्यया एयणाद्याश्च, स्रौघ्नो वात्स्यश्च राष्ट्रियः ॥९४॥

## कुशले ॥ ६ ॥ ३ ॥ ९५ ॥

सप्तम्यन्ताद्यथायोगं, कुशले स्युरणादयः ।
स्यात् सुघ्ने कुशलः स्रौघ्न–स्तथा नादेयमाथुरौ ॥ ९५ ॥

---

......॥ ९१ ॥ ॥ ९२ ॥ ९३ ॥ यदन्येनोत्पादितं तत् कृतम् । यत्प्रतिग्रहादिना प्राप्तं तल्लब्धम् । यन्मूल्येन स्वीकृतं तत् क्रीतम् । यत् संभाव्यते संभाति वा तत् संभूतम् ॥ ९४ ॥ योगविभाग उत्तरार्थः ॥ ९५ ॥

## पथोऽकः ॥ ६ ॥ ३ ॥ ९६ ॥

सप्तम्यन्तात् पथिन्शब्दात्, कुशलेऽर्थे भवेदकः।
अणोऽपवादकश्चायं, पथकः कुशलः पथि ॥९६॥

## कोऽश्मादेः ॥ ६ ॥ ३ ॥ ९७ ॥

अश्मन्नित्यादितः सप्त-म्यन्तात् कः प्रत्ययो भवेत् ।
अणादेरपवादोऽसा-वश्मनि कुशलोऽश्मकः ॥ ९७ ॥

## जाते ॥ ६ ॥ ३ ॥ ९८ ॥

सप्तम्यन्ताद्यथायोगं, जातेऽर्थे स्युरणादयः ।
प्रत्यया एयणाद्याश्च, स्रौघ्नो वात्स्यश्च माथुरः ॥ ९८ ॥

## प्रावृष इकः ॥ ६ ॥ ३ ॥ ९९ ॥

प्रावृष्शब्दादिको जाते, सप्तम्यन्ताद् भवेत्ततः।
एण्यापवादकश्चायं, प्रावृषिकः प्रवर्षति ॥ ९९ ॥

## नाम्नि शरदोऽकञ् ॥ ६ ॥ ३ ॥ १०० ॥

सप्तम्यन्ताच्छरच्छब्दा-ज्जाते नाम्नि भवेदकञ्।
मुद्गाः शारदका दर्भाः, सस्यं भवति शारदम् ॥ १०० ॥

---

स्पष्टम् ॥९६॥ अश्मादय उपचारात्तद्विषयायां क्रियायां वर्तमानाः प्रत्ययमुत्पादयन्ति, तत्रैव कुशलार्थयोगात् ॥९७॥ स्वश्रमुत्पत्तिर्जातस्यार्थं इति कृतादिभ्यो भेदः ॥९८॥ स्पष्टम् ॥ ९९ ॥ ऋत्वणोऽपवादः ॥ १०० ॥

**सिन्ध्वपकरात् काणौ ॥ ६ ॥ ३ ॥ १०१ ॥**

सिन्धोरपकरात् काणौ, सप्तम्यन्तात्तु पूर्ववत् ।
सिन्धुकः सैन्धवश्चाप – करोऽपकरकस्तथा ॥ १०१ ॥

**पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्करादकः ॥ ६ ॥ ३ ॥ १०२ ॥**

सप्तम्यन्तेभ्य एभ्योऽकः, षड्भ्यो जातेऽपि नामनि ।
आर्द्रको मूलकश्चैव पूर्वाह्णकोऽपराह्णकः ॥ १०२ ॥

**पथः पन्थ च ॥ ६ ॥ ३ ॥ १०३ ॥**

सप्तम्यन्तात् पथोऽकः स्या–ज्जाते पन्थोऽस्य नामनि ।
पन्थकः पथि जातोऽसौ, यः पन्थानमभीप्सति ॥ १०३ ॥

**अश्च वामावास्यायाः ॥ ६ ॥ ३ ॥ १०४ ॥**

अको नाम्न्यश्च वामावा–स्याशब्दात् पूर्ववत्ततः ।
आमावास्यस्त्वमावास्यो–ऽमावास्यको यथायथम् ॥१०४॥

**श्रविष्ठाषाढादीयण् च ॥ ६ ॥ ३ ॥ १०५ ॥**

अषाढायाः श्रविष्ठायाः, नाम्नीयणश्च पूर्ववत् ।
श्राविष्ठीयः श्रवष्ठोऽषा–ढाषाढीयावुदाहृतिः ॥१०५॥

---

नाम्नीत्येव सैन्धवको मनुष्यः ॥ १०१ ॥ एवम् प्रदोषकः, अवस्कदकः ॥ १०२ ॥ स्पष्टम् ॥ १०३ ॥ एकदेशविकृतस्यानन्यत्वात् अमावस्याशब्दादपि भवति ॥ १०४ ॥ श्रविष्ठा धनिष्ठाः ॥ १०५ ॥

## फल्गुन्याष्टः ॥ ६ ॥ ३ ॥ १०६ ॥

जाते टः फल्गुनीशब्दात्, सप्तम्यन्तात्तु नामनि ।
फल्गुनः फल्गुनी नारी, केषाञ्चिदपि फाल्गुनः ॥१०६॥

## बहुलानुराधापुष्यार्थपुनर्वसुहस्तविशाखास्वातेर्लुप् ॥ ६ ॥ ३ ॥ १०७ ॥

सप्तम्यन्तेभ्य एभ्यो लुप्, भाणो जाते च नामनि ।
बहुलश्चानुराधश्च, पुष्यस्तिष्यः पुनर्वसुः ॥ १०७ ॥

## चित्रारेवतीरोहिण्याः स्त्रियाम् ॥ ६ ॥ ३ ॥ १०८ ॥

चित्रादिभ्यस्त्रियां नाम्नि, जाते भाणस्तु लुब् भवेत् ॥
रेवती रोहिणी चित्रा, चैत्ररैवतरौहिणाः ॥ १०८ ॥

## बहुलमन्येभ्यः ॥ ६ ॥ ३ ॥ १०९ ॥

श्रविष्ठाद्यन्यनक्षत्र-वाचिभ्यो नाम्नि लुब् भवेत् ।
जातेऽर्थे बहुलं भाणो-ऽभिजिदाभिजितोऽश्वयुक् ॥१०९॥

## स्थानान्तगोशालखरशालात् ॥ ६ ॥ ३ ॥ ११० ॥

गोशालखरशालाभ्यां, स्थानान्तान्नाम्नि लुब् भवेत् ।
प्रत्ययस्य तु जातेऽर्थे, गोशालो वीरशिष्यकः ॥ ११० ॥

---

स्पष्टम् ॥ १०६ ॥ एवम् हस्तः, विशाखः, स्वातिः ॥ १०७ ॥ स्पष्टम् ॥ १०८ ॥ एवम् अश्वयुजः, शतभिषक्, शातभिषजः, शातभिषः ॥ १०९ ॥ एवं गोस्थानः, खरशालः, लिङ्गविशिष्टस्यापि ग्रहणाद्गोस्थान्यामित्यादावपि तथा । शिष्यकः शिष्याभास इति ॥ ११० ॥

## वत्सशालाद्वा ॥ ६ ॥ ३ ॥ १११ ॥

वा वत्सशालतो नाम्नि, जातेऽर्थे प्रत्ययस्य लुप् ।
वत्सशालस्तथा वात्स–शालो जातस्ततो मतः ॥ १११ ॥

## सोदर्यसमानोदर्यौ ॥ ६ ॥ ३ ॥ ११२ ॥

समानोदर्य्यसोदर्य्यौ, जाते यान्तौ निपातितौ ॥
समानोदर्य्यसोदर्य्य–सगर्भसहजा अपि ॥ ११२ ॥

## कालाद् देय ऋणे ॥ ६ ॥ ३ ॥ ११३ ॥

सप्तम्यन्तादृणे देये, प्रत्ययः कालवाचिनः ।
स्याद्यथाविहितं तेन, मासिकमार्धमासिकम् ॥ ११३ ॥

## कलाप्यश्वत्थयवबुसोमाव्यासैषमसोऽकः ॥ ६ ॥ ३ ॥ ११४ ॥

कलापिमुखपश्चभ्यः, कालार्थेभ्यो भवेदृणे ।
देयेऽकः प्रत्ययः सप्त–म्यन्तेभ्यस्तत् कलापकम् ॥ ११४ ॥

---

स्पष्टे ॥ १११ ॥ ११२ ॥ नाम्नीति निवृत्तम् ॥ ११३ ॥ इकणादेरपवादः । यस्मिन् काले मयूराः केदाराः इक्षवः कलापिनो भवन्ति स कालस्तत्साहचर्यात् कलापी । यस्मिन् कालेऽश्वत्थाः फलन्ति स कालोऽश्वत्थफलसहचरितोऽश्वत्थः । यस्मिन् काले यवानां बुसं भवति स कालो यवबुसम् । उमा व्यस्यन्ते विक्षिप्यन्ते यस्मिन् स काल उमाव्यासः । ऐषमोऽस्मिन् संवत्सरे ॥ ११४ ॥

## ग्रीष्मावरसमाद्कञ् ॥ ६ ॥ ३ ॥ ११५ ॥

ग्रीष्मावरसमाभ्यां स्या-दणोऽकञ् पूर्ववत्ततः ।
ग्रीष्मे स्याद् ग्रैष्मकं देय-मावरसमकं तथा ॥ ११५ ॥

## संवत्सराग्रहायण्या इकण् च ॥ ६ ॥ ३ ॥ ११६ ॥

आभ्यां देये ऋणे सप्त-म्यन्ताभ्यां स्यादिकण् त्वकञ् ।
स्यात् सांवत्सरिकं सांव-त्सरकं पर्व सुन्दरम् ॥ ११६ ॥

## साधुपुष्प्यत्पच्यमाने ॥ ६ ॥ ३ ॥ ११७ ॥

पुष्यति पच्यमाने च, साधौ च प्रत्ययास्ततः ।
स्युर्यथाविहितं काल-वाचिनो हैमनं मधु ॥ ११७ ॥

## उप्ते ॥ ६ ॥ ३ ॥ ११८ ॥

स्याद् यथाविहितं तत्र, प्रत्ययः कालवाचिनः ।
उप्तेऽर्थे शारदा ग्रैष्मा, नैदाघा हैमना यवाः ॥ ११८ ॥

## आश्वयुज्या अकञ् ॥ ६ ॥ ३ ॥ ११९ ॥

अकञाश्वयुजीशब्दा - दुप्तेऽर्थे भवतीत्यतः ।
स्युराश्वयुजका माषाः, शरच्चन्द्रमरीचितः ॥ ११९ ॥

---

स्पष्टम ॥ ११५ ॥ एवम् आग्रहायणिकम्, आग्रहायणकम् ॥ ११६ ॥ एवम्-हैमन्तम्, हैमन्तिकम् । हेमन्ते साधु । वसन्ते पुष्यन्ति वासन्त्यः कुन्दलताः । शरदि पच्यन्ते शारदाः शालयः । ततः-सप्तम्यन्ततः ॥ ११७ ॥ स्पष्टम् ॥११८॥ इकणोऽपवादः ॥ ११९ ॥

## ग्रीष्मवसन्ताद्वा ॥ ६ ॥ ३ ॥ १२० ॥

आभ्यामृत्ते नवा सप्त – म्यन्ताभ्यां स्यादकञ् ततः ।
**ग्रैष्मग्रैष्मकवासन्त – वासन्तकानि** वीक्षताम् ॥ १२० ॥

## व्याहरति मृगे ॥ ६ ॥ ३ ॥ १२१ ॥

स्याद्यथाविहितं काल–विशेषात् प्रत्ययस्ततः ।
व्याहरति मृगे **नैशः**, शृगालो **नैशिको** मतः ॥ १२१ ॥

## जयिनि च ॥ ६ ॥ ३ ॥ १२२ ॥

स्याद्यथाविहितं तत्र, कालविशेषवाचिनः ।
जयिनि प्रत्ययो **नैशो, नैशिको वार्षिकस्तथा** ॥ १२२ ॥

## भवे ॥ ६ ॥ ३ ॥ १२३ ॥

स्युर्यथाविहितं सप्त–म्यन्तादणादयो भवे ।
एयणाद्याश्च **नादेय–स्रौघ्नग्रामीणराष्ट्रियाः** ॥ १२३ ॥

## दिगादिदेहांशाद्यः ॥ ६ ॥ ३ ॥ १२४ ॥

देहांशेभ्यो दिगादिभ्य–स्तत्र च यो भवेद्भवे ।
**दिश्यो वर्ग्यश्च मूर्धन्यो, दन्त्यो मुख्यश्च पद्यकः** ॥१२४॥

---

ऋत्वणोऽपवादः ॥ १२० ॥ मृग इति किम् ? वसन्ते व्याहरति कोकिलः ॥१२१॥ चकारः कालादित्यनुकर्षणार्थः, तेन चानुकृष्टत्वान्नोत्तरत्रानुवर्तते ॥१२२॥ सत्ता भवत्यर्थो गृह्यते न जन्म, जात इत्यनेन गतार्थत्वात् ॥ १२३ ॥ स्पष्टार्थं सूत्रत्रयम् ॥ १२४ ॥......

## नाम्न्युदकात् ॥ ६ ॥ ३ ॥ १२५ ॥

सप्तम्यन्ताच्च संज्ञाया–मुदकाद् यो भवेद्भवे ।
अनाम्नि त्वौदको मत्स्य, उदक्या स्त्री रजस्वला ॥१२५॥

## मध्याद् दिनण्णेया मोऽन्तश्च ॥ ६ ॥ ३ ॥ १२६ ॥

सप्तम्यन्ताद् दिनण्णेया, मोऽन्तश्च मध्यतो भवे ।
माध्यन्दिना भवा मध्ये, मध्यमीयाश्च माध्यमाः ॥१२६॥

## जिह्वामूलाङ्गुलेश्चेयः ॥ ६ ॥ ३ ॥ १२७ ॥

जिह्वामूलाङ्गुलिभ्यां च, मध्यादीयो भवेद्भवे ।
जिह्वामूलीयमध्यीया – ङ्गुलीयाः स्युः सलक्षणाः ॥ १२७ ॥

## वर्गान्तात् ॥ ६ ॥ ३ ॥ १२८ ॥

वर्गशब्दान्ततः सप्त – म्यन्तादीयो भवेद्भवे ।
कवर्गीयचवर्गीय – टवर्गीयादयस्ततः ॥ १२८ ॥

## ईनयौ चाशब्दे ॥ ६ ॥ ३ ॥ १२९ ॥

वर्गशब्दान्ततोऽशब्दे, सप्तम्यन्तात् स्त ईनयौ ।
भवार्थे पुनरीयश्च, रामवर्ग्यादयो यथा ॥ १२९ ॥

---

......१२५ ॥ १२६ ॥चकारेण मध्यशब्दानुकर्षणं मागमाभावार्थम् ॥ १२७ ॥ अणोऽपवादः ॥ १२८ ॥ एवं रामवर्गीणः, रामवर्गीयः, शब्दे तु कवर्गीय इत्येव ॥ १२९ ॥

## दृतिकुक्षिकलशिवस्त्यहेरेयण् ॥ ६ ॥ ३ ॥ १३० ॥

सप्तम्यन्तेभ्य एभ्योऽपि, स्यादेयण् प्रत्ययो भवे ।
दार्तेयाहेयकौक्षेय–वास्तेयकालशेयविद् ॥ १३० ॥

## आस्तेयम् ॥ ६ ॥ ३ ॥ १३१ ॥

एयणं प्रत्ययं कृत्वा, त्रिधाऽऽस्तेयं निपात्यते ।
धने वा विद्यमाने वा–ऽसृज्यास्तेयं भवं भवेत् ॥ १३१ ॥

## ग्रीवातोऽण् च ॥ ६ ॥ ३ ॥ १३२ ॥

अण् चैयण् प्रत्ययौ स्यातां, ग्रीवाशब्दाद्भवे ततः ।
स्याद् ग्रीवायां भवं ग्रैवं, ग्रैवेयकमनेकधा ॥ १३२ ॥

## चतुर्मासान्नाम्नि ॥ ६ ॥ ३ ॥ १३३ ॥

चतुर्मासाद्भवे नाम्नि, भवेदण्प्रत्ययस्ततः।
**आषाढी कार्तिकी चातु–र्मासी च फाल्गुनीरिता ॥ १३३ ॥**

## यज्ञे ञ्यः ॥ ६ ॥ ३ ॥ १३४ ॥

यज्ञे भवे चतुर्मास–शब्दाद् ञ्यः प्रत्ययो भवेत् ।
चातुर्मास्यानि जायन्ते, यज्ञकर्माणि कर्मिणाम् ॥ १३४ ॥

---

दार्तेयं जलम् , आहेयं विषम् , कौक्षेयो व्याधिः, वास्तेयं पुरीषम् , कालशेयं तक्रमिति ॥१३०॥ अस्तिशब्दात्तिवन्त–प्रतिरूपकादव्ययाद्धनविद्यमानपर्यायात्तद्भवे एयण्प्रत्ययो निपात्यते । असृज्शब्दस्य वास्त्यादेशश्चेति स्पष्टोऽर्थः ॥ १३१ ॥ देहांशयापवादः । ग्रैवेयमेव ग्रैवेयकम् । ग्रीवाशब्दो यदा शिरोधमनीवचनस्तदा तासां बहुत्वाद् बहुवचनम् ॥ १३२ ॥ अतिरोहितार्थकं सूत्रपञ्चकम् ॥ १३३ ॥ १३४ ॥......

## गम्भीरपञ्चजनबहिर्देवात् ॥ ६ ॥ ३ ॥ १३५ ॥

ञ्यः प्रत्ययो भवेऽर्थे स्या-द्गम्भीरादिचतुष्टयात् ।
गाम्भीर्यः पाञ्चजन्यश्च, बाह्यो दैव्यो यथायथम् ॥१३५॥

## परिमुखादेरव्ययीभावात् ॥ ६ ॥ ३ ॥ १३६ ॥

परिमुखादिशब्देभ्यो-ऽव्ययीभावेभ्य इष्यते ।
ञ्यः प्रत्ययो भवे तत्र, पारिमुख्यादयो यथा ॥१३६॥

## अन्तःपूर्वादिकण् ॥ ६ ॥ ३ ॥ १३७ ॥

अव्ययीभावतस्तत्र, भवेऽन्तःशब्दपूर्वतः ।
स्यादिकण् प्रत्ययः शेते, पुमानान्तरगारिकः ॥१३७॥

## पर्यनोर्ग्रामात् ॥ ६ ॥ ३ ॥ १३८ ॥

स्यादिकण् पर्यनोर्ग्रामा-दव्ययीभावतो भवे ।
तत् पारिग्रामिकश्चानु-ग्रामिको भावतोऽव्ययी ॥१३८॥

## उपाज्जानुनीविकर्णात् प्रायेण ॥ ६ ॥ ३ ॥ १३९ ॥

स्याज्जानुनीविकर्णेभ्यो-ऽव्ययीभावादुपादिकण् ।
प्रायस्तत्रभवे त्वौप-जानुकश्चौपनीविकम् ॥ १३९ ॥

---

......॥ १३५ ॥ १३६ ॥ १३७ ॥ अव्ययीभावादित्येव परिगतो ग्रामः परिग्रामस्तत्र भवः पारिग्रामः, आनुग्रामः ॥१३८॥ सेवक औपजानुकः । ग्रंवादाम, कार्षापणमौ-नीविकम् । सूचक औपकर्णिकः ॥ १३९ ॥

## रूढावन्तःपुरादिकः ॥ ६ ॥ ३ ॥ १४० ॥

क्वचिद्रूढाद्भवेदन्तः–पुरशब्दादिको भवे ।
अन्तःपुरे भवा नारी, स्यादन्तःपुरिका यथा ॥ १४० ॥

## कर्णललाटात् कल् ॥ ६ ॥ ३ ॥ १४१ ॥

कर्णललाटशब्दाभ्यां, भवेत् कल्प्रत्ययो भवे ।
समुदायस्य रूढत्वे, कर्णिका च ललाटिका ॥ १४१ ॥

## तस्य व्याख्याने च ग्रन्थात् ॥ ६ ॥ ३ ॥ १४२ ॥

व्याख्याने ग्रन्थतस्तस्य, तत्र च प्रत्ययो भवे ।
स्याद्यथाविहितं प्राति–पदिकीयं विभाव्यताम् ॥ १४२ ॥

## प्रायोबहुस्वरादिकण् ॥ ६ ॥ ३ ॥ १४३ ॥

प्रायो बहुस्वराद् ग्रन्थ–वाचिनस्तस्य तत्र च ।
व्याख्याने च भवेऽर्थेऽपि, स्यादिकण् षात्वणत्विकम् ॥१४३॥

## ऋद्‍गृद्विस्वरयागेभ्यः ॥ ६ ॥ ३ ॥ १४४ ॥

ऋद्‍गृद्विस्वरयागेभ्यो, ग्रन्थेभ्यः स्यादिकण् भवे ।
तत्र व्याख्यानकेऽप्यस्य, चातुर्होतृकमर्चिकम् ॥ १४४ ॥

---

स चायं रूढ एकपुरुषपरिग्रहे, स्त्रीसमुदाये, उपचारात्तन्निवासेऽपि ॥ १४० ॥ कर्णिका कर्णाभरणविशेषः, पद्मावयवश्च । ललाटिका ललाटमण्डनम् ॥१४१॥ एवम् कृतौ व्याख्यानं कृत्सु भवं वा कार्तमित्यादि ॥ १४२ ॥ प्रायोवचनात् क्वचिन्न भवति सांहितम् ॥ १४३ ॥ एवम् आह्निकम्, राजसूयिकम् ॥ १४४ ॥

## ऋषेरध्याये ॥ ६ ॥ ३ ॥ १४५ ॥

ग्रन्थार्थऋषिशब्देभ्यो, व्याख्याने तस्य तत्र च ।
भवेऽध्याये इकण् वाच्यो-ऽध्यायो वासिष्ठिको यथा ॥१४५॥

## पुरोडाशपौरोडाशादिकेकटौ ॥ ६ ॥ ३ ॥ १४६ ॥

स्त आभ्यां ग्रन्थवाचिभ्यां, व्याख्याने तस्य तत्र च ।
भवे त्विकेकटौ पौरो-डाशिकाद्या यथायथम् ॥१४६॥

## छन्दसो यः ॥ ६ ॥ ३ ॥ १४७ ॥

व्याख्याने तस्य यो वाच्य-श्छन्दसो ग्रथवाचिनः ।
तत्र भवे च विज्ञेय-श्छन्दस्यश्छन्दसो द्विधा ॥१४७॥

## शिक्षादेश्चाण् ॥ ६ ॥ ३ ॥ १४८ ॥

शिक्षादेश्छन्दसो ग्रन्थाद्, व्याख्याने तस्य तत्र च ।
भवेऽर्थेऽण् प्रत्ययः शैक्ष-च्छान्दसाग्रयना मताः ॥ १४८ ॥

## तत आगते ॥ ६ ॥ ३ ॥ १४९ ॥

अणाद्या एयणाद्याश्च, प्रत्ययास्तत आगते ।
स्युर्यथाविहितं स्रौघ्नः, कालेयो माथुरो यथा ॥ १४९ ॥

---

स्पष्टम् ॥ १४५ ॥ एवं पुरोडाशिकः, वचनभेदाद्यथासङ्ख्याभावः । इकेकटोः स्त्रियां विशेषः ॥ १४६ ॥ द्विस्वरेकणोऽपवादः ॥ १४७ ॥ अणग्रहणमीयबाधनार्थम् ॥ १४८ ॥ स्पष्टम् ॥ १४९ ॥

## विद्यायोनिसम्बन्धादकञ् ॥ ६ ॥ ३ ॥ १५० ॥

स्याद्विद्यायोनिसम्बन्ध–वाचिभ्यस्तत आगते ।
अकञ्चाचार्यकं पैता–महकं शौष्यकं यथा ॥ १५० ॥

## पितुर्यो वा ॥ ६ ॥ ३ ॥ १५१ ॥

पितृशब्दाद् नवा यः स्या–द्योनिसम्बन्धवाचिनः ।
पञ्चम्यन्ताद्यथोक्तार्थे, पित्र्यं पैतृकं धनम् ॥ १५१ ॥

## ऋत इकण् ॥ ६ ॥ ३ ॥ १५२ ॥

ऋकारान्तादिकण् विद्या–योनिसम्बन्धवाचिनः ।
स्यात्तत आगते दौहि–तृकं हौतृकमातृके ॥ १५२ ॥

## आयस्थानात् ॥ ६ ॥ ३ ॥ १५३ ॥

आयस्थानादिकण् वाच्यः, प्रत्ययस्तत आगते ।
आतरिकं तथा दौवा–रिकं च शौल्कशालिकम् ॥१५३॥

## शुण्डिकादेरण् ॥ ६ ॥ ३ ॥ १५४ ॥

भवेदण् शुण्डिकादिभ्यः, प्रत्ययस्तत आगते ।
शौण्डिकमौदपानञ्च, कार्कणं स्याद्यथायथम् ॥ १५४ ॥

---

अणोऽपवादः । ईयं तु परत्वाद् बाधते ॥ १५० ॥ इकणोऽपवादः ॥ १५१ ॥ अकञोऽपवादः ॥ १५२ ॥ एत्य तरन्त्यस्मिन्नित्यातरो नदीतीर्थम् ॥ १५३ ॥ स्पष्टम् ॥ १५४ ॥

## गोत्रादङ्कवत् ॥ ६ ॥ ३ ॥ १५५ ॥

अङ्क इवागते पञ्च-म्यन्ततो गोत्रवाचिनः ।
स्यात् प्रत्ययविधिर्वेदं, गार्गं हास्तिपदं यथा ॥ १५५ ॥

## नृहेतुभ्यो रूप्यमयटौ वा ॥ ६ ॥ ३ ॥ १५६ ॥

नृवाचिहेतुवाचिभ्यः, पञ्चम्यन्तेभ्य आगते ।
वा रूप्यमयटौ देव-दत्तरूप्यादयो मताः ॥ १५६ ॥

## प्रभवति ॥ ६ ॥ ३ ॥ १५७ ॥

स्युर्यथाविहितं पञ्च-म्यन्ततः प्रत्ययाः समे ।
आद्यप्रकाशमानेऽर्थे, गङ्गा हैमवती मता ॥१५७॥

## वैडूर्यः ॥ ६ ॥ ३ ॥ १५८ ॥

पञ्चम्यन्ताद् विडूराद् ञ्यः, प्रभवति निपात्यते ।
स्याद्वैडूर्यो मणिर्वालवायतः प्रभवन्नपि ॥१५८॥

---

एवम्, दाक्षम्, औपगवकः, कापटवकः, नाडायणकः, गार्ग्यायणकः, रैवतिकीयम्, गौरग्रीवीयम्, कापिञ्जलम् ॥ १५५ ॥ एवम्, देवदत्तमयम्, दैवदत्तम्, समरूप्यम्, सममयम्, विषमरूप्यम् विषममयम्, समीयम्, विषमीयम्, पापरूप्यम्, पापमयम्, पापीयमित्यादि ॥ १५६ ॥ एवं दारदी सिन्धुः, काश्मीरी वितस्ता ॥१५७॥ विडूरग्रामे ह्ययं संस्क्रियमाणो मणितया ततः प्रथमं प्रभवति। वालवायात्तु पर्वतादसौ प्रभवन्नसौ न मणिः, किन्तु पाषाणः। यदा तु जायमानतार्थः प्रभवशब्दस्तदा वालवायशब्दस्य ञ्यस्तत्संनियोगे विडूरादेशश्च निपात्यते। वालवायपर्याय एव वा विडूरशब्दः। प्रतिनियतविषयाश्च रूढय इति वैयाकरणानामेव प्रसिद्धिः, यथा जित्वरीशब्दस्य वाराणस्यां वणिजामेव। ॥१५८॥

## त्यदादेर्मयट् ॥ ६ ॥ ३ ॥ १५९ ॥

पञ्चम्यन्तत्यदादिभ्यः, प्रभवति भवेन् मयट् ।
तन्मयं तन्मयी नूनं, भवन्मयं भवन्मयी ॥१५९॥

## तस्येदम् ॥ ६ ॥ ३ ॥ १६० ॥

षष्ठ्यन्तादिदमित्यर्थे, स्युर्यथाविहितं हिताः ।
अणाद्या एयणाद्याश्च, कालेयं राष्ट्रियं यथा ॥ १६० ॥

## हलसीरादिकण् ॥ ६ ॥ ३ ॥ १६१ ॥

आभ्यां षष्ठ्यन्तशब्दाभ्या-मिदमर्थे भवेदिकण् ।
हालिकं हलसम्बन्धि, सीरस्येदं तु सैरिकम् ॥ १६१ ॥

## समिध आधाने टेन्यण् ॥ ६ ॥ ३ ॥ १६२ ॥

टेन्यण् तस्येदमित्यर्थे, आधाने समिधो भवेत् ।
मन्त्रः स्यात् सामिधेन्यश्च, सामिधेनी च ऋग् भवेत् ॥१६२॥

## विवाहे द्वन्द्वादकल् ॥ ६ ॥ ३ ॥ १६३ ॥

द्वन्द्वात्तस्येदमित्यर्थे, विवाहेऽर्थे भवेदकल् ।
भृग्वाङ्गिरसिका गर्ग-मार्गविका स्त्रियै च लः ॥ १६३ ॥

---

सूत्रचतुष्कं स्पष्टार्थम् ॥ १५९ ॥ १६० ॥ १६१ ॥ १६२ ॥ एवम् अत्रिभरद्वाजिका, वशिष्ठकश्यपिका, कुत्सकुशिकिका, कुरुवृष्णिका, कुरुकाशिकेत्यादि ॥ १६३ ॥

## अदेवासुरादिभ्यो वैरे ॥ ६ ॥ ३ ॥ १६४ ॥

द्वन्द्वात् षष्ठ्यन्ततो वैरे, देवासुरादिवर्जितात् ।
इदमर्थे त्वकल् काको-लूकिका श्वावराहिका ॥ १६४ ॥

## नटान्नृत्ते ञ्यः ॥ ६ ॥ ३ ॥ १६५ ॥

नृत्ते तस्येदमित्यर्थे, ञ्यो भवेन्नटशब्दतः ।
नाट्य नृत्त नटानांस्या-दन्यथा वाक्यमेव हि ॥ १६५ ॥

## छन्दोगौक्थिकयाज्ञिकबह्वृचाच्च धर्माम्नायसङ्घे ॥ ६ ॥ ३ ॥ १६६ ॥

धर्मादिके नटाच्छन्दो-गादेश्चरणतस्तथा ।
स्याद् ञ्यस्तस्येदमित्यर्थे, छान्दोग्यं नाट्यमीक्ष्यताम् ॥१६६॥

## आथर्वणिकादणिकलुक् च ॥ ६ ॥ ३ ॥ १६७ ॥

धर्मादावण् भवेदाथ-र्वणिकादिकलुक् तथा ।
कामं तस्येदमित्यर्थे, धर्म आथर्वणो यथा ॥ १६७ ॥

## चरणादकञ् ॥ ६ ॥ ३ ॥ १६८ ॥

अकञ् तयेस्दमित्यर्थे, भवेच्चरणवाचिनः ।
धर्मादौ काठकः काला-पकश्च पैप्पलादकः ॥ १६८ ॥

---

देवासुरम्. राक्षोऽसुरम्, प्रत्युदारणे ॥ १६४ ॥ स्पष्टम् ॥ १६५ ॥ एवम् औक्थिक्यम्. याज्ञिक्यम्. बाह्वृच्यम् ॥ १६६ ॥ चरणादकञि प्राप्ते वचनम् ॥ १६७ ॥ चरणशब्दो वेदशाखावचनस्तद्योगात्तदध्यायिषु वर्तते ॥ १६८ ॥

## गोत्राददण्डमाणवशिष्ये ॥ ६ ॥ ३ ॥ १६९ ॥

स्याद् गोत्रवाचिनो दण्ड–माणवशिष्यवर्जिते ।
अकञ् तस्येदमित्यर्थे, दाक्षकं प्लाक्षकं यथा ॥ १६९ ॥

## रैवतिकादेरीयः ॥ ६ ॥ ३ ॥ १७० ॥

ईयस्तस्येदमित्यर्थे, गोत्राद्रैवतिकादितः ।
शकटसङ्घमुख्यार्थे, रैवतिकीयमुच्यते ॥ १७० ॥

## कौपिञ्जलहास्तिपदादण् ॥ ६ ॥ ३ ॥ १७१ ॥

आभ्यां तस्येदमित्यर्थे, गोत्राभ्यामण् विधीयते ।
कौपिञ्जलं तथा हास्तिपदश्च शकटं यथा ॥ १७१ ॥

## सङ्घघोषाङ्कलक्षणेऽञ्यञिञः ॥ ६ ॥ ३ ॥ १७२ ॥

अञादित्रितयान्तादण्, सङ्घादौ गोत्रवाचिनः ।
भवेत् तस्येदमित्यर्थे, वैदो वैदं यथायथम् ॥ १७२ ॥

## शाकलादकञ् च ॥ ६ ॥ ३ ॥ १७३ ॥

शाकलशब्दतः स्यातां, सङ्घादौ प्रत्ययावकञ् ।
अण् च तस्येदमित्यर्थे, शाकलकश्च शाकलः ॥ १७३ ॥

---

दण्डप्रधानामाणवा दण्डमाणवाः आश्रमिणां रक्षापरिचरणार्थाः शिष्या अध्ययनार्था अन्तेवासिनः ॥ १६९ ॥ स्पष्टम् ॥ १७० ॥ अकञादेरपवादः ॥ १७१ ॥ अथाङ्कलक्षणयोः को विशेषः? लक्षणं लक्ष्यस्यैव स्वम्, यथा शिखादि, अङ्कस्तु-स्वामिविशेषविज्ञापकः, स्वस्तिकादिर्गवादिस्थो न गवादीनामेव स्वं भवति ॥ १७२ ॥ स्पष्टम् ॥ १७३ ॥

## गृहेऽग्नीधो रण् धश्च ॥ ६ ॥ ३ ॥ १७४ ॥

ऋत्विग्विशेषतोऽग्नीधो, गृहे रण् धश्च जायते ।
नूनंतस्येदमित्यर्थे, आग्नीध्रं गृहमिष्यते ॥ १७४ ॥

## रथात्सादेश्च वोढ्रङ्गे ॥ ६ ॥ ३ ॥ १७५ ॥

षष्ठ्यन्तादिदमर्थे यो, रथात् सादेश्च केवलात् ।
वोढ्रङ्गे तुरगो रथ्यो, रथ्यं चक्रं युगं तथा ॥ १७५ ॥

## यः ॥ ६ ॥ ३ ॥ १७६ ॥

षष्ठ्यन्तादिदमर्थे यो, रथात् सादेश्च केवलात् ।
योगविभागतोऽन्यस्मि-न्नर्थे न स्युरणादयः ॥ १७६ ॥

## पत्रपूर्वादञ् ॥ ६ ॥ ३ ॥ १७७ ॥

षष्ठ्यन्तादिदमर्थे स्या-द्रथाद् वाहनपूर्वकात् ।
अञ् विधिर्यापवादोऽयं, चक्रमाश्वरथं यथा ॥ १७७ ॥

## वाहनात् ॥ ६ ॥ ३ ॥ १७८ ॥

अञ्स्यात्तस्येदमित्यर्थे, शब्दाद्वहनवाचिनः ।
तत्तदेशे रथो दृष्ट, औष्ट्रो हास्तश्च रासभः ॥ १७८ ॥

---

तृतीयबाधनार्थं धादेशः ॥ १७४ ॥ सादि, द्वयो रथयो[redacted]द्विरथः; त्रिरथः । 'द्विगोरनपत्ये यस्वर—' ६-१-२[redacted]७५ ॥ स्पष्टे ॥ १७६ ॥ १७७ ॥ अणादेरपवादोऽयम् ॥ १७८ ॥

## वाह्यपथ्युपकरणे ॥ ६ ॥ ३ ॥ १७९ ॥

पथ्युपकरणे वाह्ये, वाहनादिदमर्थके ।
प्रत्ययः स्यान्न चान्यत्र, घासोऽश्वानामितीष्यते ॥ १७९ ॥

## वहेस्तुरिश्चादिः ॥ ६ ॥ ३ ॥ १८० ॥

वहेस्तृचस्तृनो वा य–स्तृशब्दः स्यात्तदन्ततः ।
अनुक्तेऽर्थे तुरिश्चादिः, सांवहित्रं विलोक्यताम् ॥ १८० ॥

## तेन प्रोक्ते ॥ ६ ॥ ३ ॥ १८१ ॥

स्युर्यथाविहितं प्रोक्ते, प्रत्ययास्तेन नामतः ।
उत्तराध्ययनानि स्यु – स्तद् भाद्रबाहवानि वै ॥ १८१ ॥

## मौदादिभ्यः ॥ ६ ॥ ३ ॥ १८२ ॥

स्याद्यथाविहितं मौदा–दिकेभ्यः प्रत्ययः पुनः ।
तेन प्रोक्ते ततो मौदा पैप्पलादाश्च जाजलाः ॥ १८२ ॥

## कठादिभ्यो वेदे लुप् ॥ ६ ॥ ३ ॥ १८३ ॥

कठादिभ्यः परं प्रोक्त–प्रत्ययो लुप्यते यदि ।
प्रोक्तो वेदो भवेद् विप्राः, कठाश्च चरका अपि ॥ १८३ ॥

---

नियमसूत्रमिदम् , तेनोक्तार्थे एवाञ् नान्यत्र ॥ १७९ ॥ स्पष्टम् ॥१८०॥ प्रकर्षेण व्याख्यातमध्यापितं वा प्रोक्तम्, नतु कृतम् ॥१८१॥ मौदादयः प्रयोगगम्याः ॥ १८२ ॥ काठादयः प्रयोगगम्याः ॥ १८३ ॥

## तित्तिरिवरतन्तुखण्डिकोखादीयण् ॥ ६ ॥ ३ ॥ १८४ ॥

तित्तिर्यादिचतुष्कात् स्या-दीयण् प्रोक्ते च तेन च ।
स वेदस्तैत्तिरीयास्ते, खाण्डिकीयाश्च भूसुराः ॥ १८४ ॥

## छगलिनो णेयिन् ॥ ६ ॥ ३ ॥ १८५ ॥

णेयिन् छगलिनस्तेन, प्रोक्ते वेदे विधीयते ।
प्रोक्तं छगलिना वेदं, वदन्ति छागलेयिनः ॥ १८५ ॥

## शौनकादिभ्यो णिन्॥ ६ ॥ ३ ॥ १८६ ॥

णिन् शौनकादितस्तेन, प्रोक्ते वेदे विधीयते ।
स्युः शाङ्गरविणः शौन-किनो वाजसनेयिनः ॥ १८६ ॥

## पुराणे कल्पे ॥ ६ ॥ ३ ॥ १८७ ॥

प्रोक्ते कल्पे पुराणे णिन्, प्रत्ययस्तेन जायते ।
प्रोक्तः पिङ्गेन पैङ्गी स्यात्, कल्पस्तद्वत् पुराणकः ॥ १८७ ॥

## काश्यपकौशिकाद्वेदवच्च ॥ ६ ॥ ३ ॥ १८८ ॥

काश्यपकौशिकाभ्यां णिन्, तेन प्रोक्ते विधीयते ।
कल्पादौ वेदवच्चास्मिन्, कार्य्ये काश्यपिनो यथा ॥ १८८ ॥

---

एवम् वारतन्तवीयाः, औखीया इति ॥ १८४ ॥ एवं येऽधीयते तेऽपि तथा ॥ १८५ ॥ शौनकादिराकृतिगणः । मन्त्रब्राह्मणं हि वेदः ॥ १८६ ॥ स्पष्टम् ॥ १८७ ॥ एवम् कौशिकिनः ॥ १८८ ॥

## शिलालिपाराशर्यान्नटभिक्षुसूत्रे ॥ ६ ॥ ३ ॥ १८९ ॥

आभ्यां णिन् नटसूत्रे च, भिक्षुसूत्रे क्रमात्तथा ।
शालालिनो नटाः पारा-शरिणो ननु भिक्षवः ॥ १८९ ॥

## कृशाश्वकर्मन्दादिन् ॥ ६ ॥ ३ ॥ १९० ॥

आभ्यामिन् नटसूत्रे च, भिक्षुसूत्रे च पूर्ववत् ।
नटाः कृशाश्विनः कर्म-न्दिनश्च भिक्षवो मताः ॥ १९० ॥

## उपज्ञाते ॥ ६ ॥ ३ ॥ १९१ ॥

उपज्ञाते तृतीयान्तात्, स्याद्यथाविहितं पुनः ।
प्रत्ययः पाणिनीयं स्या-द्व्याकरणमकालकम् ॥ १९१ ॥

## कृते ॥ ६ ॥ ३ ॥ १९२ ॥

स्युर्यथाविहितं तेन, कृतेऽर्थेऽणादयस्ततः ।
शिवेनोत्पादितश्शैवः, श्लोका जालूकजालुकाः ॥ १९२ ॥

## नाम्नि मक्षिकादिभ्यः ॥ ६ ॥ ३ ॥ १९३ ॥

स्याद्यथाविहितं नाम्नि, प्रत्ययो मक्षिकादितः ।
तेन कृते भवेत् क्षौद्रं, माक्षिकं सारघं तथा ॥ १९३ ॥

---

स्पष्टे ॥ १८९ ॥ ॥ १९० ॥ प्रथमत उपदेशेन विना ज्ञातमुपज्ञातम्, प्रथमतः कृतं वा उपज्ञातम् ॥१९१॥ स्पष्टम् ॥ १९२ ॥ नाम्नीति किम्? मक्षिकाभिः कृतं शकृत् ॥ १९३ ॥

## कुलालादेरकञ् ॥ ६ ॥ ३ ॥ १९४ ॥

कुलालादेरकञ् तेन, कृतेऽर्थे नाम्नि जायते ।
कुलालेन कृतं कौला-लकं वारुटकं तथा ॥ १९४ ॥

## सर्वचर्मण ईनेनञौ ॥ ६ ॥ ३ ॥ १९५ ॥

ईनेनञौ कृते तेन, नाम्नि स्तः सर्वचर्मणः ।
ततः स्यात् सर्वचर्मीणः, सार्वचर्मीण इत्यपि ॥ १९५ ॥

## उरसो याणौ ॥ ६ ॥ ३ ॥ १९६ ॥

उरसः प्रत्ययौ याणौ, नाम्नि तेन कृते ततः ।
औरसः संभवेद्रूय, उरस्यश्चोरसा कृतः ॥ १९६ ॥

## छन्दस्यः ॥ ६ ॥ ३ ॥ १९७ ॥

छन्दःशब्दात् कृते तेन, नाम्नि स्याद्यो निपातितः ।
छन्दसोत्पादितं तत्त-च्छन्दस्यमभिधीयते ॥ १९७ ॥

## अमोऽधिकृत्य ग्रन्थे ॥ ६ ॥ ३ ॥ १९८ ॥

स्याद्यथाविहितं ग्रन्थे-ऽमोऽधिकृत्य कृतेऽर्थके ।
प्रत्ययो भाद्रसौभद्र-सौतारा अधिकृत्य ताः ॥ १९८ ॥

---

नाम्नीत्यभिधेयनियमार्थम् ॥ १९४ ॥ सर्वश्चर्मणा कृत इति विग्रहे सर्वशब्दस्य कृतापेक्षत्वेऽपि चर्मशब्देनायोगिनाऽपि 'नामनाम्ना' -३-१-१८ इत्यादिना समासः ॥ १९५ ॥ स्पष्टे ॥ १९६ ॥ १९७ । अधिकृत्य प्रस्तुत्य उद्दिश्येत्यर्थः ॥ १९८ ॥

## ज्योतिषम् ॥ ६ ॥ ३ ॥ १९९ ॥

ज्योतिषोऽमोऽधिकृत्य स्यात्, कृते ग्रन्थेऽण् निपात्यते ।
वृद्ध्यभावश्च नयनं, ज्योतिषं को न मन्यते ॥ १९९ ॥

## शिशुक्रन्दादिभ्य ईयः ॥ ६ ॥ ३ ॥ २०० ॥

कृते ग्रन्थेऽधिकृत्यामः, शिशुक्रन्दादितो भवेत् ।
ईयो यमसमीयेन्द्र–जननीयादयो मताः ॥ २०० ॥

## द्वन्द्वात् प्रायः ॥ ६ ॥ ३ ॥ २०१ ॥

प्रायो ग्रन्थे कृते द्वन्द्वा–दीयश्चामोऽधिकृत्य तत् ।
रुचिर्व्याकरणे यत्तद्, वाक्यपदीयमीक्ष्यताम् ॥ २०१ ॥

## अभिनिष्क्रामति द्वारे ॥ ६ ॥ ३ ॥ २०२ ॥

अभिनिष्क्रामति द्वारे–ऽमो यथाविहितं भवेत् ।
प्रत्ययो माथुरं स्रौघ्नं, नादेयं राष्ट्रियं यथा ॥ २०२ ॥

## गच्छति पथि दूते ॥ ६ ॥ ३ ॥ २०३ ॥

गच्छत्यर्थे द्वितीयान्तात्, स्याद्यथाविहितं पथि ।
दूते च प्रत्ययः स्रौघ्नः, पन्था दूतोऽथवा मतः ॥ २०३ ॥

---

स्पष्टम् ॥ १९९ ॥ शिशुक्रन्दादयः प्रयोगतोऽनुसर्तव्याः ॥ २०० ॥ एवम् द्रव्यपर्यायीयम् । प्राय इति किम्? दैवासुरम् ॥ २०१ ॥ व्यक्तार्थं सूत्राणां पञ्चकम् ॥ २०२ ॥ २०३ ॥......

## भजति ॥ ६ ॥ ३ ॥ २०४ ॥

द्वितीयान्ताद्भजत्यर्थे, स्याद्यथाविहितं परः ।
प्रत्ययस्तेन नादेय-स्रौघ्नमाथुरराष्ट्रियाः ॥ २०४ ॥

## महाराजादिकण् ॥ ६ ॥ ३ ॥ २०५ ॥

द्वितीयान्तान्महाराजाद्, भजत्यर्थे भवेदिकण् ।
भजति यो महाराजं, स माहाराजिको मतः ॥ २०५ ॥

## अचित्तादृदेशकालात् ॥ ६ ॥ ३ ॥ २०६ ॥

अदेशकालतोऽचित्ताद्, द्वितीयान्ताद्भवेदिकण् ।
भजत्यर्थे भवेदापूपिकः पायसिकस्तथा ॥ २०६ ॥

## वासुदेवार्जुनादकः ॥ ६ ॥ ३ ॥ २०७ ॥

भजत्यर्थे द्वितीयान्ता-भ्यामाभ्यां संभवेदकः ।
अर्जुनं वासुदेवं वा-ऽर्जुनको वासुदेवकः ॥ २०७ ॥

## गोत्रक्षत्रियेभ्योऽकञ् प्रायः ॥ ६ ॥ ३ ॥ २०८ ॥

प्रायोऽमः स्याद्भजत्यर्थे, गोत्रक्षत्रियतस्त्वकञ् ।
ग्लौचुकायनको गार्ग्या-यणकः साहदेवकः ॥ २०८ ॥

---

......२०४ ॥ २०५ ॥ २०६ ॥ भजतीतिशेषः ॥ २०७ ॥

## सरूपाद् द्रेः सर्वं राष्ट्रवत् ॥ ६ ॥ ३ ॥ २०९ ॥

सरूपाद् द्रिस्तदन्तस्य, द्वितीयान्तस्य जायते ।
सर्वं हि भजतीत्यर्थे, राष्ट्रवद् वृजिकाङ्क्षौ ॥ २०९ ॥

## टस्तुल्यदिशि ॥ ६ ॥ ३ ॥ २१० ॥

सहार्थकतृतीयान्ता–त्तुल्यायां प्रत्ययो दिशि ।
स्याद्यथाविहितं विद्युत्, सौदामिन्येकदिक् ततः ॥ २१० ॥

## तसिः ॥ ६ ॥ ३ ॥ २११ ॥

तुल्यदिशि तृतीयान्तात्, तसिस्तु प्रत्ययो भवेत् ।
सूर्यतः पार्श्वतः पीलु–मूलतश्च सुदामतः ॥ २११ ॥

## यश्चोरसः ॥ ६ ॥ ३ ॥ २१२ ॥

उरसस्तुल्यदिश्यर्थे, तृतीयान्तात्तसिश्च यः ।
उरस्यश्चाथवोरस्तः, पयोधरः प्रवर्तते ॥ २१२ ॥

---

स्पष्टम् ॥ २०८ ॥ 'राष्ट्रक्षत्रियात्'–६–१–११४ इति प्रस्तुत्य सरूपाद्यो द्रिः प्रत्यय उक्तस्तदन्तस्य द्वितीयान्तस्य भजतीत्यर्थे सर्वं प्रत्ययः प्रकृतिश्च राष्ट्रवद्भवति । राष्ट्रवाचिनी या प्रकृतिर्वृजिइत्यादिस्ततश्च यः प्रत्ययो 'वृजि'–६–३–३७ इत्यादिना विहितस्तदुभयं वार्ज्य इत्येवमादेः सरूपस्य द्रिप्रत्ययान्तस्य भजतीत्यस्मिन् विषये-भवतीत्यर्थः ॥ २०९ ॥ ततस्तेनेत्यर्थः । सुदाम्ना पर्वतेनेति यावत् । सूर्येण सहैकदिक् सौरी बलाका । हिमवता एकदिग् हैमवती गङ्गा । त्रिककुदा एकदिक् त्रैककुदी लङ्का ॥ २१० ॥

## सेर्निवासादस्य ॥ ६ ॥ ३ ॥ २१३ ॥

प्रथमान्तान्निवासात् स्यात्, षष्ठ्यर्थे प्रत्ययः पुनः ।
तद् यथाविहितं स्रौघ्नो, नादेयो माथुरस्तथा ॥ २१३ ॥

## आभिजनात् ॥ ६ ॥ ३ ॥ २१४ ॥

आभिजनान्निवासात् स्यात्, प्रथमान्ताद्यथाविधि ।
षष्ठ्यर्थे प्रत्ययः स्रौघ्नो, नादेयो माथुरो यथा ॥ २१४ ॥

## शण्डिकादेर्ण्यः ॥ ६ ॥ ३ ॥ २१५ ॥

आभिजननिवासस्य, वाचितः शण्डिकादितः ।
ण्यः स्यात् सेरस्य शाण्डिक्यः, कौचवार्यो न वार्यते ॥२१५॥

## सिन्ध्वादेरञ् ॥ ६ ॥ ३ ॥ २१६ ॥

आभिजननिवासाभि-धायिसिन्ध्वादितो भवेत् ।
सेरस्याञ् प्रत्ययस्तेन, सैन्धवो वार्णवस्तथा ॥ २१६ ॥

## सलातुरादीयण् ॥ ६ ॥ ३ ॥ २१७ ॥

आभिजननिवासस्या-भिधायिनः सलातुरात् ।
सेरस्येयण् भवेत् साला-तुरीयः पाणिनिर्मुनिः ॥ २१७ ॥

---

स्पष्टम् ॥ २११ ॥ अणोऽपवादः ॥ २१२ ॥ स्पष्टम् ॥ २१३ ॥ अभिजनः पूर्वबान्धवाः तेषामयमाभिजनः इति ॥ २१४ ॥ सूत्रपञ्चकं स्पष्टार्थम् ॥ २१५ ॥ २१६ ॥ २१७ ॥ २१८ ॥ २१९ ॥

## तूदीवर्मत्या एयण् ॥ ६ ॥ ३ ॥ २१८ ॥

स्यादेयण् प्रथमान्ताभ्या–माभ्यामस्येति चार्थके ।
आभिजननिवासाभ्यां, तौदेयवार्मतेयकौ ॥ २१८ ॥

## गिरेरीयोऽस्त्राजीवे ॥ ६ ॥ ३ ॥ २१९ ॥

अस्त्राजीवे गिरेरीयः, षष्ठ्यर्थे प्रथमान्ततः ।
आभिजननिवासात् स्याद्, हृद्गोलीयश्च पार्थवः ॥ २१९ ॥

इति तृतीयपादः

## इकण् ॥ ६ ॥ ४ ॥ १ ॥

यावत् पादसमाप्तिं स्या–दिकणोऽधिकृतिस्त्वितः ।
त्यक्त्वाऽपवादविषयं, पूर्णोऽवधिरणो यतः ॥ १ ॥

## तेन जितजयद्दीव्यत्खनत्सु ॥ ६ ॥ ४ ॥ २ ॥

तृतीयान्तात् खनत्यर्थे, जिते जयति दीव्यति ।
इकण् स्यात् प्रत्ययो वित्त–माक्षिकं नैव तिष्ठति ॥ २ ॥

## संस्कृते ॥ ६ ॥ ४ ॥ ३ ॥

संस्कृतेऽर्थे तृतीयान्तात्, स्यादिकण् प्रत्ययस्ततः ।
दाधिकं संस्कृतं दध्ना, वैधिकः शाङ्गवेरिकम् ॥ ३ ॥

---

इति तृतीयपादः

स्पष्टम् ॥ १ ॥ अक्षैर्जयति दीव्यति आक्षिकः । अभ्र्या खनति आभ्रिकः । अभ्री काष्ठमयी तीक्ष्णाग्रा । इह तेनेति करणे तृतीया वेदितव्या नान्यत्रानभिधानात् ॥ २ ॥ योगविभाग उत्तरार्थः, सत उत्कर्षाधानं संस्कारः ॥ ३ ॥

## कुलत्थकोपान्त्यादण् ॥ ६ ॥ ४ ॥ ४ ॥

कुलत्थादथ कोपान्त्याद्, भवेदण् तेन संस्कृते ।
तैत्तिडीकं च कौलत्थं, दार्दुरूकं भवेद्यथा ॥ ४ ॥

## संसृष्टे ॥ ६ ॥ ४ ॥ ५ ॥

संसृष्टेऽर्थे तृतीयान्तात्, स्यादिकण् प्रत्ययस्ततः ।
संसृष्टं दाधिकं दध्ना, वैषिका शार्ङ्गवेरिकम् ॥ ५ ॥

## लवणादः ॥ ६ ॥ ४ ॥ ६ ॥

प्रत्ययस्तेन संसृष्टे, स्यादो लवणशब्दतः ।
जायते लवणः सूपो, यवागूर्लवणा तथा ॥ ६ ॥

## चूर्णमुद्गाभ्यामिनणौ ॥ ६ ॥ ४ ॥ ७ ॥

इनणौ चूर्णमुद्गाभ्यां, संसृष्टे भवतः क्रमात् ।
अपूपाश्चूर्णिनो धाना-श्चूर्णिन्यो मौद्ग ओदनः ॥ ७ ॥

## व्यञ्जनेभ्य उपसिक्ते ॥ ६ ॥ ४ ॥ ८ ॥

उपसिक्ते तृतीयान्ता-दिकण् व्यञ्जनवाचिनः ।
सौपिक ओदनः सूप-शाके घार्तिकतैलिके ॥ ८ ॥

---

इकणोऽपवादः ॥ ४ ॥ मिश्रणमात्रं संसर्ग इति पूर्वोक्तात् संस्कृताद्भेदः ॥ ५ ॥ लवणशब्दोऽत्र द्रव्यवाची ॥ ६ ॥ सूत्रचतुष्कं व्यक्तार्थम् ॥ ७ ॥ ८ ॥...

## तरति ॥ ६ ॥ ४ ॥ ९ ॥

तृतीयान्तात्तरत्यर्थे, स्यादिकण् प्रत्ययस्ततः ।
जना औडुपिकाः प्रायो, भवन्ति श्रमजीविनः ॥ ९ ॥

## नौद्विस्वरादिकः ॥ ६ ॥ ४ ॥ १० ॥

नौशब्दाद् द्विस्वरात्तेन, तरत्यर्थे भवेदिकः ।
तरति दृतिको दृत्या, नावा तरति नाविकः ॥ १० ॥

## चरति ॥ ६ ॥ ४ ॥ ११ ॥

तृतीयान्ताच्चरत्यर्थे, स्यादिकण् प्रत्ययस्ततः ।
चरति दाधिको दध्ना, हास्तिको हस्तिना तथा ॥ ११ ॥

## पर्पादेरिकट् ॥ ६ ॥ ४ ॥ १२ ॥

चरत्यर्थे तृतीयान्त–पर्पादिभ्यो भवेदिकट् ।
जनश्चरति पर्पेण, पर्पिकः स्त्री च पर्पिकी ॥ १२ ॥

## पदिकः ॥ ६ ॥ ४ ॥ १३ ॥

पादादिकट् चरत्यर्थे, तेनास्य पन्निपात्यते ।
नित्यं चरन्ति पादाभ्यां, पदिका मुनयस्ततः ॥ १३ ॥

---

......॥ ९ ॥ १० ॥ चरतिरिह गत्यर्थो भक्ष्यार्थश्च गृह्यते ॥ ११ ॥ पर्पादयः सप्त ॥ १२ ॥ स्पष्टम् ॥ १३ ॥

## श्वगणाद्वा ॥ ६ ॥ ४ ॥ १४ ॥

चरत्यर्थे तृतीयान्तात्, श्वगणात् स्यादिकङ् नवा ।
श्वगणिकस्तथा श्वाग–णिकः श्वगणिकी भवेत् ॥ १४ ॥

## वेतनादेर्जीवति ॥ ६ ॥ ४ ॥ १५ ॥

वेतनादेस्तृतीयान्ता–ज्जीवत्यर्थे भवेदिकण् ।
कलिकाले जनाः प्रायो, वैतनिका भवन्ति वै ॥ १५ ॥

## व्यस्ताच्च क्रयविक्रयादिकः ॥ ६ ॥ ४ ॥ १६ ॥

समस्ताद् व्यस्ततश्चातः, स्यादिकस्तेन जीवति ।
क्रयविक्रयिको विक्र–यिकश्च क्रयिकस्तथा ॥ १६ ॥

## वस्नात् ॥ ६ ॥ ४ ॥ १७ ॥

वस्नशब्दात्तृतीयान्ता–ज्जीवत्यर्थे भवेदिकः ।
वस्नं मूल्यं मतं तेन, जीवति वस्निको यथा ॥ १७ ॥

## आयुधादीयश्च ॥ ६ ॥ ४ ॥ १८ ॥

ईयेकौ प्रत्ययौ स्याता–मायुधात्तेन जीवति ।
आयुधीयस्तथैवायु–धिकश्चायुधिका यथा ॥ १८ ॥

---

'श्वादेरिती' ७–४–१० ति वान् प्रागौर्न भवति ॥ १४ ॥ वेतनादयोऽष्टाविंशतिः ॥ १५ ॥ स्पष्टे ॥ १६ ॥ १७ ॥ आयुधादिकेकणोः स्त्रियां विशेषः ॥ १८ ॥

## व्रातादीनञ् ॥ ६ ॥ ४ ॥ १९ ॥

व्रातशब्दाद्भवेदीनञ्, प्रत्ययस्तेन जीवति ।
नरा व्रातेन जीवन्ति, व्रातीना अकृतव्रता ॥ १९ ॥

## निर्वृत्तेऽक्षद्यूतादेः ॥ ६ ॥ ४ ॥ २० ॥

अक्षद्यूतादितस्तेन, निर्वृत्तेऽर्थे भवेदिकण् ।
अक्षद्यूतेन निर्वृत्त-माक्षद्यूतिकमुच्यते ॥ २० ॥

## भावादिमः ॥ ६ ॥ ४ ॥ २१ ॥

स्यादिमस्तेन निर्वृत्ते, प्रत्ययो भाववाचिनः ।
पाकिमं सेकिमं संमू-च्छिमं च त्यागिमं तथा ॥ २१ ॥

## याचितापमित्यात् कण् ॥ ६ ॥ ४ ॥ २२ ॥

कण्प्रत्ययो भवेदाभ्यां, निर्वृत्ते तेन याच्ञया ।
याचितेन च निर्वृत्तं, याचितकं न मण्डनम् ॥ २२ ॥

## हरत्युत्सङ्गादेः ॥ ६ ॥ ४ ॥ २३ ॥

उत्सङ्गादेस्तृतीयान्ताद्, हरत्यर्थे भवेदिकण् ।
औत्सङ्गिकस्तथैवौत्त्रु-पिकश्चौडुपिकस्तथा ॥ २३ ॥

---

नानाजातीया अनियतवृत्तयः शरीरायासा जीविनः सङ्घा व्राताः, तत्साहचर्यात् तत्कर्मापि व्रातम् ॥ १९ ॥ अक्षद्यूतादयः सप्तदश ॥ २० ॥ स्पष्टम् ॥ २१ ॥

अपमित्येति यबन्तम्, अपमित्य प्रतिदानेन निर्वृत्तमापमित्यकम् ॥ २२ ॥
उत्सङ्गादयः सप्त ॥ २३ ॥

## भस्त्रादेरिकट् ॥ ६ ॥ ४ ॥ २४ ॥

हरत्यर्थे तृतीयान्त-भस्त्रादिभ्यो भवेदिकट् ।
भस्त्रादयो नव प्रोक्ता, भस्त्रिको भस्त्रिकी यथा ॥ २४ ॥

## विवधवीवधाद्वा ॥ ६ ॥ ४ ॥ २५ ॥

इकट् तेन हरत्यर्थे, विवधाद् वीवधाच्च वा ।
विवधिकस्तथा वीव-धिको वैवधिकस्तथा ॥ २५ ॥

## कुटिलिकाया अण् ॥ ६ ॥ ४ ॥ २६ ॥

अण् स्यात्तेन हरत्यर्थे, कुटिलिकेतिशब्दतः ।
कौटिलिकश्च कर्मारो, मृगश्चौरश्च कर्षकः ॥ २६ ॥

## ओजः सहोम्भसो वर्तते ॥ ६ ॥ ४ ॥ २७ ॥

ओजःसहोऽम्भसस्तेन, वर्ततेऽर्थे भवेदिकण् ।
औजसिकस्तथा साह-सिकश्चाम्भसिकस्तथा ॥ २७ ॥

## तं प्रत्यनोर्लोमेपकूलात् ॥ ६ ॥ ४ ॥ २८ ॥

इकण् तं प्रत्यनोर्लोमे-पकूलाद्वर्ततेऽर्थतः ।
प्रातिलोमिक प्रातीपि-कान्वीपिकानुकूलिकाः ॥ २८ ॥

---

स्पष्टम् ॥ २४ ॥ विवधवीवधशब्दौ समानार्थौ पथिपर्याहारे च वर्तेते ॥ २५ ॥ स्पष्टम् ॥ २६ ॥ वृत्तिरात्मनिर्यापना चेष्टा वा ॥ २७ ॥ एवम् आनुलोमिकः, प्रातिकूलिकः । तमिति-पुल्लिङ्गनिर्देशोऽसन्देहार्थः ॥ २८ ॥

## परेर्मुखपार्श्वात् ॥ ६ ॥ ४ ॥ २९ ॥

वर्ततेऽर्थे द्वितीयान्तान्मुखपार्श्वात् परेरिकण् ।
स्यात् पारिमुखिकः पारि–पार्श्विकः सेवकः परः ॥ २९ ॥

## रक्षदुञ्छतोः ॥ ६ ॥ ४ ॥ ३० ॥

रक्षत्युञ्छति चार्थे च, द्वितीयान्ताद्भवेदिकण् ।
बादरिकस्तदुच्चेता, सामाजिकः समाजपः ॥ ३० ॥

## पक्षिमत्स्यमृगार्थाद् घ्नति ॥ ६ ॥ ४ ॥ ३१ ॥

पक्षिमत्स्यमृगार्थेभ्य–स्तं घ्नत्यर्थे भवेदिकण् ।
पाक्षिको मात्सिको मार्गि–को मायूरिकमैनिकौ ॥ ३१ ॥

## परिपन्थात्तिष्ठति च ॥ ६ ॥ ४ ॥ ३२ ॥

तिष्ठति घ्नति चार्थे तं, परिपन्थाद्भवेदिकण् ।
तिष्ठति परिपन्थं वा, हन्ति वा पारिपन्थिकः ॥ ३२ ॥

## परिपथात् ॥ ६ ॥ ४ ॥ ३३ ॥

परिपथाद् द्वितीयान्तात्, तिष्ठत्यर्थे भवेदिकण् ।
स पारिपथिको व्याप्य, त्यक्त्वा मार्गं च तिष्ठति ॥ ३३ ॥

---

परिवर्जने सर्वतोभावे वा ॥ २९ ॥ स्पष्टम् ॥ ३० ॥ अर्थग्रहणात् तत्पर्यायेभ्यो विशेषेभ्यश्च भवति ॥ ३१ ॥ स्पष्टे ॥ ३२ ॥ ३३ ॥

## अवृद्धेर्गृह्णाति गर्ह्ये ॥ ६ ॥ ४ ॥ ३४ ॥

गृह्णत्यर्थे द्वितीयान्ताद्, गर्ह्येऽवृद्धेरिकण् भवेत् ।
द्वैगुणिकस्तथा त्रैगु-णिको वार्धुषिकोऽधमः ॥ ३४ ॥

## कुसीदादिकट् ॥ ६ ॥ ४ ॥ ३५ ॥

गृह्णत्यर्थे द्वितीयान्ता-दिकट् गर्ह्ये कुसीदतः ।
यद्गृह्णाति कुसीदं तत्, कुसीदिकः कुसीदिकी ॥ ३५ ॥

## दशैकादशादिकश्च ॥ ६ ॥ ४ ॥ ३६ ॥

दशैकादशतो गर्ह्ये, गृह्णति तमिकेकटौ ।
दशैकादशिको यद्व-द्दशैकादशिका तथा ॥ ३६ ॥

## अर्थपदपदोत्तरपदललामप्रतिकण्ठात् ॥ ६ ॥ ४ ॥ ३७ ॥

अर्थात् पदाल्ललामाच्च, पदोत्तरपदादिकण् ।
प्रतिकण्ठाद् द्वितीयान्ताद्, गृह्णति प्रातिकण्ठिकः ॥ ३७ ॥

## परदारादिभ्यो गच्छति ॥ ६ ॥ ४ ॥ ३८ ॥

गच्छत्यर्थे द्वितीयान्त-परदारादितस्त्विकण् ।
स्यात् पारदारिको गौरु-दारिको गौरुतल्पिकः ॥ ३८ ॥

---

अवृद्धेरिति किं वृद्धिं गृह्णातीति वाक्यमेव । गर्ह्य इति किम्; दत्तं गृह्णाति ॥ ३४ ॥ स्पष्टम् ॥ ३५ ॥ एवम् दशैकादशिकी ॥ ३६ ॥ एवम् आर्थिकः, पादिकः, पौर्वपदिकः, औत्तरपदिकः, आदिपदिकः, आन्तपदिकः, लालमिकः ॥३७॥ परदाराद्यः प्रयोगगम्याः ॥ ३८ ॥

## प्रतिपथादिकश्च ॥ ६ ॥ ४ ॥ ३९ ॥

गच्छत्यर्थे द्वितीयान्तात्, प्रतिपथादिकेकणौ ।
स्यात् प्रतिपाथिकः प्राति-पथिको नोत्पथाश्रितः ॥ ३९ ॥

## माथोत्तरपदपदव्याक्रन्दाद्धावति ॥ ६ ॥ ४ ॥ ४० ॥

माथोत्तरपदादाक्र-न्दात् पदव्याश्च धावति ।
इकणाक्रान्दिकः पाद-विकश्च दाण्डमाथिकः ॥ ४० ॥

## पश्चात्यनुपदात् ॥ ६ ॥ ४ ॥ ४१ ॥

धावत्यर्थे भवेत् पश्चा-दर्थकानुपदादिकण् ।
सम्यगाचरितो धर्मः, सदानुपदिको भवेत् ॥ ४१ ॥

## सुस्नातादिभ्यः पृच्छति ॥ ६ ॥ ४ ॥ ४२ ॥

स्याद् द्वितीयान्तसुस्नाता-दिकेभ्यः पृच्छति त्विकण् ।
नूपुरपण्डिता सौस्ना-तिकेनावर्जिता भृशम् ॥ ४२ ॥

## प्रभूतादिभ्यो ब्रुवति ॥ ६ ॥ ४ ॥ ४३ ॥

प्रभूतादेर्द्वितीयान्ता-द्ब्रुवत्यर्थे भवेदिकण् ।
नैपुणिको भवेन्मन्त्री, प्राभूतिको भवेद्वणिक् ॥ ४३ ॥

---

स्पष्टम् ॥ ३९ ॥ तमित्यनुवर्तते ॥ ४० ॥ स्पष्टम् ॥ ४१ ॥ सुस्नातादयः प्रयोगगम्याः ॥ ४२ ॥ प्रभूतादयः प्रयोगगम्याः ॥ ४३ ॥

## माशब्द इत्यादिभ्यः ॥ ६ ॥ ४ ॥ ४४ ॥

इकण् माशब्द इत्यादि-केभ्यो भवति जायते ।
माशब्दिकस्तथा कार्य-शब्दिको नैत्यशब्दिकः ॥ ४४ ॥

## शाब्दिकदार्दरिकलालाटिककौकुटिकम् ॥ ५ ॥ ४ ॥ ४५ ॥

इकणन्ता निपात्यन्ते, यथास्वं शाब्दिकादयः ।
प्रसिद्धेऽर्थविशेषे स्याद्, दार्दरिकश्च शाब्दिकः ॥ ४५ ॥

## समूहार्थात् समवेते ॥ ६ ॥ ४ ॥ ४६ ॥

द्वितीयान्तात् समूहार्थात्, समवेते भवेदिकण् ।
सामूहिकस्तथा सामा-जिकश्च सामवायिकः ॥ ४६ ॥

## पर्षदो ण्यः ॥ ६ ॥ ४ ॥ ४७ ॥

ण्यः प्रत्ययो द्वितीयान्तात्, समवेते तु पर्षदः ।
पर्षदं समवैतीति, पार्षद्यश्चतुरो भवेत् ॥ ४७ ॥

## सेनाया वा ॥ ६ ॥ ४ ॥ ४८ ॥

समवेते द्वितीयान्त-सेनाया ण्यो भवेन्नवा ।
सैन्यश्च सैनिकः प्रायः, प्राप्नोति नैव सद्गतिम् ॥ ४८ ॥

---

इतिशब्दो वाक्यपरामर्शार्थः । वाक्यात् प्रत्ययविधानार्थं वचनम् । एते प्रयोगगम्याः ॥ ४४ ॥ एवं लालाटिकः, कौक्कुटिकः ॥ ४५ ॥ तादात्म्यात् तदेकदेशीभूतं समवेतम् ॥ ४६ ॥ स्पष्टे ॥ ४७ ॥ ४८ ॥

## धर्माधर्माच्चरति ॥ ६ ॥ ४ ॥ ४९ ॥

इकण् चरति तं धर्मा-धर्माभ्यां प्रत्ययो भवेत् ।
चरत्याधर्मिकोऽधर्मं, धर्मं चरति धार्मिकः ॥ ४९ ॥

## षष्ठ्या धर्म्ये ॥ ६ ॥ ४ ॥ ५० ॥

षष्ठ्यन्तान्नु धर्म्येऽर्थे, प्रत्ययस्तु भवेदिकण् ।
आपणिकं तथा शौल्क-शालिकं गौल्मिकं तथा ॥ ५० ॥

## ऋन्नरादेरण् ॥ ६ ॥ ४ ॥ ५१ ॥

धर्म्ये षष्ठ्यन्ततः स्यादण्, ऋदन्ताच्च नरादितः ।
नारं नारी तथा मात्रं, पैत्रं शास्त्रं च माहिषम् ॥ ५१ ॥

## विभाजयितृविशसितुर्णीड् लुक् च ॥ ६ ॥ ४ ॥ ५२ ॥

षष्ठ्यन्ताभ्यां भवेदाभ्या-मण् धर्म्ये लुक् च णेरिटः ।
वैभाजित्रं च वैशस्त्रं, तयोर्धर्म्यं यथायथम् ॥ ५२ ॥

## अवक्रये ॥ ६ ॥ ४ ॥ ५३ ॥

स्यादिकण् प्रत्ययो नाम्नः, षष्ठ्यन्तान्नवक्रये ।
आपणिकस्तथा शौल्कशालिको गौल्मिकस्तथा ॥ ५३ ॥

---

चरतिस्तात्पर्येणानुष्ठाने ॥ ४९ ॥ धर्मो न्यायोऽनुवृत्त आचारः, तस्मादनपेतं धर्म्यम् ॥ ५० ॥ नरादयः षोडश ॥ ५१ ॥ स्पष्टम् ॥ ५२ ॥ भाटकमवक्रयः, स च लोकपीडया धर्मातिक्रमेणापि भवतीत्ययं धर्म्याद् भिद्यते ॥ ५३ ॥

## तदस्य पण्यम् ॥ ६ ॥ ४ ॥ ५४ ॥

तच्चेत् पण्यमिकण् शब्दात्, षष्ठ्यर्थे प्रथमान्ततः ।
आपूपिकस्तथा मौद-किको लावणिकस्तथा ॥ ५४ ॥

## किशरादेरिकट् ॥ ६ ॥ ४ ॥ ५५ ॥

तदस्य पण्यमित्यर्थे किशरादेर्भवेदिकट् ।
किशरिकोऽस्य विक्रेता, नारी किशरिकी तथा ॥ ५५ ॥

## शलालुनो वा ॥ ६ ॥ ४ ॥ ५६ ॥

तदस्य पण्यमित्यर्थे, स्यादिकड् वा शलालुनः ।
शलालु पण्यमस्येति, शालालुकः शलालुकः ॥ ५६ ॥

## शिल्पम् ॥ ६ ॥ ४ ॥ ५७ ॥

तदस्य शिल्पमित्यर्थे, प्रथमान्ताद्भवेदिकण् ।
नार्तिको गैतिको वाद-निको मार्दङ्गिकस्तथा ॥ ५७ ॥

## मड्डुकझर्झराद्वाण् ॥ ६ ॥ ४ ॥ ५८ ॥

तदस्य शिल्पमित्यस्मि-न्नण् वा मड्डुकझर्झरात् ।
माड्डुको झार्झरो झार्झ-रिको माड्डुकिकस्तथा ॥ ५८ ॥

---

स्पष्टम् ॥ ५४ ॥ किशरादयो दश गन्धद्रव्यविशेषवचनाः ॥ ५५ ॥ एवं शलालुकी ॥ ५६ ॥ शिल्पं कौशलं विज्ञानप्रकर्षः ॥ ५७ ॥ स्पष्टम् ॥ ५८ ॥

## शीलम् ॥ ६ ॥ ४ ॥ ५९ ॥

तदस्य शीलमित्यर्थे, स्यादिकण् प्रथमान्ततः ।
अपूपभक्षणं शील–मस्यापूपिक उच्यते ॥ ५९ ॥

## अङ्स्थाच्छत्रादेरञ् ॥ ६ ॥ ४ ॥ ६० ॥

अङन्तात्तिष्ठतेः छत्रा–दिभ्यश्चाञ्प्रत्ययो भवेत् ।
तदस्य शीलमित्यस्मि–न्नास्थश्छात्रश्च तापसः ॥ ६० ॥

## तूष्णीकः ॥ ६ ॥ ४ ॥ ६१ ॥

तदस्य शीलमित्यर्थे, तूष्णीमः को निपात्यते ।
मस्य लोपश्च तूष्णीका, साहस्येकादशी सिता ॥ ६१ ॥

## प्रहरणम् ॥ ६ ॥ ४ ॥ ६२ ॥

प्रहरणं तदस्येति, स्यादिकण् प्रथमान्ततः ।
आसिकः प्रासिको मौद्ग–लिकश्चाक्रिकमौष्टिकौ ॥६२॥

## परश्वधाद्वाण् ॥ ६ ॥ ४ ॥ ६३ ॥

प्रहरणं तदस्येति, भवेदण् वा परश्वधात् ।
स्यात् पारश्वधिकः पार–श्वधो वै भृगुनन्दनः ॥ ६३ ॥

---

शीलं प्राणिनां स्वभावः, फलनिरपेक्षा प्रवृत्तिरिति यावत् ॥ ५९ ॥ स्त्रियां छात्री इत्यादि ॥ ६० ॥ तूष्णींभावः शीलमस्या इति तूष्णीका मौनीति यावत् । मार्गशीर्षशुक्लैकादशी ॥ ६१ ॥ अनेन तु व्यापाराभावेऽपि परिज्ञानमात्रे प्रत्ययः ॥ ६२ ॥ स्पष्टम् ॥ ६३ ॥

## शक्तियष्टेष्टीकण् ॥ ६ ॥ ४ ॥ ६४ ॥

प्रहरणं तदस्येति, टीकण् शक्तेश्च यष्टितः ।
स्यातां शाक्तीकशाक्तीक्यौ, स्याद्याष्टीकश्च शाक्तिकः ॥६४॥

## वेष्टयादिभ्यः ॥ ६ ॥ ४ ॥ ६५ ॥

प्रहरणं तदस्येति, टीकणिष्टयादितो नवा ।
ऐष्टीकश्चैष्टिकश्चैष्टी-की चैषीकी तथैषिकः ॥ ६५ ॥

## नास्तिकास्तिकदैष्टिकम् ॥ ६ ॥ ४ ॥ ६६ ॥

इकणन्ता निपात्यन्ते, नास्तिकास्तिकदैष्टिकाः ।
विषये च तदस्येति, रूढ्यर्थं हि निपातनम् ॥ ६६ ॥

## वृत्तोऽपपाठोऽनुयोगे ॥ ६ ॥ ४ ॥ ६७ ॥

अनुयोगेऽपपाठश्चेद्, वृत्तस्तत्प्रथमान्ततः ।
षष्ठ्यर्थे स्यादिकणैका-न्यिको द्वैयन्यिकस्तथा ॥६७॥

## बहुस्वरपूर्वादिकः ॥ ६ ॥ ४ ॥ ६८ ॥

प्रथमान्तादिकः पूर्व-बह्वहुस्वरपूर्वतः ।
एकादशान्यिको द्वाद-शान्यिको द्वादशान्यिका ॥६८॥

---

शाक्तिक इति वेतनादीकणा भविष्यति ॥ ६४ ॥ इष्टादयः प्रयोगगम्याः ॥ ६५ ॥ स्पष्टम् ॥ ६६ ॥ अधिकमत्रत्यं बृहद्वृत्तेरवसेयम् ॥ ६७ ॥ ६८ ॥

## भक्ष्यं हितमस्मै ॥ ६ ॥ ४ ॥ ६९ ॥

प्रथमान्ताच्चतुर्थ्यर्थे, हिते भक्ष्ये भवेदिकण् ।
हितं भक्ष्यमपूपाश्च – दस्मायापूपिकस्ततः ॥ ६९ ॥

## नियुक्तं दीयते ॥ ६ ॥ ४ ॥ ७० ॥

नियुक्तं दीयते चास्मै, स्यादिकण् प्रथमान्ततः ।
आग्रभोजनिकश्चापू–पिकश्रामिकमांसिकाः ॥ ७० ॥

## श्राणामांसौदनादिको वा ॥ ६ ॥ ४ ॥ ७१ ॥

श्राणामांसौदनाभ्यां वा, पूर्ववच्च भवेदिकः ।
श्राणिकः श्राणिका मांसो-दनिकः श्राणिकी तथा ॥७१॥

## भक्तौदनाद्वाणिकट् ॥ ६ ॥ ४ ॥ ७२ ॥

क्रमाद्भक्तौदनाभ्यां स्तो–ऽणिकटौ पूर्ववन्नवा ।
ओदनिकस्तथा भाक्त–स्त्वोदनिकी च भाक्तिकः ॥७२॥

## नवयज्ञादयोऽस्मिन् वर्तन्ते ॥ ६ ॥ ४ ॥ ७३ ॥

अस्मिन् वर्तन्त इत्यर्थे, नवयज्ञादितस्त्विकण् ।
स्यात् प्रथमान्ततो नाव–यज्ञिकः पालयज्ञिकः ॥७३॥

---

हितार्थो भक्षणक्रिया च तद्धितवृत्तावेवान्तर्भवति ॥ ६९ ॥ अस्मै इत्येव रजकस्य वस्त्रं नित्यं दीयते, अर्प्यत इत्यर्थः ॥ ७० ॥ इकेकणोः स्त्रियां विशेषः ॥ ७१ ॥ स्पष्टम् ॥ ७२ ॥ नवयज्ञादयः प्रयोगगम्याः ॥ ७३ ॥

## तत्र नियुक्ते ॥ ६ ॥ ४ ॥ ७४ ॥

सप्तम्यन्तान्नियुक्तेऽर्थे, स्यादिकण् प्रयत्यस्ततः ।
आक्षपाटलिको दौव-रिकश्च शौल्कशालिकः ॥७४॥

## अगारान्तादिकः ॥ ६ ॥ ४ ॥ ७५ ॥

सप्तम्यन्तान्नियुक्तेऽर्थे-ह्यगारान्ताद्भवेदिकः ।
आयुधागारिकाद्द्वागारिकाऽत्र विशिष्यते ॥ ७५ ॥

## अदेशकालादध्यायिनि ॥ ६ ॥ ४ ॥ ७६ ॥

स्यात् सप्तम्यन्ततोऽध्यायि-न्यदेशकालवाचिनः ।
इकण्णाशुचिकः श्माशा-निकस्तथैव सान्ध्यिकः ॥७६॥

## निकटादिषु वसति ॥ ६ ॥ ४ ॥ ७७ ॥

निकटादेर्वसत्यर्थे, सप्तम्यन्ताद्भवेदिकण् ।
नैकटिकस्तथा वार्क्ष-मूलिकाभ्यवकाशिकौ ॥ ७७ ॥

## सतीर्थ्यः ॥ ६ ॥ ४ ॥ ७८ ॥

समानतीर्थतस्तत्र, वसति यो निपात्यते ।
समानस्य सभावश्च, सतीर्थ्यौ भीष्मभास्करी ॥ ७८ ॥

---

नियुक्तोऽधिकृतो व्यापारित इत्यर्थः ॥ ७४ ॥ स्पष्टे ॥ ७५ ॥ ७६ ॥ निकटादयः प्रयोगगम्याः ॥ ७७ ॥ तीर्थमिह गुरुरुच्यते ॥ ७८ ॥

**प्रस्तारसंस्थानतदन्तकठिनान्तेभ्यो व्यवहरति ॥ ६ ॥ ४ ॥ ७९ ॥**

इकण् प्रस्तारसंस्थान–तदन्तकठिनान्ततः ।
भवेद्व्यवहरत्यर्थे, ततः प्रास्तारिकादयः ॥ ७९ ॥

**सङ्ख्यादेश्चार्हदलुचः ॥ ६ ॥ ४ ॥ ८० ॥**

केवलायाश्च सङ्ख्यादेः, प्रकृतेः प्रत्ययोऽलुचः ।
वक्ष्यमाण इतश्चार्ह–दर्थादा परिकीर्तितः ॥ ८० ॥

**गोदानादीनां ब्रह्मचर्ये ॥ ६ ॥ ४ ॥ ८१ ॥**

इकण् षष्ठ्यन्तगोदाना–दिभ्यः स्याद्ब्रह्मचर्यके ।
गौदानिकं तथाऽऽदित्य–व्रतिकं ब्रह्मचर्यकम् ॥ ८१ ॥

**चन्द्रायणं च चरति ॥ ६ ॥ ४ ॥ ८२ ॥**

चन्द्रायणाद् द्वितीयान्ताद्, गोदानादेश्च शब्दतः ।
भवेदिकण् चरत्यर्थे, सँश्चान्द्रायणिको व्रती ॥ ८२ ॥

---

एवं सांस्थानिकः, कांस्यप्रस्तारिकः, गौसंस्थानिकः, वांशकठिनिकः । कठिनं तापसभाजनं पीठं वा ॥ ७९ ॥ आ अर्हदर्थादित ऊर्ध्वं या प्रकृतिरुपादास्यते तस्याः केवलायास्तदन्तायाश्च सङ्ख्यापूर्वाया वक्ष्यमाणः प्रत्ययो भवतीति वेदितव्यम् , न चेत् सा लुगन्ता भवतीति स्पष्टोऽर्थः ॥ ८० ॥ यावद् गोदानं न करोति तावद्ब्रह्मचर्यमित्यर्थः ॥ ८१ ॥ एवं गौदानिकः, आदित्यव्रतिकः माहानामिकः ॥ ८२ ॥

## देवव्रतादीन् ॥ ६ ॥ ४ ॥ ८३ ॥

द्वितीयान्ताच्चरत्यर्थे, डिन स्याद् देवव्रतादितः ।
देवव्रती जनो देव-लोके सुखमवाप्नुयात् ॥ ८३ ॥

## डकश्चाष्टाचत्वारिंशतं वर्षाणाम् ॥ ६ ॥ ४ ॥ ८४ ॥

वर्षाणां चरदर्थेऽष्टा-चत्वारिंशत आव्रतात् ।
द्वितीयान्ताड्डको डिश्चा-ष्टाचत्वारिंशकः पुनः ॥ ८४ ॥

## चातुर्मास्यं तौ यलुक् च ॥ ६ ॥ ४ ॥ ८५ ॥

चातुर्मास्याद् द्वितीयान्तात्, स्यातां डकडिनौ तथा ।
यलोपश्च चरत्यर्थे, चातुर्मासक उत्तमः ॥ ८५ ॥

## क्रोशयोजनपूर्वाच्छताद्योजनाच्चाभिगमार्हे ॥ ६ ॥ ४ ॥ ८६ ॥

पञ्चम्यन्ताच्छतात् क्रोश-योजनाद्याच्च योजनात् ।
इकणभिगमार्हेऽर्थे, यौजनशतिको मुनिः ॥ ८६ ॥

## तद्यात्येभ्यः ॥ ६ ॥ ४ ॥ ८७ ॥

द्वितीयान्तेभ्य एतेभ्यो, गच्छत्यर्थे भवेदिकण् ।
यौजनशतिको दूतः, किं क्रौशशतिको नहि ॥ ८७ ॥

---

एते प्रयोगगम्याः, डित्करणमुत्तरत्रान्त्यस्वरादिलोपार्थम् ॥ ८३ ॥ एवमष्टाचत्वारिंशी ॥ ८४ ॥ स्पष्टम् ॥ ८५ ॥ एवं क्रौशशतिकः, यौजनिकः ॥ ८६ ॥ एवं यौजनिकः ॥ ८७ ॥

## पथ इकट् ॥ ६ ॥ ४ ॥ ८८ ॥

पथिन्‌शब्दाद् द्वितीयान्ताद्, गच्छत्यर्थे भवेदिकट् ।
पथिकः पथिकी कल्ये, पन्थानं यदि गच्छतः ॥ ८८ ॥

## नित्यं णः पन्थश्च ॥ ६ ॥ ४ ॥ ८९ ॥

पथिन्‌शब्दाद् द्वितीयान्ता-न्नित्यं गच्छति णो भवेत् ॥
पन्थादेशोऽस्य पान्थो ना, पन्थानं याति नित्यशः ॥८९॥

## शङ्कूत्तरकान्ताराजवारिस्थलजङ्गलादेस्तेनाहृते च ॥ ६ ॥ ४ ॥ ९० ॥

तेनाहृते पथिन्नन्ता-च्छङ्क्वादि पूर्वकादिकण् ।
यात्यर्थे शाङ्कुपथिकः, कान्तारपथिकस्तथा ॥ ९० ॥

## स्थलादेर्मधुकमरिचेऽण् ॥ ६ ॥ ४ ॥ ९१ ॥

तेनाहृते पथिन्नन्तात्, स्थलादेरण् विधीयते ।
मधुकं मरिचं तच्चेत्, पथ्यं स्थालपथं द्वयम् ॥ ९१ ॥

## तुरायणपारायणं यजमानाधीयाने ॥ ६ ॥ ४ ॥ ९२ ॥

पारायणादधीयाने, यजमाने तुरायणात् ।
द्वितीयान्तादिकण् पारा-यणिकोऽधीत इत्यमुम् ॥ ९२ ॥

---

टकारो ङ्यर्थः ॥ ८८ ॥ नित्यमिति किम्? पथिकः ॥ ८९ ॥ एवम् औत्तरपथिकः, आजपथिकः, वारिपथिकः, स्थालपथिकः जाङ्गलपथिकः ॥ ९० ॥ स्थालपथिकमन्यत् ॥ ९१ ॥ एवं तुरायणं नामयज्ञस्तं यजते तौरायणिकः ॥ ९२ ॥

## संशयं प्राप्ते ज्ञेये ॥ ६ ॥ ४ ॥ ९३ ॥

प्राप्ते ज्ञेये द्वितीयान्तात्, संशयात् स्यादिकण् ततः ।
सांशयिकोऽयमूर्ध्वो नो, जाने स्थाणुर्नरोऽथवा ॥ ९३ ॥

## तस्मै योगादेः शक्ते ॥ ६ ॥ ४ ॥ ९४ ॥

शक्तेऽर्थे हि चतुर्थ्यन्त-योगादिभ्यो भवेदिकण् ।
कलिकालेऽपि किं न स्युः, शक्ता योगाय यौगिकाः ॥९४॥

## योगकर्मभ्यां योकञौ ॥ ६ ॥ ४ ॥ ९५ ॥

तस्मै यो योगतः शक्ते, कर्मणश्च भवेदुकञ् ।
शक्तो योगाय योग्यः स्यात्, कर्मणे कार्मुकं धनुः ॥९५॥

## यज्ञानां दक्षिणायाम् ॥ ६ ॥ ४ ॥ ९६ ॥

षष्ठ्यन्तयज्ञवाचिभ्यो, दक्षिणायां भवेदिकण् ।
ऐकादशाहिकीं प्राप्य, लिप्सते द्वादशाहिकीम् ॥९६॥

## तेषु देये ॥ ६ ॥ ४ ॥ ९७ ॥

शब्देभ्यो यज्ञवाचिभ्य-स्तेषु देये भवेदिकण् ।
स्यादाग्निष्टोमिकं वाज-पेयिकं पायसं परम् ॥ ९७ ॥

---

ज्ञेय इति किम्? संशयितारि मा भूत्, सोऽपि हि संशयं प्राप्तो भवति ॥ ९३ ॥ षड्विंशतिः योगादयः ॥ ९४ ॥ एवं योगशब्दस्य द्वैरूप्यम् ॥ ९५ ॥ बहुवचनं स्वरूपविधेर्व्युदासार्थम् ॥ ९६ ॥ स्पष्टम् ॥ ९७ ॥

## काले कार्ये च भववत् ॥ ६ ॥ ४ ॥ ९८ ॥

भववत् प्रत्यया सप्त–म्यन्ततः कालवाचिनः ।
देये कार्य्ये च वर्षासु, देयं कार्य्यश्च वार्षिकम् ॥ ९८ ॥

## व्युष्टादिष्वण् ॥ ६ ॥ ४ ॥ ९९ ॥

देये कार्य्ये च सप्तम्य–न्ततो व्युष्टादितोऽण् भवेत् ।
देयं नैष्क्रमणं सर्वं, यावद्वत्सरमर्हताम् ॥ ९९ ॥

## यथाकथाचाण्णः ॥ ६ ॥ ४ ॥ १०० ॥

णः स्याद्देये च कार्य्ये च, यथाकथाचशब्दतः ।
याथाकथाचमद्यत्वे, देयं कार्य्यं च कुर्वते ॥ १०० ॥

## तेन हस्ताद्यः ॥ ६ ॥ ४ ॥ १०१ ॥

हस्तशब्दात्तृतीयान्ता–द्देये कार्य्ये च यो भवेत् ।
देयं हस्तेन कार्य्यं वा, हस्त्यमाप्नोति चेतनम् ॥१०१॥

---

यकाभ्यः प्रकृतिभ्यो येन विशेषेण ये प्रत्यया भवेऽर्थे भवन्ति ताभ्यः प्रकृतिभ्यस्तेन विशेषेण कार्ये देये चार्थे ते प्रत्यया भवन्ति । वद्धि सव-सादृश्यार्थः ॥ ९८ ॥ एकादश व्युष्टादयः । बहुवचनमाकृतिगणार्थम् ॥ ९९ ॥ यथाकथाचशब्दोऽव्ययसमुदायोऽनादरेणेत्यर्थे वर्तते ॥ १०० ॥ स्पष्टम् ॥ १०१ ॥

## शोभमाने ॥ ६ ॥ ४ ॥ १०२ ॥

शोभमाने तृतीयान्ता–दिकण् स्यात् प्रत्ययस्ततः ।
भाति जनमनःक्षोभि, **कार्णवेष्टकिकं मुखम्** ॥ १०२ ॥

## कर्मवेषाद्यः ॥ ६ ॥ ४ ॥ १०३ ॥

शोभमाने तृतीयान्ता–द्यः स्याद्वेषाच्च कर्मणः ।
वेषेण शोभते वेष्यः, **कर्मण्यं** भाति कर्मणा ॥ १०३ ॥

## कालात्परिजय्यलभ्यकार्यसुकरे ॥ ६ ॥ ४ ॥ १०४ ॥

परिजय्यादिके चार्थे, कालविशेषवाचिनः ।
तृतीयान्तादिकण् तेन, **मासिको** व्याधिराधिकृत् ॥ १०४ ॥

## निर्वृत्ते ॥ ६ ॥ ४ ॥ १०५ ॥

निर्वृत्तेऽर्थे तृतीयान्ता–दिकण् स्यात् कालवाचिनः ।
**आह्निकं मासिकं सांव–त्सरिकमार्धमासिकम्** ॥ १०५ ॥

## तं भाविभूते ॥ ६ ॥ ४ ॥ १०६ ॥

द्वितीयान्तादिकण् काल–वाचिनो भाविभूतके ।
भवेद्दुःखाय सौख्याय, **मासिको** व्याधिरुत्सवः ॥ १०६ ॥

---

असमर्थनञ्समासोऽप्यस्मिन् विषये भवति, कर्णवेष्टकाभ्यां न शोभते अकार्णवेष्टकिकम् ॥ १०२ ॥ पूर्ववन्नञ्समासो भवति, अकर्मण्यः, अवेष्यः ॥ १०३ ॥ कालादिति किम्? चैत्रेण परिजय्यम् ॥ १०४ ॥ योगविभाग उत्तरत्रास्यानुवृत्त्यर्थः ॥ १०५ ॥ स्वसत्तया व्याप्स्यमानकालो भावी। व्याप्तकालो भूतः ॥ १०६ ॥

## तस्मै भृताधीष्टे च ॥ ६ ॥ ४ ॥ १०७ ॥

स्यात्तादर्थ्ये चतुर्थ्यन्ताद् , भृतेऽधीष्टे च कालतः ।
इकण् स्यान्मासिको दासो—ऽध्यापकश्चापि मासिकः ॥१०७॥

## षण्मासाद्वयसि ण्येकौ ॥ ६ ॥ ४ ॥ १०८ ॥

उक्तार्थेऽवयसि ण्येकौ, षण्मासात् कालवाचिनः ।
भावी भूतश्च षाण्मास्यो—ऽधीष्टः षण्मासिको भृतः ॥१०८॥

## समाया ईनः ॥ ६ ॥ ४ ॥ १०९ ॥

निर्वृत्तपश्चकार्थे स्या—दीनः समात ईहितः ।
भूतो भावी समीनो नि—र्वृत्तोऽधीष्टस्तथा भृतः ॥१०९॥

## रात्र्यहःसंवत्सराच्च द्विगोर्वा ॥ ६ ॥ ४ ॥ ११० ॥

स्याद् द्विगो रात्र्यहःसंव—त्सरान्ताच्च समान्ततः ।
निर्वृत्तपश्चके वेनो, द्विरात्रीणः कुटो भृतः ॥ ११० ॥

## वर्षादश्च वा ॥ ६ ॥ ४ ॥ १११ ॥

वा वर्षान्ताद् द्विगोरश्चे—नश्च निर्वृत्तपश्चके ।
इकण् पक्षे द्विवर्षोऽपि, द्विवर्षीणो द्विवार्षिकः ॥१११॥

---

उक्तसूत्रत्रयस्याप्युत्तरत्रानुवृत्त्यर्थश्चकारः ॥ १०७ ॥ एवं निर्वृत्तोऽपि ॥ १०८ ॥ स्पष्टम् ॥ १०९ ॥ एवं द्वैरात्रिकः ॥ ११० ॥ स्पष्टम् ॥ १११ ॥

## प्राणिनि भूते ॥ ६ ॥ ४ ॥ ११२ ॥

अः स्यात् प्राणिनि भूतेऽर्थे, वर्षशब्दान्ततो द्विगोः ।
द्विवर्षो दारको भूत्वा, त्रिवर्षो ननु जायते ॥ ११२ ॥

## मासाद्वयसि यः ॥ ६ ॥ ४ ॥ ११३ ॥

भूतेऽर्थे यो वयोगम्ये, मासशब्दान्ततो द्विगोः ।
द्विमास्यो दारको व्याधि-द्वैमासिको वयोऽन्यतः ॥११३॥

## ईनञ् च ॥ ६ ॥ ४ ॥ ११४ ॥

भूतेऽर्थे यस्तथेनञ् स्याद्, वयसि मासशब्दतः ।
मासीनो दारको मास्यो, मासीनास्वस्तको युगी ॥११४॥

## षण्मासाद्ययणिकण् ॥ ६ ॥ ४ ॥ ११५ ॥

भूते वयसि षण्मासात्, स्युर्यथणिकणस्ततः ।
षाण्मासिको हि षाण्मास्यः,
षण्मास्यः किं चलेच्छिशुः ॥ ११५ ॥

## सोऽस्य ब्रह्मचर्यतद्वतोः ॥ ६ ॥ ४ ॥ ११६ ॥

इकण्कालार्थतः सोऽस्य, ब्रह्मचर्ये च तद्वति ।
मासिकं ब्रह्मचर्यं स्याद्, ब्रह्मचारी च मासिकः ॥ ११६ ॥

---

प्राणिनीति किम् ? द्विवर्षः, द्विवर्षीणः, द्विवार्षिकः, सरकः ॥ ११२ ॥ भूत इत्येव द्वौ मासौ भावी द्वैमासिको युवा ॥११३॥ वयसीत्येव मासिको नायकः ॥ ११४ ॥ स्पष्टम् ॥ ११५ ॥ स इति प्रथमान्तात्, अस्येति षष्ठ्यर्थे ॥ ११६ ॥

## प्रयोजनम् ॥ ६ ॥ ४ ॥ ११७ ॥

इकण् प्रयोजनं तच्चेत्, षष्ठ्यर्थे प्रथमान्ततः ।
दैपोत्सविकमुल्लासि, जैनमह्निकतोऽन्वितम् ॥ ११७ ॥

## एकागाराच्चौरे ॥ ६ ॥ ४ ॥ ११८ ॥

एकागारात्तदस्येति, प्रयोजने भवेदिकण् ।
स चेच्चोरो जगत्येका–गारिको भवति क्वचित् ॥ ११८ ॥

## चूडादिभ्योऽण् ॥ ६ ॥ ४ ॥ ११९ ॥

प्रयोजनं तदस्येति, चूडादिभ्योऽण् विधीयते ।
चौडं चौलं तथा श्राद्ध–मौपनयनमीक्ष्यताम् ॥ ११९ ॥

## विशाखाषाढान्मन्थदण्डे ॥ ६ ॥ ४ ॥ १२० ॥

विशाखाया भवेन्मन्थे, आषाढायाश्च दण्डके ।
प्रयोजनं तदस्येत्यण्, वैशाखो मन्थमन्थरः ॥ १२० ॥

## उत्थापनादेरीयः ॥ ६ ॥ ४ ॥ १२१ ॥

इय उत्थापनादिभ्य–स्तदस्येति प्रयोजनम् ।
उपस्थापनीयोऽय–मुत्थापनीय आदृतः ॥ १२१ ॥

---

स्पष्टम् ॥ ११७ ॥ चौरे नियमार्थं वचनम् ॥ ११८ ॥ चूडादयः प्रयोगगम्याः ॥ ११९ ॥ एवमाषाढो दण्डः ॥ १२० ॥ उत्थापनादयो दश ॥ १२१ ॥

## विशिरुहिपदिपूरिसमापेरनात् सपूर्वपदात् ॥ ६ ॥ ४ ॥ १२२ ॥

सपूर्वपदतोऽनान्ता-दीयो विश्यादिपञ्चकात् ।
स्यात् पूर्वत्रच्छनस्कन्ध-समापनीयमात्मने ॥ १२२ ॥

## स्वर्गस्वस्तिवाचनादिभ्यो यलुपौ ॥ ६ ॥ ४ ॥ १२३ ॥

यः स्यात् स्वर्गादितः स्वस्ति-वाचनादेश्च लुब् भवेत् ।
प्रयोजनं तदस्येति, स्वर्ग्यं पुण्याहवाचनम् ॥ १२३ ॥

## समयात् प्राप्तः ॥ ६ ॥ ४ ॥ १२४ ॥

प्राप्तश्चेत् प्रथमान्तात् स्यात्, षष्ठ्यन्तात् समयादिकण् ।
सामयिकं विधेयं ह्यु-पनतकालमर्थतः ॥ १२४ ॥

## ऋत्वादिभ्योऽण् ॥ ६ ॥ ४ ॥ १२५ ॥

अण् सोऽस्य प्राप्त इत्यर्थे, ऋत्वादिभ्यो भवेत्ततः ।
आर्तवं पुष्पमाभाद्य, फलाय जायते स्पृहा ॥ १२५ ॥

## कालाद्यः ॥ ६ ॥ ४ ॥ १२६ ॥

स्यात् सोऽस्य प्राप्त इत्यर्थे, प्रत्ययो यश्च कालतः ।
काल्या मेघा तथा काल्य-स्तापसो विरतिप्रियः ॥१२६॥

---

एवमन्यदप्यूह्यम् ॥ १२२ ॥ एते प्रयोगगम्याः ॥ १२३ ॥ स्पष्टम् ॥ १२४ ॥ ऋत्वादयः प्रयोगगम्याः ॥ १२५ ॥ स्पष्टम् ॥ १२६ ॥

## दीर्घः ॥ ६ ॥ ४ ॥ १२७ ॥

यदि दीर्घस्तदस्येति, कालशब्दाद्भवेदिकण् ।
कालिकं च ऋणं वैरं, स्फेटयन्ति मुमुक्षवः ॥ ११७ ॥

## आकालिकमिकश्चाद्यन्ते ॥ ६ ॥ ४ ॥ १२८ ॥

आकालशब्दतः स्यातां, भवत्यर्थे इकेकणौ ।
आदिरेव भवेदन्तो, विद्युदाकालिकी यथा ॥ १२८ ॥

## त्रिंशद्विंशतेर्डकोऽसंज्ञायामार्हदर्थे ॥ ६ ॥ ४ ॥ १२९ ॥

असंज्ञायां डकस्त्रिंशद्विंशतेरार्हदर्थतः ।
त्रिंशकं त्रिंशता क्रीतं, विंशत्या ननु विंशकम् ॥ १२९ ॥

## सङ्ख्याडतेश्चाशत्तिष्टेः कः ॥ ६ ॥ ४ ॥ १३० ॥

त्रिंशद्विंशतितः सङ्ख्या–डतेः कश्चार्हदर्थतः ।
शत्तिष्ट्यन्तं परित्यज्य, द्विकं त्रिकं च पञ्चकम् ॥ १३० ॥

## शतात् केवलादतस्मिन्येकौ ॥ ६ ॥ ४ ॥ १३१ ॥

शतात् केवलतो येका–वतस्मिन्नार्हदर्थतः ।
क्रीतं शतेन शत्यं च, शतिकं शतिको नरः ॥१३१॥

---

योगविभागादिकण् ॥ १२७ ॥ स्पष्टम् ॥ १२८ ॥ आर्हदर्थे इत्यभिविधावाकारः ॥ १२९ ॥ एवं बहुकम्, गणकम्, यावत्कम्, तावत्कम्, अध्यर्धकम्, अर्धपञ्चमकम्, कतिकम्, त्रिंशत्कम्, विंशतिकम्, इकणोऽपवादः ॥१३०॥ केवलादिति किम्? द्विशतकम्। अतस्मिन्निति किम्? शतकं स्तोत्रम् ॥१३१॥

## वातोरिकः ॥ ६ ॥ ४ ॥ १३२ ॥

अत्यन्तायाश्च सङ्ख्यायाः, स्यादिको वाऽर्हदर्थतः ।
यावतिकं च यावत्कं, तावतिकं पुनस्तथा ॥ १३२ ॥

## कार्षापणादिकट् प्रतिश्चास्य वा ॥ ६ ॥ ४ ॥ १३३ ॥

इकट् कार्षापणाच्छब्दा-दार्हदर्थे भवेत्ततः ।
प्रत्यादेशोऽस्य वा कार्षा-पणिकं प्रतिकं तथा ॥१३३॥

## अर्धात् पलकंसकर्षात् ॥ ६ ॥ ४ ॥ १३४ ॥

अर्धपूर्वात् पलाद्यन्ता-दार्हदर्थे भवेदिकट् ।
अर्धपलिकमप्यर्ध-कंसिकमर्धकर्षिकम् ॥१३४॥

## कंसार्धात् ॥ ६ ॥ ४ ॥ १३५ ॥

कंसार्धाभ्यां च शब्दाभ्या-मार्हदर्थे भवेदिकट् ।
अर्धिकमर्धिकी यद्वत्, कंसिकं कंसिकी तथा ॥१३५॥

## सहस्रशतमानादण् ॥ ६ ॥ ४ ॥ १३६ ॥

सहस्रशतमानाभ्या-मार्हदर्थेऽण् विधीयते ।
साहस्रः शातमानश्च, क्रीतस्तेन च तेन च ॥ १३६ ॥

---

विधानसामर्थ्यादिकारलोपो न भवति ॥ १३२ ॥ टकारो ङ्यर्थः ॥१३३॥ स्पष्टे ॥ १३४ ॥ १३५ ॥ केकणोरपवादः ॥ १३६ ॥

## शूर्पाद्वाञ् ॥ ६ ॥ ४ ॥ १३७ ॥

आर्हदर्थे भवेदञ् वा, प्रत्ययः शूर्पशब्दतः ।
इकणश्चापवादोऽयं, तेन शौर्पं च शौर्पिकम् ॥ १३७ ॥

## वसनात् ॥ ६ ॥ ४ ॥ १३८ ॥

वसनात् प्रत्ययो स्यादञ्, आर्हदर्थे सवासनैः ।
क्रीतं यद् वसनं दत्त्वा, वासनं तदुदाहृतम् ॥ १३८ ॥

## विंशतिकात् ॥ ६ ॥ ४ ॥ १३९ ॥

अञ् प्रत्ययो भवेदार्ह–दर्थे विंशतिकात्ततः ।
विंशतिर्मानमस्येति, विंशतिकं विभाव्यते ॥ १३९ ॥

## द्विगोरीनः ॥ ६ ॥ ४ ॥ १४० ॥

आर्हदर्थे द्विगोरीनो, भवेद्विंशतिकान्ततः ।
किं द्विविंशतिकीनं त्रि–विंशतिकीनमुच्यते ॥ १४० ॥

## अनाम्न्यद्विः प्लुप् ॥ ६ ॥ ४ ॥ १४१ ॥

आर्हदर्थे द्विगोर्जात–प्रत्ययस्य सकृद्भवेद् ।
पिलुप् न द्विरसंज्ञाया–मध्यर्धकंसमिष्यते ॥ १४१ ॥

---

स्पष्टे ॥ १३७ ॥ १३८ ॥ योगविभाग उत्तरार्थः ॥ १३९ ॥ अञोऽपवादः । विधानसामर्थ्याल्लुब् न भवति ॥ १४० ॥ १४१ ॥

## नवाणः ॥ ६ ॥ ४ ॥ १४२ ॥

स्याद् द्विगोर्विहितस्याण, आर्हदर्थे सकृन्न वा ।
पिलुप् न तु द्विरध्यर्ध-सहस्राध्यर्धसाहस्रे ॥ १४२ ॥

## सुवर्णकार्षापणात् ॥ ६ ॥ ४ ॥ १४३ ॥

सुवर्णान्तात्तथाकार्षा-पणान्तात् प्रत्ययस्य लुप् ।
वार्हदर्थे द्विगोर्न द्वि-र्द्विसुवर्ण विकल्प्यताम् ॥ १४३ ॥

## द्वित्रिबहोर्निष्कविस्तात् ॥ ६ ॥ ४ ॥ १४४ ॥

स्याद् द्वित्रिबहुतो निष्क-विस्तान्तादार्हदर्थतः ।
द्विगोर्जातस्य लुब् वा द्वि-र्न द्विनिष्कं द्विनैष्किकम् ॥१४४॥

## शताद्यः ॥ ६ ॥ ४ ॥ १४५ ॥

स्याच्छतान्ताद् द्विगोरार्ह-दर्थे यः प्रत्ययो नवा ।
पक्षे कस्तस्य लुब् ज्ञेयो, द्विशत्यं द्विशतं यथा ॥१४५॥

## शाणात् ॥ ६ ॥ ४ ॥ १४६ ॥

स्याच्छाणान्ताद् द्विगोरार्ह-दर्थे यः प्रत्ययो नवा ।
इकण् पक्षे च लुप् तस्य, पञ्चशाण्यमुदाहरेत् ॥ १४६ ॥

---

स्पष्टे ॥ १४२ ॥ पक्षे द्विसौवर्णिकम् ॥ १४३ ॥ एवमन्यदपि ॥ १४४ ॥ अस्य तु विधानसामर्थ्यान्न भवति ॥ १४४ ॥ पक्षे पञ्चशाणम् ॥ १४६ ॥

## द्वित्र्यादेर्याण् वा ॥ ६ ॥ ४ ॥ १४७ ॥

आर्हदर्थे नवा याणौ, शाणान्ताद् द्वित्रितो द्विगोः ।
द्विशाण्यं च द्विशाणं च, द्वैशाणं त्रितयं ततः ॥ १४७ ॥

## पणपादमाषाद्यः ॥ ६ ॥ ४ ॥ १४८ ॥

स्यात् पणपादमाषान्ता–दार्हदर्थे द्विगोश्च यः ।
विधानाल्लुब् नचाध्यर्ध–माष्यं द्विपाद्यमित्यतः ॥ १४८ ॥

## खारीकाकणीभ्यः कच् ॥ ६ ॥ ४ ॥ १४९ ॥

खार्यन्तात् काकणीप्रान्ताद्, द्विगोः कच् केवलादपि ।
आर्हदर्थे द्विखारीकं, खारीकं सूत्रतो ह्यतः ॥ १४९ ॥

## मूल्यैः क्रीते ॥ ६ ॥ ४ ॥ १५१ ॥

इकणाद्यास्तृतीयान्तात्, क्रीतेऽर्थे मूल्यवाचिनः ।
स्युर्यथाविहितं क्रीतं, प्रस्थेन प्रास्थिकं यथा ॥ १५० ॥

## तस्य वापे ॥ ६ ॥ ४ ॥ १५१ ॥

ज्ञेयाः षष्ठ्यन्ततो वापे, यथाविधीकणादयः ।
स्यात् क्षेत्रं शातिकं शत्यं, खारीकं प्रास्थिकं पुनः ॥१५१॥

---

स्पष्टम् ॥ १४७ ॥ एवं द्विपण्यमित्यादि ॥ १४८ ॥ एवं द्विकाकणीकम्, काकणीकमित्यादि । चकारो ' न कचि ' २–४–१४ इतिप्रतिषेधार्थः ॥ १४९ ॥ सूत्रद्वयं स्पष्टम् ॥ १५० ॥ १५१ ॥

## वातपित्तश्लेष्मसंनिपाताच्छमनकोपने ॥ ६ ॥ ४ ॥ १५२ ॥

शमने कोपने वाता-दितः षष्ठ्यन्ततस्त्विकण् ।
स्याद् यथाविहितं सांनि-पातिकं वातिकं यथा ॥१५२॥

## हेतौ संयोगोत्पाते ॥ ६ ॥ ४ ॥ १५३ ॥

हेतुः संयोग उत्पात-श्चेद् षष्ठ्यन्ताद् यथाविधि ।
प्रत्ययाः शतिकः शत्यः, सोमग्रहणिकस्तथा ॥ १५३ ॥

## पुत्राद्येयौ ॥ ६ ॥ ४ ॥ १५४ ॥

षष्ठ्यन्तपुत्रतो येयौ, संयोगोत्पातहेतुके ।
पुत्र्यः पुत्रीय उत्पातः, संयोगोऽपि विचिन्त्यताम् ॥ १५४ ॥

## द्विस्वरब्रह्मवर्चसाद्योऽसङ्ख्यापरिणामाश्वादेः ॥ ६ ॥ ४ ॥ १५५ ॥

हेतौ यः स्यादसङ्ख्यादे-र्द्विस्वराद्ब्रह्मवर्चसात् ।
षष्ठ्यन्तात् पूर्ववद् ब्रह्म-वर्चस्यो धन आश्विकः ॥ १५५ ॥

---

एवं पैत्तिकम्, श्लैष्मिकम् ॥ १५२ ॥ संयोगः सम्बन्धः । प्राणिनां शुभाशुभसूचको महाभूतपरिणाम उत्पातः ॥ १५३ ॥ स्पष्टम् ॥ १५४ ॥ असङ्ख्यादीनामपवादः । अश्वादयो नव ॥ १५५ ॥

## पृथिवीसर्वभूमेरीशज्ञातयोश्चाञ् ॥ ६ ॥ ४ ॥ १५६ ॥

पृथिव्याः सर्वभूमेश्चाञ्, षष्ठयन्तायाश्च पूर्ववत् ।
स्यादीशज्ञातयोः शान्तिः, सार्वभौमः स पार्थिवः ॥१५६॥

## लोकसर्वलोकाज्ज्ञाते ॥ ६ ॥ ४ ॥ १५७ ॥

लोकतः सर्वलोकाच्च, ज्ञाते षष्ठ्यन्ततस्त्विकण् ।
स्याद् यथाविहितं ज्ञातो, लौकिकः सार्वलौकिकः ॥१५७॥

## तदत्रास्मै वा वृद्ध्यायलाभोपदाशुल्कं देयम् ॥ ६ ॥ ४ ॥ १५८ ॥

सप्तम्यर्थे चतुर्थ्यर्थे, प्रत्ययः प्रथमान्ततः ।
तच्चेद् वृद्ध्यादि देयं स्या-द्यथाविधि स पञ्चकः ॥१५८॥

## पूरणाद्धाद्दिकः ॥ ६ ॥ ४ ॥ १५९ ॥

पूरणप्रत्ययान्ताच्चा-र्धादिकः पूर्ववद्भवेत् ।
द्वितीयिकोऽर्धिकः पञ्च-मिकस्तृतीयिकोऽर्धिका ॥१५९॥

---

सर्वभूमेरनुशतिकादित्वादुभयपदवृद्धिः । ईशज्ञातयोरिति द्विवचनं हेतुविशेषणत्वशङ्काव्यवच्छेदार्थम् ॥ १५६ ॥ सर्वलोकशब्दस्यानुशतिकादित्वादुभयपद--वृद्धिः ॥१५७॥ अधमर्णेनोत्तमर्णाय गृहीतधनातिरिक्तं देयं **वृद्धिः** । ग्रामादिषु स्वामिग्राह्यो भाग **आयः** । पटादीनामुपादानं मूल्यातिरिक्तं प्राप्तं द्रव्यं **लाभः** । **उपदा** उत्कोचः । लञ्च उत्कोट इति यावत् । वणिजां रक्षानिर्वेशो राजभागः **शुल्कम्** ॥ १५८ ॥ इकणिकटोरपवादः । अर्धशब्दो रूपकार्ये रूढः ॥ १५९ ॥

## भागाद्येकौ ॥ ६ ॥ ४ ॥ १६० ॥

प्रत्ययौ भवतो येकौ, पूर्ववद्भागशब्दतः ।
अस्मिन्नस्मै च देयं स्या–द्भाग्यस्तथैव भागिकः ॥१६०॥

## तं पचति द्रोणाद्वाञ् ॥ ६ ॥ ४ ॥ १६१ ॥

द्रोणशब्दाद् द्वितीयान्तात्, पचत्यर्थेऽञ् भवेन्नवा ।
स्थाली वा गृहिणी द्रौणी, द्रौणिकी दृश्यते क्वचित् ॥१६१॥

## संभवदवहरतोश्च ॥ ६ ॥ ४ ॥ १६२ ॥

सम्भवति पचत्यर्थे–ऽवहरतीकणादयः ।
यथाविधि द्वितीयान्तात्, खारिकः प्रास्थिको घटः ॥१६२॥

## पात्राचिताढकादीनो वा ॥ ६ ॥ ४ ॥ १६३ ॥

पात्राचिताढकादीनो, द्वितीयान्ताद्विभाषया ।
पचत्यादित्रयार्थे स्यात्, पात्रीणः पात्रिको यथा ॥१६३॥

## द्विगोरीनेकटौ वा ॥ ६ ॥ ४ ॥ १६४ ॥

पात्राद्यन्ताद् द्वितीयान्ताद्, द्विगोरीनेकटौ नवा ।
पचत्यादौ द्विपात्रीणो, द्विपात्रिश्च द्विपात्रिकः ॥ १६४ ॥

---

इकणोऽपवादौ । भवति भागशब्दोऽपि, रूपकार्थस्य वाचकः ॥ १६० ॥ स्पष्टम् ॥१६१॥ तत्राधेयस्य प्रमाणानतिरेकेण धारण सम्भवः । अतिरेकेणावहारः ॥१६२॥ पात्रादयः परिमाणशब्दाः । पक्षे इकण् ॥१६३॥ पक्षे इकण् तस्य च 'अनाम्न्यद्विः प्लुप्' ६–४–१४१–इति लुप्, नानयोर्विधानसामर्थ्यात् । आचितान्तान्नीनं भवति अविस्ताचितकम्बल्यादिति प्रतिषेधात् ॥ १६४ ॥

## कुलिजाद्वा लुप् च ॥ ६ ॥ ४ ॥ १६५ ॥

कुलिजान्ताद् द्वितीयान्ताद्, द्विगोरीनेकटौ नवा ।
त्रयेऽर्थे चेकणो वा लु–बलं द्विकुलिजीनया ॥ १६५ ॥

## वंशादेर्भाराद्धरद्वहदावहत्सु ॥ ६ ॥ ४ ॥ १६६ ॥

वंशादेर्भारशब्दान्ताद्, द्वितीयान्ताद् यथाविधि ।
स्यात् प्रत्ययो हरत्यादौ, वंशभृद् वांशभारिकः ॥१६६॥

## द्रव्यवस्नात् केकम् ॥ ६ ॥ ४ ॥ १६७ ॥

को द्रव्यतो द्वितीयान्ता–द्वस्नादिको हरत्त्रिके ।
द्रव्यको वस्निको द्रव्यं, वस्नं वहति हारकः ॥ १६७ ॥

## सोऽस्य भृतिवस्नांशम् ॥ ६ ॥ ४ ॥१६८॥

षष्ठ्यर्थे प्रथमान्तात् स्यु–र्यथाविधीकणादयः ।
प्रथमान्तं भृतिर्वस्नमंशश्चेत् पञ्चकः पटः ॥ १६८ ॥

## मानम् ॥ ६ ॥ ४ ॥ १६९ ॥

षष्ठ्यर्थे प्रथमान्तात् स्यात्, प्रत्ययो मानमेतकम् ।
चेद्यथाविहितं राशिः, प्रास्थिको द्रौणिकस्तथा ॥ १६९ ॥

---

एवं द्विकुलिजिकी, द्विकुलिजी, द्वैकुलिजिकी ॥ १६५ ॥ सूत्रस्यास्यापरोऽप्यर्थस्तथाहि भारभूतेभ्यो वंशादिभ्यो द्वितीयान्तेभ्यो हरदादिष्वर्थेषु यथाविहितं प्रत्ययो भवति, तेन वांशिक इत्यादि । वंशादय एकादश ॥१६६॥ स्पष्टम् ॥१६७॥ भृतिर्वेतनम् । वस्नो नियतकालक्रयमूल्यम् । अंशो भागः ॥ १६८ ॥ मीयते येन तन्मानम् ॥ १६९ ॥

## जीवितस्य सन् ॥ ६ ॥ ४ ॥ १७० ॥

षष्ठ्यर्थे प्रथमान्तात् प्रत्ययो जीवितमानतः ।
स्याद्यथाविहितं सँश्च, द्विषाष्टिकः कलौ परः ॥ १७० ॥

## सङ्ख्यायाः सङ्घसूत्रपाठे ॥ ६ ॥ ४ ॥ १७१ ॥

स्यात् सङ्ख्यावाचिनो माने, प्रत्ययः प्रथमान्ततः ।
सङ्घादित्रितयं तच्चेत्, पञ्चकः सप्तकोऽष्टकम् ॥ १७१ ॥

## नाम्नि ॥ ६ ॥ ४ ॥ १७२ ॥

तदस्य मानमित्यर्थे, सङ्ख्यायाः स्याद्यथाविधि ।
प्रत्ययः समुदायश्चे–न्नाम राजर्षयोऽष्टकाः ॥ १७२ ॥

## विंशत्यादयः ॥ ६ ॥ ४ ॥ १७३ ॥

स्युर्विंशत्यादयः शब्दा, नाम्नि भवन्ति साधवः ।
तदस्य मानमित्यर्थे, नमामि जिनविंशतिम् ॥ १७३ ॥

---

तस्य 'अनाम्न्यद्विः प्लुप्' ६-४-१४१ इति लुप् प्राप्ता न भवतीत्यर्थः ॥१७०॥ सङ्घः प्राणिनां समूहः । सूत्रं शास्त्रग्रन्थः । पाठोऽधीतिरध्ययनम् ॥१७१॥ स्पष्टम् ॥ १७२ ॥ विंशत्यादयः शब्दाः कृतप्रकृतिप्रत्यया यथायोगं साधनीयाः ॥ १७३ ॥

## त्रैंशं चात्वारिंशम् ॥ ६ ॥ ४ ॥ १७४ ॥

चात्वारिंशं तथा त्रैंशं, निपात्येते अणन्तिमौ ।
नाम्नि तदस्य मानेऽर्थे, चात्वारिंशानि कानिचित् ॥१७४॥

## पञ्चद्दशद्वर्गे वा ॥ ६ ॥ ४ ॥ १७५ ॥

उदन्तौ वा निपात्येते, पञ्चद्दशदिति द्वयौ ।
माने तदस्य पक्षे कः, वर्गे वर्गोऽस्ति पञ्चकः ॥ १७५ ॥

## स्तोमे डट् ॥ ६ ॥ ४ ॥ १७६ ॥

तदस्य मानमित्यस्मिन्, विषये प्रथमान्ततः ।
स्यात् सङ्ख्यावाचिनः स्तोमेऽर्थे डट् पञ्चदशो यथा ॥१७६॥

## तमर्हति ॥ ६ ॥ ४ ॥ १७७ ॥

अर्हदथ द्वितीयान्तात्, प्रत्ययः स्वाद्यथाविधि ।
श्वैतच्छत्रिक-साहस्र-शत्य-वैषिक-वास्त्रिकाः ॥ १७७ ॥

## दण्डादेर्यः ॥ ६ ॥ ४ ॥ १७८ ॥

अर्हत्यर्थे द्वितीयान्त-दण्डादेर्यो भवेत्ततः ।
यो धर्मशासनं हन्ति, दण्ड्योऽसौ दण्डमर्हति ॥ १७८ ॥

---

स्पष्टम् ॥ १७४ ॥ एवम्-पञ्चद्, दशद्, दशकः ॥ १७६ ॥ ऋगादीनां समूहः स्तोमः ॥ १७६ ॥ स्पष्टम् ॥ १७७ ॥ इकणोऽपवादः । एकादश दण्डादयः ॥ १७८ ॥

## यज्ञादियः ॥ ६ ॥ ४ ॥ १७९ ॥

यज्ञशब्दाद् द्वितीयान्ता-दर्हत्यर्थे भवेदियः ।
यजमानोऽथवा देशो, यज्ञमर्हति यज्ञियः ॥ १७९ ॥

## पात्रात्तौ ॥ ६ ॥ ४ ॥ १८० ॥

अर्हत्यर्थे द्वितीयान्ता-द्येयौ स्तः पात्रशब्दतः ।
मुनयः पात्रमर्हन्ति, तेन पात्र्याश्च पात्रियाः ॥ १८० ॥

## दक्षिणाकडङ्गरस्थालीबिलादीययौ ॥ ६ ॥ ४ ॥ १८१ ॥

अर्हत्यर्थे द्वितीयान्त-दक्षिणादिभ्य आमतौ ।
येयौ गुरुश्च दक्षिण्यो, दक्षिणीयो सतां मतः ॥१८१॥

## छेदादेर्नित्यम् ॥ ६ ॥ ४ ॥ १८२ ॥

छेदादितो द्वितीयान्तात्, प्रत्ययो नित्यमर्हति ।
स्याद्यथाविहितं छेदं, छैदिको नित्यमर्हति ॥ १८२ ॥

## विरागाद्विरङ्गश्च ॥ ६ ॥ ४ ॥ १८३ ॥

प्रत्ययः पूर्ववन्नित्य-मर्हत्यर्थे विरागतः ।
विरङ्गश्चास्य तं नित्य, वन्दे वैरङ्गिकं जिनम् ॥ १८३ ॥

---

सूत्रद्वयं स्पष्टम् ॥ १७९ ॥ १८० ॥ एवं कडङ्गरीयः, कडङ्गरीयो गौः । कडङ्गरं माषादिकाष्ठम् । स्थालीबिलीयास्तण्डुलाः पाकार्हा इत्यर्थः ॥१८१॥ छेदादयः षोडश ॥ १८२ ॥ स्पष्टम् ॥ १८३ ॥

## शीर्षच्छेदाद्यो वा ॥ ६ ॥ ४ ॥ १८४ ॥

शीर्षच्छेदाद् द्वितीयान्ताद्, भवेद् यः प्रत्ययो नवा ।
अर्हति नित्यमित्यर्थे, शीर्षच्छेद्यः खलो जनः ॥ १८४ ॥

## शालीनकौपीनार्त्विजीनम् ॥ ६ ॥ ४ ॥ १८५ ॥

ईनञन्ता निपात्यन्ते, ते शालीनादयस्त्रयः ।
अर्थे तमर्हति स्वस्थाः, स्युः शालीनादयः परम् ॥१८५॥

इतिषष्ठोऽध्यायः ।

---

पक्षे इकण् तेन शैर्षच्छेदिकः ॥ १८४ ॥ शालीनशब्दोऽधृष्टपर्यायः । कौपीनशब्दः पापकर्मणि गोपनीयपायूपस्थे तदावरणे च चीवरखण्डे वर्तते । ऋत्विक्शब्दः प्रसिद्धार्थः ॥ १८५ ॥ **इतिषष्ठोऽध्यायः ।**

# अथ सप्तमोऽध्यायः

## यः ॥ ७ ॥ १ ॥ १ ॥

यावदीयाधिकारं स्याद्, याधिकार इतः परम् ।
अपवादं परित्यज्या,–धिकृतः सूत्रतो ह्यतः ॥ १ ॥

## वहति रथयुगप्रासङ्गात् ॥ ७ ॥ १ ॥ २ ॥

वहत्यथ द्वितीयान्ताद्, यः प्रासङ्गाद्रथाद्युगात् ।
रथ्यो युग्यो भवेत् कालात्, प्रासङ्ग्योऽपि धुरन्धरः ॥२॥

## धुरो यैयण् ॥ ७ ॥ १ ॥ ३ ॥

वहत्यर्थे द्वितीयान्ताद्, यैयणौ भवतो धुरः
धुर्यस्तथैव धौरेयो, धुरं वहति सत्वरम् ॥ ३ ॥

## वामाद्यादेरीनः ॥ ७ ॥ १ ॥ ४ ॥

वहतीनो द्वितीयान्ताद्, वामादितो धुरन्ततः ।
सर्वधुरीणतो वाम–धुरीणः किं विशिष्यते ॥ ४ ॥

---

स्पष्टम् ॥ १ ॥ यत् काण्ठं वत्सानां दमनकाले स्कन्ध आसज्यते तत् प्रासङ्गः ॥ २ ॥ एयण् वेत्यकृत्वा यग्रहणमर्थविवक्षायां वहत्यर्थेऽण्बाधनार्थम् ॥ ३ ॥ वामा पूर्वामधुरा, समासान्ताद्दाप् । वामाद्यः प्रयोगगम्याः ॥ ४ ॥

## अश्वैकादेः ॥ ७ ॥ १ ॥ ५ ॥

अश्वेनश्च द्वितीयान्ता–देकादितो धुरन्ततः ।
स्यातामेकधुरीणैक–धुरावेकधुरावहे ॥ ५ ॥

## हलसीरादिकण् ॥ ७ ॥ १ ॥ ६ ॥

वहत्यर्थे द्वितीयान्ताद्, हलात् सीराद्धवेदिकण् ।
वहति सैरिकः सीरं, हलं वहति हालिकः ॥ ६ ॥

## शकटादण् ॥ ७ ॥ १ ॥ ७ ॥

अण् शकटाद् द्वितीयान्ता – द्वहत्यर्थे भवेत्ततः ।
वहन्ति शकटं गावः, शाकटा गलयो न वै ॥ ७ ॥

## विध्यत्यनन्येन ॥ ७ ॥ १ ॥ ८ ॥

अनन्येन द्वितीयान्ताद्, विध्यत्यर्थे हि यो भवेत् ।
उरस्योरव्यपद्याः स्यु – र्वातकण्टकशर्कराः ॥ ८ ॥

## धनगणाल्लब्धरि ॥ ७ ॥ १ ॥ ९ ॥

लब्धर्यर्थे द्वितीयान्ताद्, धनाद्गणाच्च यो भवेत् ।
धन्यो नरो धनं लब्धा, गण्यो लब्धा गणं तथा ॥ ९ ॥

---

स्पष्टं सूत्रत्रयम् ॥ ५ ॥ ६ ॥ ॥ ७ ॥ अनन्येनेति किम् ? चौरं विध्यति चैत्रः । अत्र हि चैत्रश्चौरं विध्यन् धनुषा पाषाणेन विध्यति । शर्करादयस्तु न करणेन विध्यन्ति ॥८॥ स्पष्टे ॥९॥१०॥

## णोऽन्नात् ॥ ७ ॥ १ ॥ १० ॥

अन्नशब्दाद् द्वितीयान्ता-ल्लब्धर्यर्थे भवेच्च णः ।
दुर्भिक्षेऽपि भवेदान्नो, लब्धाऽन्नं पुण्ययोगतः ॥ १० ॥

## हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्यधेनुष्या-गार्हपत्यजन्यधर्म्यम् ॥ ७ ॥ १ ॥ ११ ॥

हृद्यादयो निपात्यन्ते-ऽर्थविशेषे यथायथम् ।
हृद्यं पथ्यं सदा भोज्यं, वयस्यो धर्म्य उत्तमः ॥ ११ ॥

## नौविषेण तार्यवध्ये ॥ ७ ॥ १ ॥ १२ ॥

यः स्यान्नौतस्तृतीयान्ता - त्तार्ये वध्ये विषात्तथा ।
नाव्या तार्य्यं भवेन्नाव्यं, विष्यो वध्यो विषेण च ॥ १२ ॥

## न्यायार्थादनपेते ॥ ७ ॥ १ ॥ १३ ॥

योऽनपेते भवेत् पञ्च - म्यन्तान्न्यायात्तथाऽर्थतः ।
यदि न्याय्यं भवेत् सर्व - मर्थ्यं तर्हि न संशयः ॥ १३ ॥

## मतमदस्य करणे ॥ ७ ॥ १ ॥ १४ ॥

मतान्मदाच्च षष्ठयन्तात्, करणेऽर्थे यो भवेत्ततः ।
यदि मत्यमभीष्टं स्या - न्मद्यं मुञ्चत दूरतः ॥ १४ ॥

---

एवं पद्यः तुल्यम्, मूल्यम्, वश्यः, धेनुष्या, गार्हपत्यः, जन्य इति । एतेषां प्रकृतिप्रत्ययनिपातनादिकं बृहद्वृत्तेरवसेयम् ॥११॥ स्पष्टे ॥१२॥१३॥ इष्टं साम्यं ज्ञानं मतिर्वा मतशब्देनोच्यते । करणं साधकतमं कृतिर्वा ॥१४॥

## तत्र साधौ ॥ ७ ॥ १ ॥ १५ ॥

सप्तम्यन्ताद् भवेत् साधा – वर्थे यः प्रत्ययस्ततः ।
कर्मण्यः कर्म सत् कृत्वा, शरण्यो जातु जायते ॥ १५ ॥

## पथ्यतिथिवसतिस्वपतेरेयण् ॥ ७ ॥ १ ॥ १६ ॥

पथ्यादिभ्यो भवेदेयण्, तत्र साधौ किलार्थतः ।
वासतेयातिथेये च, पाथेयं स्वापतेयकम् ॥ १६ ॥

## भक्ताण्णः ॥ ७ ॥ १ ॥ १७ ॥

णः प्रत्ययो भवेत्तत्र–साधौ वै भक्तशब्दतः ।
भक्ते साधुर्भवेद्भाक्तः, शालिर्भाक्ताश्च तण्डुलाः ॥ १७ ॥

## पर्षदो ण्यणौ ॥ ७ ॥ १ ॥ १८ ॥

स्तः पर्षच्छब्दतस्तत्र–साधौ ण्यश्च तथैव णः ।
पार्षद्यः पार्षदः पर्ष–द्भूषणं गतदूषणः ॥ १८ ॥

## सर्वजनाण्ण्येनञौ ॥ ७ ॥ १ ॥ ॥ १९ ॥

तत्र साधौ भवेतां ण्य – श्चेनञ् सर्वजनात्ततः ।
सार्वजन्यस्तथा सार्व–जनीनो विरलो जनः ॥ १९ ॥

---

साधुः प्रवीणो योग्य उपकारको वा ॥ १५ ॥ स्पष्टे ॥ १६ ॥ १७ ॥
परिषद्दोऽपीच्छन्त्यन्ये, पारिषद्यः, पारिषदः ॥ १८ ॥ स्पष्टम् ॥ १९ ॥

## प्रतिजनादेरीनञ् ॥ ७ ॥ १ ॥ २० ॥

ईनञ् प्रतिजनादिभ्य – स्तत्र साधौ भवेत्ततः ।
प्रातिजनीन ऐदंयु–गीन आनुजनीनकः ॥ २० ॥

## कथादेरिकण् ॥ ७ ॥ १ ॥ २१ ॥

सप्तम्यन्तकथादिभ्यः, साधावर्थे भवेदिकण् ।
भवेद्वैकथिको मूढो–ऽमूढश्च कथिको जनः ॥ २१ ॥

## देवतान्तात्तदर्थे ॥ ७ ॥ १ ॥ २२ ॥

तदर्थेऽर्थाच्चतुर्थ्यन्ताद्, भवेद्यो देवतान्ततः ।
आग्निदेवत्यमाचर्य, देवदेवत्यमीहते ॥ २२ ॥

## पाद्यार्घ्ये ॥ ७ ॥ १ ॥ २३ ॥

पाद्यं चार्घ्यं निपात्येते, तदर्थे यान्तरूपतः ।
पादार्थमुदकं पाद्य–मातिथ्यप्रथमं सताम् ॥ २३ ॥

## ञ्योऽतिथेः ॥ ७ ॥ १ ॥ २४ ॥

ञ्यप्रत्ययो भवेदेव, तदर्थेऽतिथिशब्दतः ।
सानुरागं विधातव्य–मातिथ्यं गृहमेधिना ॥ २४ ॥

---

द्वादश प्रतिजनादयः ॥ २० ॥ त्रिंशत् कथादयः ॥ २१ ॥ स्पष्टम् ॥ २२ ॥ अर्घो मूल्यं पूजनं वा, अर्घार्थरत्नमर्घ्यम् ॥ २३ ॥ स्पष्टे ॥ २४ ॥ २५ ॥

## सादेश्चातदः ॥ ७ ॥ १ ॥ २५ ॥

तदिति सूत्रपर्यन्त – मित ऊर्ध्वं सुधीवरैः ॥
सादेश्च केवलस्यापि, वेदितव्यो विधिर्वरः ॥ २५ ॥

## हलस्य कर्षे ॥ ७ ॥ १ ॥ २६ ॥

सादेश्च केवलात् कर्षे, षष्ठ्यन्ताद्यो हलाद् भवेत् ।
हल्या हल्यो द्विहल्या वा, कर्षो हलस्य बुध्यताम् ॥ २६ ॥

## सीतया सङ्गते ॥ ७ ॥ १ ॥ २७ ॥

साद्यसादितृतीयान्त – सीतातो यश्च सङ्गते ।
सीतया सङ्गतं सीत्यं, परमसीत्यमित्यपि ॥ २७ ॥

## ईयः ॥ ७ ॥ १ ॥ २८ ॥

यदितोऽनुक्रमिष्याम्या–ऽतदोऽर्थेष्वीय इत्यहो ।
वेद्यमधिकृतं तत्रा–स्मात् सूत्रादधिकारतः ॥ २८ ॥

## हविरन्नभेदापूपादेर्यो वा ॥ ७ ॥ १ ॥ २९ ॥

अन्नभेदाद् हविर्भेदा–दपूपादेश्च यो नवा ।
अपूपीयमपूप्यं वाऽऽ–मिक्ष्यामिक्षीययोः कृते ॥ २९ ॥

---

यत्र हलं कृष्टं स मार्गः कर्षः । कृष्यते इति कर्षः, क्षेत्रमित्यन्ये ॥२६॥
यस्य पूर्णोऽवधिः ॥२७॥ स्पष्टम् ॥२८॥ विंशतिरपूपादयः ॥२९॥

## उवर्णयुगादेर्यः ॥ ७ ॥ १ ॥ ३० ॥

उवर्णान्ताद् युगादिभ्य–श्चातदोऽर्थेषु यो भवेत् ।
शङ्कव्यं दारु कर्पासः, पिचव्यो युग्यमित्यपि ॥ ३० ॥

## नाभेर्नभ् चादेहांशात् ॥ ७ ॥ १ ॥ ३१ ॥

यः स्यान्नाभेरदेहांशा–न्नभादेशस्तथाऽऽतदः ।
नभ्यं दारु च नभ्योऽक्षो–ऽगो नभ्यो नभ्यमञ्जनम् ॥३१॥

## न् चोधसः ॥ ७ ॥ १ ॥ ३२ ॥

ऊधस आतदोऽर्थेषु, नन्तादेशश्च यो भवेत् ।
अपवादोऽयमीयस्य, ह्यूधन्यं हितमूधसे ॥ ३२ ॥

## शुनो वश्चोदूत् ॥ ७ ॥ १ ॥ ३३ ॥

श्वन्शब्दादातदोऽर्थेषु, यो वश्चोदूच्च जायते ।
शुने हितं भवेच्छुन्यं, तथैव शून्यमित्यपि ॥ ३३ ॥

## कम्बलान्नाम्नि ॥ ७ ॥ १ ॥ ३४ ॥

आतदोऽर्थेषु यो नाम्नि, भवेत् कम्बलशब्दतः ।
कम्बल्यं कम्बलोऽस्य स्यात्, परिमाणमनेकधा ॥ ३४ ॥

---

एकोनविंशतिर्युगादयः ॥३०॥ स्पष्टे ॥ ३१ ॥ ३२ ॥ नाभि–ऊधस्श्वन्-शब्दान् युगादिषु पठित्वाऽपि शक्यः प्रत्ययः, आदेशार्थास्तु योगाः ॥ ३३ ॥ नाम्नीति किम्? कम्बलीया ऊर्णा ॥ ३४ ॥

## तस्मै हिते ॥ ७ ॥ १ ॥ ३५ ॥

स्याद्यथाधिकृतं तस्मै, नामतः प्रत्ययो हिते ।
वत्सीयः करभीयश्चा – करभीयोऽपि सम्मतः ॥ ३५ ॥

## न राजाचार्यब्राह्मणवृष्णः ॥ ७ ॥ १ ॥ ३५ ॥

प्रत्ययोऽधिकृतो राजा – देश्चतुष्काद् हिते नहि ।
चतुर्थ्यन्ताद् भवेद् राज्ञे हितो वाक्यं न चापरम् ॥ २६ ॥

## प्राण्यङ्गरथखलतिलयववृषब्रह्ममाषाद्यः ॥ ७ ॥ १ ॥ ३७ ॥

तस्मै प्राण्यङ्गवाचिभ्यो, रथादिभ्यश्च यो हिते ।
दन्त्यं लवणमाज्यं च–क्षुष्यं रथ्या वसुन्धरा ॥ ३७ ॥

## अव्यजात् थ्यप् ॥ ७ ॥ १ ॥ ३८ ॥

स्यादवि–अज इत्येता–भ्यां थ्यप् तस्मै हिते ततः ।
स्यादविथ्यमविभ्यश्चा–जेभ्योऽजथ्यं हितं मतम् ॥ ३८ ॥

## चरकमाणवादीनञ् ॥ ७ ॥ १ ॥ ३९ ॥

चरकान्माणवाच्चेनञ्, भवेत्तस्मै हिते ततः ।
चारकीणो हितस्तेभ्यो माणवीनोऽपि सम्मतः ॥ ३९ ॥

---

स्पष्टम् ॥ ३५ ॥ एवम् आचार्याय हितः, ब्राह्मणाय हितः, वृष्णे हित इति वाक्यमेव भवति ॥३६॥ सादेश्चेत्यधिकाराद् राजदन्त्यमित्यादि ॥३७॥ पकारः पुँवद्भावार्थः, अजाभ्यो हिता अजथ्या युतिः ॥३८॥ स्पष्टम् ॥३९॥

## भोगोत्तरपदात्मभ्यामीनः ॥ ७ ॥ १ ॥ ४० ॥

भोगोत्तरपदादात्मन् – शब्दाच्चेनो हिते ततः ।
मातृभोगीणनां बुद्ध्वा, भवात्मनीन आत्मने ॥४० ॥

## पञ्चसर्वविश्वाज्जनात् कर्मधारये ॥ ७ ॥ १ ॥ ४१ ॥

स्यात् पञ्चसर्वविश्वाद्या – ज्जनतः कर्मधारये ।
ईनस्तस्मै हिते विश्व–जनीनो भगवान् भुवि ॥ ४१ ॥

## महत्सर्वादिकण् ॥ ७ ॥ १ ॥ ४२ ॥

महत्सर्वादितस्तस्मै, हिते स्यात् कर्मधारये ।
जनादिकण् जनः कश्चि – न्माहाजनिक आप्यते ॥ ४२ ॥

## सर्वाण्णो वा ॥ ७ ॥ १ ॥ ४३ ॥

सर्वशब्दाद्भवेत्तस्मै, हिते णः प्रत्ययो नवा ।
ना सर्वस्मै हितः सार्वः, सर्वीयोऽपि विकल्पनात् ॥४३॥

---

'इनेऽध्वात्मनोः' ७-४-४८ इत्यन्त्यस्वरादिलोपाभावः ॥४०॥ ईयापवादः पञ्चजनेभ्यः, पञ्चजनाय वा हितः पञ्चजनीनः । रथकारपञ्चमस्य चातुर्वर्ण्यस्य पञ्चजन इतिसंज्ञा ; एवं सर्वजनीनः । कर्मधारय इति किम् ? पञ्चानां जनस्तस्मै हितः पञ्चजनीयः ॥४१॥ एवं सार्वजनिकः । एवञ्च सर्वजनात् पूर्वेण ईनः, अनेनेकण् इति द्वैरूप्यम् ॥ ४२ ॥ स्पष्टम् ॥ ४३ ॥

## परिणामिनि तदर्थे ॥ ७ ॥ १ ॥ ४४ ॥

चतुर्थ्यन्तात्तदर्थे स्यात्, प्रत्ययः परिणामिनि ।
यथाधिकृतमङ्गारी–याणि काष्ठानि पश्यताम् ॥ ४४ ॥

## चर्मण्यञ् ॥ ७ ॥ १ ॥ ४५ ॥

अञ् चर्मणि चतुर्थ्यन्ता–त्तदर्थे परिणामिनि ।
वारत्रं चर्म वार्ध्रं च, राथोपस्थं च किञ्चन ॥ ४५ ॥

## ऋषभोपानहाञ्ञ्यः ॥ ७ ॥ १ ॥ ४६ ॥

तुर्यान्ताभ्यां तदर्थे ञ्यः, स्यादाभ्यां परिणामिनि ।
औपानह्यो भवेन्मुञ्ज, आर्षभ्यो वत्स ईप्सितः ॥ ४६ ॥

## छदिर्बलेरेयण् ॥ ७ ॥ १ ॥ ४७ ॥

चतुर्थ्यन्ताद्बलेरेयण्, छदिषश्च तदर्थतः ।
परिणामिनि बालेयः, छादिषेयाणि बुध्यताम् ॥ ४७ ॥

---

परिणामिनि कारणद्रव्येऽभिधेय इत्यर्थः, तदभावे तु उदकाय कूपः, असये कोशीत्यत्र न कूपः कोशी वा उदकासिभावेन परिणमेत इति न प्रत्ययः । तदर्थे इति किम्? मूत्राय यवागूः । उच्चाराय यवान्नम् । पादरोगाय नड्वलोदकम् । यवाग्वादि मूत्रादितया परिणमति नतु तदर्थम् । अथवा तदर्थे इति चतुर्थीविशेषणम् । तदर्थे या चतुर्थी तदन्तात् प्रत्ययः । इह तु संपद्यतौ चतुर्थीति न भवति । तस्मै इत्येव सक्तूनां धानाः ॥४४॥ स्पष्टम् ॥४५॥ स्पष्टं सूत्रत्रयम् ॥ ४६ ॥ ४७ ॥ ४८ ॥

## परिखास्य स्यात् ॥ ७ ॥ १ ॥ ४८ ॥

आद्यान्तात् परिखाशब्दात्, षष्ठ्यर्थे परिणामिनि ।
एयण् योग्यतया सा चेत्, पारिखेयाः किलेष्टकाः ॥ ४८ ॥

## अत्र च ॥ ७ ॥ १ ॥ ४९ ॥

सप्तम्यर्थे भवेदेयण्, परिखातश्च पूर्ववत् ।
स्याद्भूमिः पारिखेय्यत्र, न योज्यं परिणामिनि ॥ ४९ ॥

## तद् ॥ ७ ॥ १ ॥ ५० ॥

सप्तम्यर्थे च षष्ठ्यर्थे, प्रत्ययः परिणामिनि ।
यथाधिकृतमाद्यान्तात्, प्राकारीया स्युरिष्टकाः ॥ ५० ॥

## तस्यार्हे क्रियायां वत् ॥ ७ ॥ १ ॥ ५१ ॥

षष्ठ्यन्ततो भवेदर्हे, वत्प्रत्ययः यदि क्रिया ।
स शिरांसि द्विषामाजौ, चिच्छेद कृतहस्तवत् ॥ ५१ ॥

## स्यादेरिवे ॥ ७ ॥ १ ॥ ५२ ॥

स्यात् स्याद्यन्तादिवार्थे वत्, सादृश्यं चेत् क्रियागतम् ।
अश्ववद्धावति द्राक् स, मुनिं पश्यति देववत् ॥ ५२ ॥

---

योगविभागः परिणामिनीत्यस्येह असम्बन्धार्थः ॥ ४९ ॥ परिणामिनीत्येव प्रासादोऽस्य चैत्रस्य स्यात् ॥ ५० ॥ क्रियायामिति किम् ? शतस्यार्हो देवदत्तः । राज्ञोऽर्हो मणिः ॥ ५१ ॥ स्यादेरिति किम् ? गच्छतास्त इव मन्दत्वादीप्सितदेशस्यासंप्राप्तेः । अश्वीयानो नृत्यतीव अङ्गविकारप्रायत्वात् । क्रियागतमित्येव गौरिव गवयः ॥ ५२ ॥

## तत्र ॥ ७ ॥ १ ॥ ५३ ॥

सप्तम्यन्तादिवार्थे स्या-द्वत्प्रत्ययस्ततस्ततः ।
अस्ति पाटलिपुत्रेऽपि, मथुरावन्महद्‌द्रहम् ॥ ५३ ॥

## तस्य ॥ ७ ॥ १ ॥ ५४ ॥

इवार्थे प्रत्ययो वत् स्यात्, षष्ठयन्ततस्ततस्ततः ।
चैत्रवद्धनवः कामं, देवदत्तस्य दुग्धदाः ॥ ५४ ॥

## भावेत्वतल् ॥ ७ ॥ १ ॥ ५५ ॥

षष्ठयन्तात्त्वतलौ भावे-ऽभिधेये प्रत्ययो परौ ।
गोत्वं गोता भवेद्भावो, गोः शब्दस्य सनातनः ॥ ५५ ॥

## प्राक्त्वादगडुलादेः ॥ ७ ॥ १ ॥ ५६ ॥

त्वतलौ प्रत्ययौ प्राक् त्वात्, स्यातामधिकृतौ विना ।
गडुलादीन्न तु गाडुल्यं, कामण्डलव्यमूह्यताम् ॥ ५६ ॥

---

अक्रियार्थस्त्वारम्भः ॥ ५३ ॥ अक्रियाविषयसादृश्यार्थ आरम्भः । योगविभाग उत्तरार्थः ॥ ५४ ॥ भवतोऽस्मात् अभिधानप्रत्ययौ इति भावः शब्दस्य प्रवृत्तिनिमित्तम्, द्रव्यसंसर्गी भेदको गुणः । यदाहुः यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति । तत्र 'जातिगुणाज्ञातिगुणे, समासकृत्तद्धितात्तु सम्बन्धे । डित्थादेः स्वे रूपे, त्वतलादीनां विधिर्भवति ॥१॥' अधिकं बृहद्वृत्तेरवसेयमिति ॥ ५५ ॥ गडुलादयोऽष्टौ ॥ ५६ ॥

## नञ्तत्पुरुषादबुधादेः ॥ ७ ॥ १ ॥ ५७ ॥

नञ्तत्पुरुषतः प्राक् त्वाद्, भवतस्त्वतलौ विना ।
बुधादीनधिकारोऽयं, ज्ञेयष्ट्यणादि बाधकः ॥ ५७ ॥

## पृथ्वादेरिमन् वा ॥ ७ ॥ १ ॥ ५८ ॥

पृथु इत्येवमादिभ्यो, नवा भावे भवेदिमन् ।
प्रथिमा च पृथुत्वं च, पृथुता पार्थवं तथा ॥ ५८ ॥

## वर्णदृढादिभ्यष्ट्यण् च वा ॥ ७ ॥ १ ॥ ५९ ॥

वर्णविशेषवाचिभ्यो, दृढादिभ्यश्च भावतः
स्तो वा ट्यणिमनौ शौक्ल्यं, शुक्लिमा शुक्लता तथा ॥५९॥

## पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च ॥ ७ ॥ १ ॥ ६० ॥

पतिराजान्तशब्देभ्यो, राजादिभ्यो गुणाङ्गतः ।
षष्ठ्यन्तेभ्यो भवेद्भावे, कर्मणि ट्यण् तथेतरौ ॥ ६० ॥

---

बुधादयोऽष्टाविंशतिः॥ उदाहरणादि टीकातोऽवसेयम् ॥५७॥ पृथ्वादयोऽष्टात्रिंशत् । बहुलस्य भावो बंहिमा । इमनि बहुलस्य 'प्रियस्थिर-' ७-४-३८ इत्यादिना बंहभावः ॥ ५८ ॥ प्राक्त्वादित्यधिकारात् त्वतलौ च । वावचनाद्यथाण् प्राप्नोति सोऽपि भवति । सप्तविंशतिः दृढादयः । बहुवचनादाकृतिगणोऽयम् : तेन स्थैर्यं स्थेमेत्याद्यपि सिद्धम् ॥५९॥ इतरौ त्वतलौ । आधिपत्यम् , अधिपतित्वम् , अधिपतिता । आधिराज्यम् , अधिराजत्वम् , अधिराजता । मौढ्यम् , मूढत्वम् , मूढता राज्यम् , राजत्वम् , राजता । राजादयश्चत्वारिंशत् । राजादिराकृतिगणः ॥ ६० ॥

## अर्हतस्तो न्तु च ॥ ७ ॥ १ ॥ ६१ ॥

षष्ठ्यन्तादर्हतो भावे, कर्मणि ट्यण् तथा न्तु च तः ।
भूर्भुवःस्वस्त्रयीशान–मार्हन्त्यं प्रणिदध्महे ॥ ६१ ॥

## सहायाद्वा ॥ ७ ॥ १ ॥ ६२ ॥

भावे कर्मणि षष्ठ्यन्तात्, सहायाट्ट्यण् भवेन्नवा ।
साहायकं च साहाय्यं, सहायत्वं सहायता ॥ ६२ ॥

## सखिवणिग्दूताद्यः ॥ ७ ॥ १ ॥ ६२ ॥

यः स्यात् सखिवणिग्दूतात्, षष्ठ्यन्ताद्भावकर्मणोः ।
सख्यं दूत्यं वणिज्यं च, सखित्वं सखिता पुनः ॥ ६३ ॥

## स्तेनान्नलुक् च ॥ ७ ॥ १ ॥ ६४ ॥

स्तेनात् कर्मणि भावे य–स्तथा च तस्य लुग् भवेत् ।
नूनं न श्रेयसे स्तेयं, स्तेनत्वं स्तेनता तथा ॥ ६४ ॥

---

अरिहननात् रजोहननात् रहस्याभावाच्च अर्हन् पृषोदरादित्वात् । यद्वा चतुस्त्रिंशतमतिशयान् सुरेन्द्रादिकृतां पूजां वाऽर्हतीति अर्हन् । तस्य भावः कर्म वा आर्हन्त्यम्, आर्हन्ती । प्राक्त्वादिति त्वतलौ च । अर्हत्त्वम् । अर्हत्ता ॥ ६१ ॥ वाक्वनात् पक्षे योपान्त्यलक्षणोऽकञ्; त्वतलौ च यथावत् ॥६२॥ स्पष्टम् ॥६३॥ राजादिदर्शनात् स्तैन्यमपि भवति ॥ ६४ ॥

## कपिज्ञातेरेयण् ॥ ७ ॥ १ ॥ ६५ ॥

कपितो ज्ञातितो भावे, कर्मण्येयण् भवेत्ततः ।
कपित्वमथ कापेयं, ज्ञानेयं ज्ञातिना तथा ॥ ६५ ॥

## प्राणिजातिवयोऽर्थादञ् ॥ ७ ॥ १ ॥ ६६ ॥

प्राणिजातेर्वयोऽर्थाच्चाञ्, भवेद्भावे च कर्मणि ।
कुमारत्वञ्च कौमार-माश्वमश्वत्वमश्वता ॥ ६६ ॥

## युवादेरण् ॥ ७ ॥ १ ॥ ६७ ॥

युवादिभ्यो भवेद्भावे, कर्मणि चाण् च यौवनम् ।
युवत्वं युवता कार्य-मात्रं साधयतीप्सितम् ॥ ६७ ॥

## हायनान्तात् ॥ ७ ॥ १ ॥ ६८ ॥

शब्देभ्यो हायनान्तेभ्यो, भावे कर्मणि चाण् भवेत् ।
त्वतलौ च भवेतां द्वै-हायनं पाञ्चहायनम् ॥ ६८ ॥

---

कपेः इकारान्तत्वादणि प्राप्ते ज्ञातेश्च प्राणिजातित्वादञि प्राप्ते वचनम् ॥६५॥ प्राणिग्रहणं किम् ? तृणत्वम्, तृणता । जातिग्रहणं किम् ? देवदत्तत्वम्, देवदत्तता ॥ ६६ ॥ यूनो लिङ्गविशिष्टस्यापि ग्रहणात् युवतेर्भावः कर्म वा यौवनमित्यादि । चौरादिपाठाद्यौवनिकेत्यपि भवति । सप्तचत्वारिंशद्युवादयः ॥ ६७ ॥ द्वैहायनम्, चातुर्हायनम् अप्राणिवयोवाचित्वात् 'चतुस्त्रेर्हायनस्य वयसि' २-३-७५ इति णत्वं न भवति ॥ ६८ ॥

## य्वृवर्णाल्लघ्वादेः ॥ ७ ॥ १ ॥ ६९ ॥

अण् लघ्वादेर्य्वृवर्णान्ता–त्तस्य भावे च कर्मणि ।
साम्मतं शाकुनं मौनं, शौचं च शुचिता यथा ॥ ६९ ॥

## पुरुषहृदयादसमासे ॥ ७ ॥ १ ॥ ७० ॥

असमासे भवेदाभ्यां, भावे कर्मणि चाण् ततः ।
हार्दं च पौरुषं प्रायः, सत्पुरुषत्वमृच्छति ॥ ७० ॥

## श्रोत्रियाद्यलुक् च ॥ ७ ॥ १ ॥ ७१ ॥

अण्त्वतला यलोपोऽणि, श्रोत्रियाद्भावकर्मणोः ।
श्रौत्रं श्रोत्रियता श्रोत्रि–यत्वं श्रौत्रियकं पुनः ॥ ७१ ॥

## योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ् ॥ ७ ॥ १ ॥ ७२ ॥

स्याद् गुरूपोत्तमाद्योपा–न्त्यादसुप्रख्यतस्त्वकञ् ।
भावे कर्मणि तद्राम–णीयकं रमणीयता ॥ ७२ ॥

---

य्वृवर्णादिति किम्? पटत्वम्, घटत्वम्। लघ्वादेरिति किम्? पाण्डुत्वम्, कण्डूत्वम् ॥ ६९ ॥ 'हृदयस्य हृल्लासलेखाण्ये' ३–२–९४ इति हृद्भावः। एवं हृदयत्वं हृदयताद्यपि। सत्पुरुषत्वमिति असमास इत्यस्य फलम् ॥ ७० ॥ श्रौत्रियकं चौरादिपाठादकञि ॥ ७१ ॥ त्रिप्रभृतीनामन्त्यमुत्तमम्, तत्समीपमुपोत्तमम्। गुरुग्रहणादनेकव्यञ्जनव्यवधानेऽपि भवति, आचार्य्यकम्। गुरुग्रहणं हि दीर्घपरिग्रहार्थं संयोगपरपरिग्रहार्थं च। योपान्त्यादिति किम्? कापोतं, विमानत्वम्। गुरूपोत्तमादिति किम्? क्षत्रियत्वम्, कायत्वम् ॥ ७२ ॥

## चौरादेः ॥ ७ ॥ १ ॥ ७३ ॥

चौरादिभ्यस्त्वकञ् भावे, कर्मणि त्वतलौ पुनः ।
चौरिका चौरकं दुष्टं, चौरत्वमथ चौरता ॥ ७३ ॥

## द्वन्द्वाल्लित् ॥ ७ ॥ १ ॥ ७४ ॥

अकञ् कर्मणि भावे लिद्, भवेद् द्वन्द्वसमासतः ।
शैष्योपाध्यायिका कौत्स-कुशिकिका च वैत्रिका ॥७४॥

## गोत्रचरणाच्छ्लाघात्याकारप्राप्त्यवगमे ॥ ७ ॥ १ ॥ ७५ ॥

गोत्रचरणवाचिभ्यां, श्लाघादौ लिदकञ् भवेत् ।
प्राप्तवान् गार्गिकां भूयः, काठिकया विकत्थते ॥ ७५ ॥

## होत्राभ्य ईयः ॥ ७ ॥ १ ॥ ७६ ॥

ऋत्विग्विशेषवाचिभ्य, ईयो भावे च कर्मणि ।
अग्नीध्रीयं तथा मैत्रा-वरुणीयमुदाहरेत् ॥ ७६ ॥

---

चौरादय एकत्रिंशत् । मनोज्ञादीनामकञन्तानां नपुंसकत्वमेव । पूर्वेषां तु 'चौराद्यमनोज्ञाद्यकञिति स्त्रीनपुंसकते' । चौर्यमिति राजादित्वात् ट्यणपि ॥७३॥ विश्व पर्शी ना च नरः द्विनोर्भावः कर्म वा वैत्रिकी । अत्र 'ऋवर्णा-' ७-१-६९ इत्यणि प्राप्ते परत्वादकञ् ॥ ७४ ॥ श्लाघा विकत्थनम् । अत्याकारः पराधिक्षेपः । गोत्रमपत्यं प्रवराध्यायपठितं च । चरणं शाखानिमित्तं कठादि । श्लाघादिष्विति किम्? गार्ग. काठं प्राणिजातिलक्षणोऽञ् ॥ ७५ ॥ मैत्रावरुणादयस्तु ऋग्वचनाः । बहुवचनं स्वरूपविधिनिरासार्थम्, होत्राशब्दः ऋत्विग्विशेषवचनः ॥ ७६ ॥

## ब्रह्मणस्त्वः ॥ ७ ॥ १ ॥ ७७ ॥

स्यादृत्विग्वाचिनो ब्रह्मन्–शब्दात्त्वो भावकर्मणोः ।
ब्रह्मणः कर्म भावो वा, ब्रह्मत्वं भुवि राजते ॥ ७७ ॥

## शाकटशाकिनौ क्षेत्रे ॥ ७ ॥ १ ॥ ७८ ॥

क्षेत्रे षष्ठ्यन्ततः स्यातां, शाकटशाकिनौ परौ ।
स श्रीमान् यस्य पुण्ड्रेक्षु–शाकटमिक्षुशाकिनम् ॥ ७८ ॥

## धान्येभ्य ईनञ् ॥ ७ ॥ १ ॥ ७९ ॥

षष्ठ्यन्तधान्यवाचिभ्यः, क्षेत्रे स्यादीनञुत्तरः ।
कौलत्थीनं च मौद्गीनं, प्रैयङ्गवीणमित्यपि ॥ ७९ ॥

## व्रीहिशालेरेयण् ॥ ७ ॥ १ ॥ ८० ॥

एयण् स्याद् व्रीहिशालिभ्यां, तस्य क्षेत्रे वराऽर्थके ।
व्रैहेयमथ शालेय–मीनञतोऽपवादितः ॥ ८० ॥

## यवयवकषष्टिकाद्यः ॥ ७ ॥ १ ॥ ८१ ॥

यवयवकषष्टिकात्, क्षेत्रेऽर्थे तस्य यो भवेत् ।
यव्ययवक्यषाष्टिक्य–क्षेत्राणि कस्य नो प्रियम् ॥ ८१ ॥

---

ईयापवादः ॥ ७७ ॥ क्षेत्रं धान्यादीनामुत्पत्त्याधारभूमिः ॥ ७८ ॥ स्पष्टे ॥ ७९ ॥ ८० ॥ ईनञोऽपवादः । षष्टिरात्रेण पच्यमाना व्रीहयः षष्टिकाः । अत एव निपातनात् सिद्धिः ॥ ८१ ॥

## वाणुमाषात् ॥ ७ ॥ १ ॥ ८२ ॥

यः क्षेत्रेऽर्थेऽणुमाषाभ्यां, षष्ठ्यन्ताभ्यां नवा भवेत् ।
अणव्यमाणवीनश्च, माषीण माष्यमित्यपि ॥ ८२ ॥

## वोमाभङ्गातिलात् ॥ ७ ॥ १ ॥ ८३ ॥

उमाभङ्गातिलात् क्षेत्रे, षष्ठ्यन्ताद् यो भवेन्नवा ।
भङ्ग्योम्यौमीनभाङ्गीन-तिल्यतैलीनतो न किम् ? ॥८३॥

## अलाब्वाश्च कटो रजसि ॥ ७ ॥ १ ॥ ८४ ॥

कटोऽलाब्वा रजस्यर्थे, उमाभङ्गातिलात्तथा ।
रजोऽलाबूकटं भङ्गा-कटमुमाकटं पुनः ॥ ८४ ॥

## अह्ना गम्येऽश्वादीनञ् ॥ ७ ॥ १ ॥ ८५ ॥

एकेनाह्नाऽश्वतो गम्ये, ईनञ् षष्ठ्यन्ततो भवेत् ।
मासेनाश्वस्य गम्यात् स्या-दाश्वीनोऽध्वा सुखावहः ॥ ८५ ॥

## कुलाज्जल्पे ॥ ७ ॥ १ ॥ ८६ ॥

जल्पेऽर्थे कुलशब्दात् स्या-दीनञ् षष्ठ्यन्ततस्ततः ।
जल्पः कुलस्य कौलीनं, विश्वे सर्वत्र वीक्ष्यते ॥ ८६ ॥

---

पक्षे ईनञ् ॥ ८२ ॥ पक्षे ईनञ् । उमाभङ्गे अपि धान्ये एवेष्येते । योगविभाग उत्तरार्थः ॥ ८३ ॥ एवं तिलकटम् ॥ ८४ ॥ सूत्रचतुष्कं स्पष्टार्थम् ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥

पील्वादेः कुणः पाके ॥ ७ ॥ १ ॥ ८७ ॥

पील्वादिभ्यः कुणः पाके, षष्ठ्यन्तेभ्यो भवेत्ततः ।
पीलुकुणश्च कर्कन्धु-कुणः पील्वादिकाष्टकम् ॥ ८७ ॥

कर्णादेर्मूले जाहः ॥ ७ ॥ १ ॥ ८८ ॥

षष्ठ्यन्तकर्णमुखेभ्यो, मूले जाहो भवेत्ततः ।
भूजाहं कर्णजाहं च, कर्णादिर्दश पञ्च च ॥ ८८ ॥

पक्षात्तिः ॥ ७ ॥ १ ॥ ८९ ॥

तिः प्रत्ययो भवेन्मूले, षष्ठ्यन्तात् पक्षशब्दतः ।
पक्षतिः पक्षमूले स्या-दथापि प्रतिपत्तिथौ ॥ ८९ ॥

हिमादेलुः सहे ॥ ७ ॥ १ ॥ ९० ॥

षष्ठ्यन्ततो हिमादेलुः, सहमाने भवेत्ततः ।
हिमेलुर्मानवः किं स्यात्, सहिष्णुः सर्वकर्मणि ॥ ९० ॥

बलवातादूलः ॥ ७ ॥ १ ॥ ९१ ॥

षष्ठ्यन्तबलवाताभ्यां, स्यादूलः प्रत्ययः सहे ।
बलूलश्चाथ वातूलः, सहौ स्तो बलवातयोः ॥ ९१ ॥

---

मूलेऽप्यभिधेये शब्दशक्तिस्वाभाव्यात् स्त्रीलिङ्गः ॥८९॥ स्पष्टे ॥९०॥९१॥

## शीतोष्णतृप्रादालुरसहे ॥ ७ ॥ १ ॥ ९२ ॥

षष्ठ्यन्तेभ्यो भवेदेभ्य, आलुरसहमानके ।
नरः शीतालुरुष्णालु-स्तृप्रालुः किं करिष्यति ॥ ९२ ॥

## यथामुखसंमुखादीनस्तद् दृश्यतेऽस्मिन् ॥ ७ ॥ १ ॥ ९३ ॥

आभ्यामीनो भवेदस्मिन्, यदि तद् दृश्यते तथा ।
यथामुखीन आदर्शः, सम्मुखीनो विराजते ॥ ९३ ॥

## सर्वादेः पथ्यङ्गकर्मपत्रपात्रशरावं व्याप्नोति ॥ ७ ॥ १ ॥ ९४ ॥

सर्वादिकाद् द्वितीयान्ता-दीन पथ्यादिषट्कतः ।
व्याप्नोति सर्वकर्मीणो, ना सर्वाङ्गीण उत्तमः ॥ ९४ ॥

---

नृप्रम् दुःखम् ॥ ९२ ॥ यथामुखसंमुखइत्येताभ्यां तदिति प्रथमान्ताभ्यामस्मिन्निति सप्तम्यर्थे ईनः प्रत्ययो भवति यत्तत्प्रथमान्तं दृश्यते चेत्तद्भवति। मुखस्य सदृशोऽर्थो यथामुखं प्रतिबिम्ब उच्यते । अत एव निपातनाद्यथाथा ३-१-४१ इति प्रतिषेधेऽप्यव्ययीभावः । समं मुखं संमुखम्, समं मुखमस्यानेनेति वा संमुखं प्रतिबिम्बमेव । अत एव निपातनात् समशब्दस्य अन्तलोपः ॥ ९३ ॥ सर्वादेरिति किम् ? पन्थानं व्याप्नोति ॥ ९४ ॥

## आप्रपदम् ॥ ७ ॥ १ ॥ ९५ ॥

**आप्रपदाद् द्वितीयान्ता–दीनो व्याप्नोति जायते ।**
**पट आप्रपदीनोऽयं, किं तेन शयनार्थिनः ॥ ९५ ॥**

## अनुपदं बद्धा ॥ ७ ॥ १ ॥ ९६ ॥

**बद्धेत्यर्थे द्वितीयान्ता–दीनोऽनुपदशब्दतः ।**
**भवेदनुपदं बद्धोऽ–नुपदीना सुपादुका ॥ ९६ ॥**

## अयानयं नेयः ॥ ७ ॥ १ ॥ ९७ ॥

**अयानयाद् द्वितीयान्ता–दीनो नेय इतीरितः ।**
**स्यान्नेयोऽयानयं शारो–ऽयानयीनस्तथेश्वरः ॥ ९७ ॥**

---

प्रगतं पदं प्रपदम् । पदाग्रामित्यर्थः । अथवा प्रवृद्धं पदं प्रपदम्, पदस्योपरिष्टात् संस्था खलुको गुल्फ इति यावत् । आङ् मर्यादायामभिविधौ वा । आप्रपदम् 'पर्यपाङ्'–३–१–३२–इत्यव्ययीभावः अनेन पटस्य प्रमाणमाख्यायते ॥९५॥ अनुपदमिति 'दैर्ध्येऽनुः'–३–१–३४–इत्यव्ययीभावः । अनुपदीना पदप्रमाणेत्यर्थः ॥ ९६ ॥ फलकशिरसि स्थित उच्यते । अयः प्रदक्षिणं गमनम् । अनयः प्रसव्यं वामम् । शारिद्यूते हि केचिच्छाराः प्रदक्षिणं गच्छन्ति, केचित् प्रसव्यम् । तेषां गतिरयसहितोऽनयोऽयानय इत्युच्यते । यस्मिन् परशारैः पदानामप्रवेशः तदुभयं नेयः अयानयीन इति रूढिः । अथवा अयः शुभं दैवम् । अनयोऽशुभम् । शुभाद् दैवादपवर्ततेऽशुभं दैवं यस्मिन् कर्मणि तदयानयं शांतिकर्म चतुःशरणप्रतिपत्तिरनाघातघोषणं देवगुरुपूजा तपो दानं ब्रह्मचर्यादिनियमः, तद्यो नेयः कारयितव्यः सोऽयानयीन ईश्वर इति ॥ ९७ ॥

## सर्वान्नमत्ति ॥ ७ ॥ १ ॥ ९८ ॥

अत्तीत्यर्थे द्वितीयान्ता-दीनः सर्वान्नशब्दतः ।
सर्वान्नीनो यतिः सर्वा-न्नमत्ति विगतव्रतः ॥ ९८ ॥

## परोवरीणपरंपरीणपुत्रपौत्रीणम् ॥ ७ ॥ १ ॥ ९९ ॥

त्रयः परोवरीणाद्या, ईनन्ताः स्युर्निपातिताः ।
अर्थेऽनुभवति श्रीमान्, **परोवरीण** आदृतः ॥ ९९ ॥

## यथाकामानुकामात्यन्तंगामिनि ॥ ७ ॥ १ ॥ १०० ॥

यथाकामानुकामात्य-न्तेभ्य ईनश्च गामिनि ।
अत्यन्तीनोऽनुकामीनो, यथाकामीन इत्यपि ॥ १०० ॥

## पारावारं व्यस्तव्यत्यस्तं च ॥ ७ ॥ १ ॥ १०१ ॥

समस्तव्यस्तव्यत्यस्तात्, पारावारादीनो भवेत् ।
पारावारीणपारीणा-वारीणावारपारीणाः ॥ १०१ ॥

---

सर्वशब्दः प्रकारकात्स्न्र्ये ॥ ९८ ॥ परावरशब्दाद् द्वितीयान्तादनुभवत्यर्थे ईनः प्रत्ययोऽवरशब्दाकारस्य चोत्वं प्रत्ययसंनियोगे निपात्यते । पराँश्चावराँश्चानुभवति परोवरीणः। परोवर्यमित्यत्रानीतक्रमवाचिपरोवरमिति शब्दान्तरम् परंपरीणेति परम्परतरशब्दादीनः परंपरभावश्च । परान् परतराँश्चानुभवति परंपरीणः । मन्त्रिपरम्परा मन्त्रं भिनत्तीत्यत्रपरम्पराशब्द आबन्तो बाहुल्यार्थः प्रकृत्यन्तरम् । पुत्रपौत्रीणेति पुत्रपौत्रशब्दादीनः । ॥ ९९ ॥ यथाकामीनः, अनुकामीनः, यथेच्छंगामीत्यर्थः । अत्यन्तंगामी अत्यन्तीनः, भृशंगन्तेत्यर्थः ॥ १०० ॥ सूत्रत्रयं स्पष्टार्थम् ॥ १०१ ॥ १०२ ॥ १०३ ॥

## अनुग्वलम् ॥ ७ ॥ १ ॥ १०२ ॥

द्वितीयान्तादलंगामि–नीनोऽनुगोश्च शब्दतः ।
गोपालोऽनुगवीनो यद्, गवां पश्चान्नु गच्छति ॥ १०२ ॥

## अध्वानं येनौ ॥ ७ ॥ १ ॥ १०३ ॥

द्वितीयान्तादलंगामि–नि येनौ भवतोऽध्वनः ।
स्यादध्वानमलं गाम्य–ध्वन्योऽध्वनीन उन्मनाः ॥ १०३ ॥

## अभ्यमित्रमीयश्च ॥ ७ ॥ १ ॥ १०४ ॥

अभ्यमित्रादलंगामि–नीययेना भवन्ति तम् ।
अभ्यमित्र्योऽभ्यमित्रीयोऽभ्यमित्रीण उदाहरेत् ॥१०४॥

## समांसमीनाद्यश्वीनाद्यप्रातीनागवीनसाप्तपदीनम् ॥ ७ ॥ १ ॥ १०५ ॥

पञ्च समांसमीनाद्या, ईनान्ताः स्युर्निपातिताः ।
सतां साप्तपदीनं किं, नाद्यप्रातीनलाभकृत् ॥ १०५ ॥

---

अमित्राभिमुखं भृशं गन्तेत्यर्थः ॥ १०४ ॥ समां समां गर्भं धारयति समांसमीना गौः । अद्य श्वो वा विजनिष्यमाणा अद्यश्वीना गौः । एवं नामप्रत्यासन्नप्रसवेत्यर्थः । एवमद्यप्रातः शब्दादीनः अद्यप्रातीनाः । आगोप्रतिदानं कारी आगवीनः कर्मकरः गवा भृतो य आ तस्या गोः प्रत्यर्पणात् कर्म करोति स आगवीनः । रूढिशब्दोऽयम् । यत्किञ्चिदादाया तस्य प्रतिदानात् कर्मकर एवमुच्यते इत्येके । अन्ये तु आ गोः प्राप्तेः कर्मकारी आगवीन इत्याहुः । सप्तभिः पदैरवाप्यम् साप्तपदीनं सख्यम् । साप्तपदीनः सखा । साप्तपदीनं मित्रम् ॥ १०५ ॥

**अपडक्षाशितंग्वलंकर्मालंपुरुषादीनः**

**॥ ७ ॥ १ ॥ १०६ ॥**

अषडक्षादिशब्देभ्यः, स्वार्थे ईनो भवेत्परः ।
मन्त्रोऽयमषडक्षीणो, हिताय वत्स रक्ष्यताम् ॥ १०६ ॥

**अदिक्स्त्रियां वाञ्चः ॥ ७ ॥ १ ॥ १०७ ॥**

अञ्चत्यन्तान्न वा स्वार्थे, ईनः सो दिक्स्त्रियां न चेत् ।
प्राक् प्राचीनं प्रतीचीनं, प्रत्यक् प्राची च दिङ्मता॥१०७॥

**तस्य तुल्ये कः संज्ञाप्रतिकृत्योः**

**॥ ७ ॥ १ ॥ १०८ ॥**

प्रतिकृतौ च संज्ञायां, षष्ठ्यन्तात् सदृशे च कः ।
स्यादश्वकोऽश्वतुल्यश्च, प्रतिमा पुनरश्विका ॥ १०८ ॥

**न नृपूजार्थध्वजचित्रे ॥ ७ ॥ १ ॥ १०९ ॥**

मनुष्येऽर्थे च पूजार्थे, ध्वजे च चित्रकर्मणि ।
अभिधेये न कश्चञ्चा-ऽर्हन् गरुडः सुयोधनः ॥ १०९ ॥

---

अविद्यमानानि षडक्षीण्यस्मिन् अषडक्षीणो मन्त्रः । 'सक्थ्यक्ष्णः स्वाङ्गे' ७-३-१२६ इति टान्तादीनः । आशिता गावोऽस्मिन्निति आशितंगु, तत ईनः । आशितंगवीनमरण्यम् । अलंकर्मीणः अलंपुरुषीणः ॥ १०६ ॥ स्पष्टे ॥ १०७ ॥ ॥ १०८ ॥ चञ्चा तृणमयः पुरुषः, यः क्षेत्ररक्षणाय क्रियते । अर्हन् पूजनार्था प्रतिकृतिः । गरुडो ध्वजः । सुयोधनः चित्रम् ॥ १०९ ॥

## अपण्ये जीवने ॥ ७ ॥ १ ॥ ११० ॥

कः प्रत्ययो भवेन्नत्र, जीवने पण्यवर्जिते ।
वासुदेवः शिवः स्कन्दो, विक्रीणीते स हास्तिकान् ॥११०॥

## देवपथादिभ्यः ॥ ७ ॥ १ ॥ १११ ॥

कः संज्ञाप्रतिकृत्योर्न, तुल्ये देवपथादितः ।
तुल्यो देवपथस्याय–मध्वा देवपथो यथा ॥ १११ ॥

## वस्तेरेयञ् ॥ ७ ॥ १ ॥ ११२ ॥

स्यादेयञ् प्रत्ययस्तुल्ये, षष्ठ्यन्ताद् वस्तिशब्दतः ।
वस्तेस्तुल्यश्च वास्तेयं, वास्तेयी पुनरिष्टका ॥ ११२ ॥

## शिलाया एयच्च ॥ ७ ॥ १ ॥ ११३ ॥

स्यात् षष्ठ्यन्तात् शिलाशब्दा–देयच्चेयञ्च तुल्यतः ।
शिलेयं दधि शैलेयं, शैलेयी पुनरिष्टका ॥ ११३ ॥

## शाखादेर्यः ॥ ७ ॥ १ ॥ ११४ ॥

शाखादिभ्यो भवेत्तुल्ये, षष्ठ्यन्तेभ्यश्च यः परः ।
शाख्यो मुख्यो जघन्यश्च, शाखाद्या द्वादश स्मृताः ॥११४॥

---

स्पष्टम् ॥ ११० ॥ देवपथादयः षोडश । बहुवचनमाकृतिगणार्थम् ॥ १११ ॥

स्पष्टम् ॥ ११२ ॥ चकारः 'अणञेयेकण्' २–४–२० इति एयस्य सामान्यग्रहणाविघातार्थः ॥ ११३ ॥ पुरुषस्कन्धस्य वृक्षस्कन्धस्य वा तिर्यक् प्रसृतमङ्गं शाखेत्युच्यते ॥ ११४ ॥

## द्रोर्भव्ये ॥ ७ ॥ १ ॥ ११५ ॥

तुल्ये भव्येऽभिधेये यः षष्ठयन्ततो द्रुशब्दतः ।
द्रव्यं कार्षापणं द्रव्य-मयं माणवको यथा ॥ ११५ ॥

## कुशाग्रादीयः ॥ ७ ॥ १ ॥ ११६ ॥

कुशाग्रशब्दतस्तस्य-तुल्य ईयो भवेत्ततः ।
कुशाग्रीया नृणां बुद्धि-र्वर्ण्यते विबुधैरपि ॥ ११६ ॥

## काकतालीयादयः ॥ ७ ॥ १ ॥ ११७ ॥

ईयान्ताः काकतालीया-दयस्तुल्येऽत्र साधवः ।
क्वचिदजाकृपाणीयं, कालतालीयमन्यतः ॥ ११७ ॥

## शर्करादेरण् ॥ ७ ॥ १ ॥ ११८ ॥

अण् भवेत् शर्करादिभ्य-स्तस्य तुल्ये ततस्ततः ।
शार्करं दधि माधुर्या-च्छार्करी मृत्तिका पुनः ॥११८॥

भव्य इति किम् ? द्रुतुल्योऽयं न चेतयते ॥ ११५ ॥ स्पष्टम् ॥ ११६ ॥ काकश्च तालश्च काकतालम् । यथाकथंचिद् व्रजतः काकस्य निपतता तालेनातर्कितोपनतश्चित्रीयमाणः संयोगो लक्षणयोच्यते तत्तुल्यं काकतालीयम् । एवमन्यदपि एतत्तुल्यमुन्नेयम्, खलतिबिल्वीयम् । अन्धकवर्तिकीयम् । अर्धजरतीयम् । घुणाक्षरीयमित्यादि ॥ ११७ ॥ एकादश शर्करादयः ॥ ११८॥

## अः सपत्न्याः ॥ ७ ॥ १ ॥ ११९ ॥

सपत्नीशब्दतस्तस्य, तुल्ये अः प्रत्ययो भवेत् ।
सपत्नः शत्रुराख्यातः, सपत्न्याः सदृशो यतः ॥११९॥

## एकशालाया इकः ॥ ७ ॥ १ ॥ १२० ॥

इकः स्यादेकशालाया–स्तस्य तुल्ये परस्ततः ।
तुल्यं तदेकशालाया, एकशालिकमुच्यते ॥ १२० ॥

## गोण्यादेश्चेकण् ॥ ७ ॥ १ ॥ १२१ ॥

गोण्यादेरेकशालाया–स्तस्य तुल्ये भवेदिकण् ।
ऐकशालिकमित्येवं, गौण्यास्तुल्यं च गौण्णिकम् ॥१२१॥

## कर्कलोहिताट्टीकण् च ॥ ७ ॥ १ ॥ १२२ ॥

स्यातामाभ्यामिकण्टीकण्–प्रत्ययौ तस्य तुल्यतः ।
कार्कीकः कार्किको लोहि–त्तीको लौहितिकस्तथा ॥१२२॥

## वेर्विस्तृते शालशङ्कटौ ॥ ७ ॥ १ ॥ १२३ ॥

विशब्दाद् विस्तृतेऽर्थे स्तः, प्रत्ययौ शालशङ्कटौ ।
विशाला नगरी तस्यां, मन्दिरश्च विशङ्कटम् ॥ १२३ ॥

---

स्पष्टे ॥११९॥१२०॥ एकोनविंशतिः गोण्यादयः ॥१२१॥ शुक्लोऽश्वः स्फटिकादिः कर्कः । अलोहितवर्णोऽप्युपाश्रयवशाद्यस्तथावभासते स एवमुच्यते । टकारो ङ्यर्थः ॥१२२॥ विनानानेत्यव्यये पृथग्भावे वर्तेत इति विनञ्भ्यां प्रत्ययौ न नानाञौ वक्तव्यौ ॥ १२३ ॥

## कटः ॥ ७ ॥ १ ॥ १२४ ॥

विशब्दाद् विस्तृतेऽर्थे स्यात्, कटोऽपि प्रत्ययः पुनः ।
विकटं कष्टमासाद्य, विकुर्वन्ति न सज्जनाः ॥ १२४ ॥

## संप्रोन्नेः संकीर्णप्रकाशाधिकसमीपे ॥ ७ ॥ १ ॥ १२५ ॥

संप्रोन्निभ्यो यथासङ्ख्यं, सङ्कीर्णादौ भवेत् कटः ।
सङ्कटे निकटो यः स्यात्, सोत्कटः प्रकटो भुवि ॥१२५॥

## अवात् कुटारश्चावनते ॥ ७ ॥ १ ॥ १२६ ॥

अवशब्दात् कुटारश्चात्, कटश्चावनते भवेत् ।
भवेदवकुटारश्चाव-कटोऽवनतोऽमतः ॥ १२६ ॥

## नासानतितद्वतोष्टीटनाटभ्रटम् ॥ ७ ॥ १ ॥ १२७ ॥

टीटनाटभ्रटा नासा-नतौ तद्वति चावतः ।
अवटीटावनाटाव-भ्रटा नासावनामकाः ॥ १२७ ॥

---

स्पष्टम् ॥ १२४ ॥ समः संकीर्णे । प्रात् प्रकाशे । उदोऽधिके । नेः समीपे ॥ १२५ ॥ स्पष्टम् ॥ १२६ ॥ अपकृष्टो वार्थः । अपकृष्टमपि हि वस्तु दृष्ट्वा लोको नासां नामयति ॥ १२७ ॥

## नेरिनपिटकाश्चिक्चिचिकश्चास्य ॥ ७ ॥ १ ॥ १२८ ॥

नेरिनपिटकाः प्राग्वद्, नेश्च चिक्चिचिकः क्रमात् ।
चिकिनं चिपिटं चिक्कं, नासिकानमनं मतम् ॥ १२८ ॥

## बिडबिरीसौ नीरन्ध्रे च ॥ ७ ॥ १ ॥ १२९ ॥

नीरन्ध्रेऽर्थे नितः प्राग्वद्, बिरीसश्च बिडस्तथा ।
नीरन्ध्रा निबिडा नासा, निबिरीसा तथा मता ॥ १२९ ॥

## क्लिन्नाल्लश्चक्षुषि चिल्पिल्चुल्चास्य ॥ ७ ॥ १ ॥ १३० ॥

क्लिन्नाच्चक्षुषि लश्चास्या–देशाश्चिल्पिल्चुलस्ततः ।
चिल्लं पिल्लं तथा चुल्लं, चक्षुस्तद्वान् नरस्तथा ॥ १३० ॥

## उपत्यकाधित्यके ॥ ७ ॥ १ ॥ १३१ ॥

क्रमादुपाधिशब्दाभ्यां, निपात्येते त्यकान्तिमौ ।
अधित्यका गिरेरूर्ध्वं, भूमिरध उपत्यका ॥ १३१ ॥

---

प्राग्वत् नासानतौ तद्वति चाभिधेये इत्यर्थः । बहुवचनं रूढ्यर्थम् ॥ १२८ ॥ निबिरीसा इत्यत्र विधानसामर्थ्यात् षत्वं न भवति ॥ १२९ ॥ स्पष्टम् ॥ १३० ॥ निपातनं रूढ्यर्थम् ॥ १३१ ॥

## अवेः संघातविस्तारे कटपटम् ॥ ७ ॥ १ ॥ १३२ ॥

स्तः सङ्घाते च विस्तारे, कटपटौ क्रमादवेः ।
सङ्घातोऽविकटोऽवीनां, विस्तारोऽविपटस्तथा ॥ १३२ ॥

## पशुभ्यः स्थाने गोष्ठः ॥ ७ ॥ १ ॥ १३३ ॥

षष्ठ्यन्तपशुनामभ्य, स्थाने गोष्ठो भवेत्ततः ।
गोगोष्ठं स्याद्गवां स्थानं, महिषीगोष्ठमित्यपि ॥१३३॥

## द्वित्वे गोयुगः ॥ ७ ॥ १ ॥ १३४ ॥

षष्ठ्यन्तपशुनामभ्यो, द्वित्वेऽर्थे गोयुगो भवेत् ।
गोगोयुगं गवोर्द्वित्वं, यथा तथाऽश्वगोयुगम् ॥ १३४ ॥

## षट्त्वे षड्गवः ॥ ७ ॥ १ ॥ १३५ ॥

षष्ठ्यन्तपशुनामभ्यः, षट्त्वे भवति षड्गवः ।
उष्ट्रषड्गवनो हस्ति-षड्गवमतिरिच्यते ॥ १३५ ॥

## तिलादिभ्यः स्नेहे तैलः ॥ ७ ॥ १ ॥ १३६ ॥

षष्ठ्यन्तेभ्यस्तिलादिभ्यः, स्नेहे तैलो भवेत्ततः ।
तिलतैलं तिलानां स्यात्, स्नेहः सर्षपतैलवत् ॥ १३६ ॥

---

सङ्घाते सामूहिकानां विस्तारे ऐदमर्थिकानां चापवादो योगः ॥ १३२ ॥
इदमर्थानामपवादः ॥ १३३ ॥ १३४ ॥१३५॥ विकारप्रत्ययापवादः ॥१३६॥

## तत्र घटते कर्मणष्ठः ॥ ७ ॥ १ ॥ १३७ ॥

सप्तम्यन्तात् भवेत् कर्मन्–शब्दात् ठो घटते ततः ।
कर्मठः खलु धर्मिष्ठः, कर्मणि घटते हिते ॥ १३७ ॥

## तदस्य संजातं तारकादिभ्य इतः ॥ ७ ॥ १ ॥ १३८ ॥

षष्ठ्यर्थे तारकादेश्च, प्रथमान्तादितो भवेत् ।
सञ्जातं प्रथमान्तं चेत्, पश्य तारकितं नभः ॥ १३८ ॥

## गर्भादप्राणिनि ॥ ७ ॥ १ ॥ १३९ ॥

तदस्य जातमित्यर्थे, गर्भादप्राणिनि त्वितः ।
गर्भिताः शालयो गर्भः, सञ्जातोऽस्याः स्त्रियः पुनः ॥१३९॥

## प्रमाणान् मात्रट् ॥ ७ ॥ १ ॥ १४० ॥

षष्ठ्यर्थे प्रथमान्तात् स्या–न्मात्रट् प्रमाणवाचिनः ।
जानुमात्रं जलं रज्जु–मात्री भूमिर्भवेद्यथा ॥ १४० ॥

## हस्तिपुरुषाद्वाण् ॥ ७ ॥ १ ॥ १४१ ॥

पुरुषाद् हस्तिशब्दाच्च, प्रमाणवाचिनोऽण् नवा ।
हास्तिनं हस्तिमात्रं च, हस्तिदघ्नं जलं ह्रदे ॥ १४१ ॥

---

स्पष्टम् ॥ १३७ ॥ पादोनशतं तारकादिः । बहुवचनमाकृतिगणार्थम् ॥१३८॥ गर्भः सञ्जात इत्यादिवाक्यमेव प्राणित्वात् ॥ १३९ ॥ आयाममानं प्रमाणं, तद् द्विविधम् ऊर्ध्वमानं तिर्यग्मानं च ॥ १४० ॥ पक्षे यथाप्राप्तं तेन हस्तिपुरुषयोर्माने चातूरूप्यं भवति ॥ १४१ ॥

## वोर्ध्वं दघ्नट् द्वयसट् ॥ ७ ॥ १ ॥ १४२ ॥

दघ्नट्द्वयसटौ वा स्त, ऊर्ध्वप्रमाणवाचिनः ।
जानुद्वयसमत्राम्भो, जानुदघ्नं न तत्र किम् ? ॥ १४२ ॥

## मानादसंशये लुप् ॥ ७ ॥ १ ॥ १४३ ॥

मानाद् हस्तादितो लुप् स्या–न्मात्रडादेरसंशये ।
हस्तो दिष्टिर्वितस्तिश्च, हस्तमात्रं च संशये ॥१४३॥

## द्विगोः संशये च ॥ ७ ॥ १ ॥ १४४ ॥

मानान्ताद् द्विगुतो लुप् स्या–न्मात्रडादेरसंशये ।
संशयेऽपि द्विदिष्टिर्द्वि–वितस्तिर्द्विशमस्तथा ॥१४४॥

## मात्रट् ॥ ७ ॥ १ ॥ १४५ ॥

षष्ठ्यर्थे प्रथमान्तात् स्यात्, मात्रट् मानाच्च संशये ।
प्रस्थमात्रमहो धान्यं, पलमात्र्यस्ति शर्करा ॥ १४५ ॥

---

वाग्रहणं प्राप्तप्रत्ययान्तराबाधनार्थम् । 'कियन्मानं जलं विप्र ? जानुदघ्नं-नराधिप ! कथमीदृग्यवस्था ते, नहि सर्वे भवादृशः ॥' इति सूक्तमुद्बोधयत्यु-दाहरणम् ॥ १४२ ॥ स्पष्टम् ॥ १४३ ॥ मीयतेऽनेन मानं प्रमाणं, परिमाणं, उन्मानं, संख्या चेह गृह्यते । 'ऊर्ध्वमानं किलोन्मानं, परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात्, संख्या बाह्या तु सर्वतः' ॥ १ ॥ १४४ ॥ मात्रदघ्नद्वयसानि नामान्यपि सन्ति । अनुबन्धासञ्जनार्थं तु प्रत्ययविधानम् । तेन च स्त्रियां विशेषः वैश्वदेवमात्रा भिक्षा ॥ १४५ ॥

## शनूशद्विंशतेः ॥ ७ ॥ १ ॥ १४६ ॥

शनूशदन्ताच्च सङ्ख्यार्था–न्माने मात्रट् च विंशतेः ।
दशमात्रास्त्रयस्त्रिंशन्मात्रा विंशतिमात्रवत् ॥ १४६ ॥

## डिन् ॥ ७ ॥ १ ॥ १४७ ॥

डिन् सङ्ख्याशब्दतो माने, शनूशदन्ताच्च विंशतेः ।
पञ्चदश्यर्धमासः स्यात्, स्युस्त्रयस्त्रिंशिनः सुराः ॥ १४७ ॥

## इदंकिमोऽतुरिय् किय् चास्य ॥ ७ ॥ १ ॥ १४८ ॥

इदंशब्दाच्च किंशब्दा–न्मानेऽतुरिय् च किय् तयोः ।
इयद्धान्यं ममात्रास्ति, तत्र धान्यं कियद्वद ॥ १४८ ॥

## यत्तदेतदो डावादिः ॥ ७ ॥ १ ॥ १४९ ॥

मानेऽर्थे यत्तदेद्भ्यो, डावादिः स्यादतुस्ततः ।
कायं प्रसार्यतां तावद्, यावाँस्ते विस्तृतः पटः ॥१४९॥

---

डिनोऽपवादः ॥१४६॥ संशये इति निवृत्तम् । योगविभागात् ॥१४७॥ तदस्य मानादिति वर्तते । उदित्करणं दीर्घत्वाद्यर्थम् ॥ १४८ ॥ स्वविषये मानविशेषे प्रमाणे मात्रडादयो, मानसामान्ये त्वतुरेवेति विशेषः ॥ १४९ ॥

## यत्तत्किमः संख्याया डतिर्वा ॥ ७ ॥ १ ॥ १५० ॥

यत्तत्किंभ्यो डतिर्माने, सङ्ख्यार्थेभ्यो विभाषया ।
**कियन्तः कति यावन्त-स्तावन्तो यति वा तति ॥१५०॥**

## अवयवात्तयट् ॥ ७ ॥ १ ॥ १५१ ॥

अवयवार्थतो नाम्नः, स्यात् सङ्ख्यावाचिनस्तयट् ।
**पञ्चतयो यमो धर्मो, दशतयश्चतुष्टयः ॥ १५१ ॥**

## द्वित्रिभ्यामयट् वा ॥ ७ ॥ १ ॥ १५२ ॥

स्यादवयववृत्तिभ्यां, वा द्वित्रिभ्यामयट् ततः ।
**त्रयं च त्रितयं विश्वं, तपश्च द्वितयं द्वयम् ॥ १५२ ॥**

## द्व्यादेर्गुणान्मूल्यक्रेये मयट् ॥ ७ ॥ १ ॥ १५३ ॥

मूल्ये क्रेये मयट् द्व्यादे-र्गुणवृत्तेस्तदस्य यत् ।
**उदश्विद् द्विमयं येषां, ते द्विमया उदश्वितः ॥ १५३ ॥**

---

पक्षे यथाविहितोऽतुश्च । एतौ चातुडतिप्रत्ययौ स्वभावाद्बहुवचनविषयावेव भवतः ॥१५०॥ स्पष्टे ॥ १५१ ॥ १५२ ॥ मूल्यक्रेय इति किम् ? द्विगुणं क्षीरं तैलस्य पाक्यस्य ॥ १५३ ॥

**अधिकं तत्संख्यमस्मिन् शतसहस्रे शतिशद्दशान्ताया डः ॥ ७ ॥ १ ॥ १५४ ॥**

स्यात् शतिशद्दशान्ताड्डः, सहस्रे च शतेऽधिकम् ।
चेत्तत्संख्यं च संख्यायाः, सहस्रं द्वादशं शतम् ॥ १५४ ॥

**संख्यापूरणे डट् ॥ ७ ॥ १ ॥ १५५ ॥**

संख्याशब्दाच्च षष्ठ्यन्तात्, डट् संख्यापूरणे भवेत् ।
तीर्थकृत् षोडशः शान्ति–र्विमलश्च त्रयोदशः ॥ १५५ ॥

**विंशत्यादेर्वा तमट् ॥ ७ ॥ १ ॥ १५६ ॥**

स्यात् संख्यापूरणे संख्या–विंशत्यादेस्तमट् च डट् ।
तं विंशतितमं विंशं, वन्दे श्रीमुनिसुव्रतम् ॥ १५६ ॥

**शतादिमासार्धमाससंवत्सरात् ॥ ७ ॥ १ ॥ १५७ ॥**

मासार्धमाससंवत्स–रतः शतादितस्तमट् ।
चिन्ता शततमा याम, मासतमी च पूर्णिमा ॥ १५७ ॥

**षष्ठ्यादेरसंख्यादेः ॥ ७ ॥ १ ॥ १५८ ॥**

स्यात् षष्ठ्यादेरसंख्यादेः, संख्यायाः पूरणे तमट् ।
षष्टितमो भवेत् षष्टः पूरणो न विकल्प्यते ॥ १५८ ॥

---

स्पष्टानि ॥ १५४ ॥ १५५ ॥ १५६ ॥ षष्ठ्यादेरित्येव सिद्धे शतादिग्रहणं सङ्ख्याद्यर्थम् ॥ १५७ ॥ असंख्यादेरिति किम् ? एकषष्टितमः, एकषष्टः, विंशत्यादेरिति विकल्प एव ॥ १५८ ॥

## नो मट् ॥ ७ ॥ १ ॥ १५९ ॥

संख्याया नान्ततोऽसंख्या-देः संख्यापूरणेऽस्ति मट् ।
श्रीशान्तिः पञ्चमश्चक्री, पञ्चमी कार्तिकी चिदे ॥ १५९ ॥

## पित्तिथट् बहुगणपूगसङ्घात् ॥ ७ ॥ १ ॥ १६० ॥

पूगाद् बहोर्गणात् सङ्घात्, पित् संख्यापूरणे तिथट् ।
बहुतिथस्तथा पूग-तिथः सङ्घतिथस्तथा ॥ १६० ॥

## अतोरिथट् ॥ ७ ॥ १ ॥ १६१ ॥

संख्यातोऽत्वन्ततः संख्या-पूरणे पित् इथट् भवेत् ।
इयतिथस्तथा ताव-तिथस्तावतिथी तथा ॥ १६१ ॥

## षट्कतिकतिपयात् थट् ॥ ७ ॥ १ ॥ १६२ ॥

पित् संख्यापूरणे थट् षट्-कतिकतिपयाद्भवेत् ।
स्यात् कतिपयथः षष्ठः, षष्ठी च कतिथस्तथा ॥१६२॥

## चतुरः ॥ ७ ॥ १ ॥ १६३ ॥

ट्प्रत्ययश्चतुःशब्दात्, स्यात् संख्यापूरणे ततः ।
भाद्रशुक्लचतुर्थ्यां सां-वत्सरं पर्व कालकात् ॥ १६३ ॥

---

न इति किम्? विंशः । असंख्यादेरित्येव, एकादशः, द्वादशः ॥ १५९ ॥ पित्करणं पुंवद्भावार्थम् । टकारो ङ्यर्थः ॥ १६० ॥ डटोऽपवादः ॥ १६१ ॥ 'षष्ठी वानादरे' २-२-१०८ 'चतुर्थी' २-२-५३ इति च निर्देशात् थटि 'नाम सिदय्व्यञ्जने' १-१-२१ इति पदत्वं न भवति ॥१६२॥ योगविभाग उत्तरार्थः ॥ १६३ ॥

## येयौ चलुक् च ॥ ७ ॥ १ ॥ १६४ ॥

स्तः संख्यापूरणे येयौ, चतुःशब्दाच्च लुक् तथा ।
चतुर्णां पूरणस्तुर्य–स्तुरीयः स्यादनेकधा ॥ १६४ ॥

## द्वेस्तीयः ॥ ७ ॥ १ ॥ १६५ ॥

द्विशब्दात् प्रत्ययस्तीयः, संख्यायाः पूरणे भवेत् ।
युग्मिनां ना द्वितीयः स्त्री, द्वितीया तौ चिरायुषौ ॥ १६५ ॥

## त्रेस्तृ च ॥ ७ ॥ १ ॥ १६६ ॥

त्रेः संख्यापूरणे तीय–स्त्रेरादेशस्तृ इत्ययम् ।
राधशुक्लस्तृतीयोऽह–स्तृतीयाऽक्षय्यनामिका ॥ १६६ ॥

## पूर्वमनेन सादेश्चेन् ॥ ७ ॥ १ ॥ १६७ ॥

सपूर्वात् केवलाच्चापि, कर्तरि पूर्वशब्दतः ।
स्यात्तृतीयार्थ इन् पूर्वी, कृतपूर्वी पयो यथा ॥ १६७ ॥

## इष्टादेः ॥ ७ ॥ १ ॥ १६८ ॥

इन् कर्तरि तृतीयार्थे, प्रथमान्तेष्टमुख्यतः ।
इष्टी यज्ञे तथा पूर्ती, श्राद्धेऽधीती च लक्षणे ॥ १६८ ॥

---

स्पष्टानि ॥ १६४ ॥ १६५ ॥ १६६ ॥ अनेनेति कर्तृपदं, कर्ता च क्रियामन्तरेण न भवतीति कृतं भुक्तं पीतं चेति काञ्चित् क्रियामपेक्षते । विशेषावगमस्तु अर्थात् प्रकरणात् शब्दान्तरसंनिधेर्वा भवति ॥ १६७ ॥ 'व्याप्ये क्तेनः' २-२-९९ इति कर्मणि सप्तमी । इष्टादयो द्वाचत्वारिंशत् ॥ १६८ ॥

## श्राद्धमद्यभुक्तमिकेनौ ॥ ७ ॥ १ ॥ १६९ ॥

अद्यभुक्तं भवेच्छ्राद्धं, स्तस्ततः कर्तरीनिकौ ।
प्रथमान्तात्तृतीयार्थे, श्राद्धी च श्राद्धिको यथा ॥ १६९ ॥

## अनुपद्यन्वेष्टा ॥ ७ ॥ १ ॥ १७० ॥

अनुपदीति चेन्नन्तं, चेदन्वेष्टा निपात्यते ।
स्यादनुपदमन्वेष्टो-ष्ट्राणामनुपदी गवाम् ॥ १७० ॥

## दाण्डाजिनिकायःशूलिकपार्श्वकम् ॥ ७ ॥ १ ॥ १७१ ॥

स्तो दाण्डाजिनिकायःशू-लिकाविकणि पार्श्वकः ।
केऽन्वेष्टा प्रत्ययार्थश्चेत्, स्याद्दाण्डाजिनिकोऽनृतः ॥१७१॥

---

अद्यग्रहणादद्यभुक्ते श्राद्धे श्वः श्राद्धिकः श्राद्धी इति न भवति। भुक्तमिति किम्? श्राद्धमनेनाद्य कृतम् ॥ १६९॥ स्पष्टम् ॥ १७०॥ दण्डाजिनं दम्भः तेनान्वेष्टा दाण्डाजिनिकः। यो मिथ्याव्रती परप्रसादार्थं दण्डाजिनमुपादायार्थानन्विच्छति स दाम्भिक उच्यते। निपातनं रूढ्यर्थं तेन शैवभागवतादौ न भवति। आयःशूलिक इति, तीक्ष्ण उपायोऽयःशूलसाम्यादयःशूलम्, तेनान्वेष्टा आयःशूलिकः। यो मृदुनोपायेनान्वेष्टव्यानर्थान्तीक्ष्णोपायेनान्विच्छति राभसिकः स एवमुच्यते। पार्श्वक इति, पार्श्वमनृजुरुपायः लञ्चादिः, तेनान्वेष्टा पार्श्वकः ॥ १७१ ॥

## क्षेत्रेऽन्यस्मिन्नाश्य इयः ॥ ७ ॥ १ ॥ १७२ ॥

नाश्येऽन्योपाधिकात् क्षेत्रात्, सप्तम्यन्तादियो भवेत् ।
क्षेत्रियाः स्युस्तृणव्याधि–गरलपारदारिकाः ॥ १७२ ॥

## छन्दोऽधीतेश्रोत्रश्च वा ॥ ७ ॥ १ ॥ १७३ ॥

छन्दसो वा द्वितीयान्ता–दियोऽधीतेऽस्य श्रोत्रता ।
श्रोत्रियः छान्दसः छन्दो, ह्यधीते हृदयङ्गमम् ॥ १७३ ॥

## इन्द्रियम् ॥ ७ ॥ १ ॥ १७४ ॥

संघट्यार्थं यथायोग–मिन्द्रादियो निपात्यते ।
इन्द्र आत्मा ततोऽनेक–मिन्द्रस्य लिङ्गमिन्द्रियम् ॥ १७४ ॥

---

अन्यस्मिन् क्षेत्रे नाश्यः क्षेत्रियो व्याधिः क्षेत्रं शरीरम् । अन्यदिति जन्मान्तरशरीरमुच्यते । तत्र नाश्यो नेहेत्यसाध्यो व्याधिरुच्यते । क्षेत्रियं विषम् । तद्धि स्वशरीरादन्यस्मिन्परशरीरे संक्रमय्य किंचिन्नाश्यं चिकित्स्यं भवति । क्षेत्रियानि तृणानि । तानि हि सस्यक्षेत्रेऽन्यस्मिन्नुत्पन्नानि नाश्यानि उत्पाद्यानि भवन्ति । क्षेत्रियः पारदारिकः । स स्वक्षेत्रादन्यस्मिन् क्षेत्रे परदारेषु प्रवर्तमानस्तत्र नाश्यो निग्राह्यो भवति । दाराः क्षेत्रम् ॥ १७२ ॥ पक्षेऽण् ॥ १७३ ॥ निपातनं रूढ्यर्थं, तेन यथायोगमथकल्पना । इन्द्र आत्मा इन्द्रस्य लिङ्गमिन्द्रियम् । चक्षुराद्युच्यते । तेन हि करणेनात्मानुमीयते, नाकर्तृकं करणमिति । इन्द्रेण दृष्टमिन्द्रियम् । इन्द्रेण सृष्टमिन्द्रियम् । इन्द्रेण जुष्टमिन्द्रियम् । इन्द्रेण दत्तमिन्द्रियम् । इन्द्रस्यावरणक्षयोपशमसाधनमिन्द्रियम् । एवं सति सम्भवेऽन्यापि व्युत्पत्तिः कर्तव्या ॥ १७४ ॥

## तेन वित्ते चञ्चुचणौ ॥ ७ ॥ १ ॥ १७५ ॥

चञ्चुचणौ तृतीयान्ता–द्वित्ते स्तः प्रत्ययौ ततः ।
विद्याचञ्चुस्तथा विद्या–चणः श्रमण उत्तमः ॥ १७५ ॥

## पूरणाद् ग्रन्थस्य ग्राहके को लुक् चास्य ॥ ७ ॥ १ ॥ १७६ ॥

पूरणप्रत्ययान्तात् कस्तेन ग्रन्थस्य ग्राहके ।
पूरणप्रत्ययस्य स्या–लुक् चतुष्कस्त्रिको द्विकः ॥ १७६ ॥

## ग्रहणाद्वा ॥ ७ ॥ १ ॥ १७७ ॥

ग्रन्थस्य ग्रहणान्नाम्नः, पूरणप्रत्ययान्ततः ।
कः स्वार्थे पूरणस्य स्या–लुग्वा द्विकं द्वितीयकम् ॥ १७७ ॥

## सस्याद्गुणात् परिजाते ॥ ७ ॥ १ ॥ १७८ ॥

परिजाते तृतीयान्तात्, कः सस्याद्गुणवाचिनः ।
शालिर्देशो मणिर्वत्सः, सीधुखण्डश्च सस्यकः ॥ १७८ ॥

## धनहिरण्ये कामे ॥ ७ ॥ १ ॥ १७९ ॥

सप्तम्यन्ताद्धनात्कामे, हिरण्यादपि को भवेत् ।
धने कामस्तु चैत्रस्य, धनकश्च हिरण्यकः ॥ १७९ ॥

---

वित्तो ज्ञातः प्रकाश इत्यर्थः ॥ १७५ ॥ ग्रन्थस्येति किम्? पञ्चमेन दिनेन शत्रूणां ग्राहकः ॥ १७६ ॥ ग्रन्थस्येत्येव, द्वितीयं ग्रहणं धान्यस्य ॥ १७७ ॥ परिः सर्वतोभावे, जनिः संपत्तौ । यः सर्वतो गुणैः संपन्नो न यस्य किञ्चिदपि वैगुण्यमस्ति स एवमुच्यते ॥१७८॥ स्पष्टम् ॥१७९॥

## स्वाङ्गेषु सक्ते ॥ ७ ॥ १ ॥ १८० ॥

कः सप्तम्यन्ततः स्वाङ्ग–वाचितोऽर्थे च सक्ततः ।
केशेषु केशकः सक्तो, नखको दन्तकस्तथा ॥ १८० ॥

## उदरे त्विकणाद्यूने ॥ ७ ॥ १ ॥ १८१ ॥

सप्तम्यन्तोदरात्सक्ते, चेदाद्यूनो भवेदिकण् ।
स्यादौदरिक आद्यूनः, पीड्यते यो बुभुक्षया ॥ १८१ ॥

## अंशं हारिणि ॥ ७ ॥ १ ॥ १८२ ॥

अंशशब्दाद् द्वितीयान्ताद्, हारिणि को भवेत्ततः ।
अंशहारी च दायादः, स्यादंशकः स लक्षणः ॥ १८२ ॥

## तन्त्रादचिरोद्धृते ॥ ७ ॥ १ ॥ १८३ ॥

पञ्चम्यन्ताद् भवेत्तन्त्र–शब्दतः कोऽचिरोद्धृते ।
धार्मिके देवकार्ये च, ग्राह्यो ना तन्त्रकः पटः ॥ १८३ ॥

---

बहुवचनात् स्वाङ्गसमुदायादपि भवति; दन्तौष्ठकः केशनखकः ॥१८०॥ आद्यून इति किम् ? उदरकोऽन्यः ॥ १८१ ॥ हारीत्यावश्यके णिन् ॥ १८२ ॥ तन्त्रात् पटवानोपकरणादचिरोत्तीर्णः तन्त्रकः पटः; प्रत्यग्र इत्यर्थः ॥ १८३ ॥

## ब्राह्मणान्नाम्नि ॥ ७ ॥ १ ॥ १८४॥

कः पञ्चम्यन्ततो नाम्नि, ब्राह्मणादचिरोद्धृते ।
देशो ब्राह्मणको ज्ञेयो, ब्राह्मणेभ्यः पृथक्कृतः ॥ १८४ ॥

## उष्णात् ॥ ७ ॥ १ ॥ १८५ ॥

पञ्चम्यन्ताद्भवेदुष्णा-न्नामनि कोऽचिरोद्धृते ।
यत्रागूरुष्णिका पथ्या, सरिदप्युष्णिका क्वचित् ॥ १८५ ॥

## शीताच्च कारिणि ॥ ७ ॥ १ ॥ १८६ ॥

शीतादुष्णाद् द्वितीयान्तात्, कारिणि नाम्नि को भवेत् ।
अलसः शीतको दक्ष-श्चोष्णको विश्वविश्रुतौ ॥ १८६ ॥

## अधेरारूढे ॥ ७ ॥ १ ॥ १८७ ॥

आरूढेऽर्थे भवेत् स्वार्थे, कः प्रत्ययोऽधिशब्दतः ।
द्रोणोऽधिको भवेत् खार्यां, खारी द्रोणेन चाधिका ॥ १८७ ॥

---

सदाचारब्राह्मणेभ्यस्तदानीमेवोद्धृत्य पृथक्कृतः ब्राह्मणको नाम देशः । यत्रायुधजीविनः काण्डस्पृष्टा नाम ब्राह्मणा भवन्ति ॥ १८४ ॥ स्पष्टम् ॥ १८५ ॥ नाम्नीत्यनुवृत्तेः शीतोष्णशब्दाविह मान्द्यशीघ्रवचनौ गृह्येते न स्पर्शवचनौ । क्रियाविशेषणत्वाद् द्वितीया । कारीत्यावश्यके णिन् ॥ १८६ ॥

## अनोः कमितरि ॥ ७ ॥ १ ॥ १८८ ॥

कः प्रत्ययोऽनुशब्दाच्चेत्, कमिता समुदायतः ।
गम्यते किं विशुद्धाभि–रनुकामयतेऽनुकः ॥ १८८ ॥

## अभेरीश्च वा ॥ ७ ॥ १ ॥ १८९ ॥

अभेः कमितरि स्यात् कः, तथा च दीर्घ ईश्च वा ।
अभिकामयतेऽभीको–ऽभिको वा कमिता नरः ॥ १८९ ॥

## सोऽस्य मुख्यः ॥ ७ ॥ १ ॥ १९० ॥

षष्ठ्यर्थे प्रथमान्तात् कः, स चेन्मुख्यो भवेत्ततः ।
देवदत्तस्य मुख्यत्वे, सङ्घः स्याद्देवदत्तकः ॥ १९० ॥

## शृङ्खलकः करभे ॥ ७ ॥ १ ॥ १९१ ॥

शब्दः शृङ्खलको वाच्य, उष्ट्रशिशौ निपात्यते ।
शृङ्खलकः सबन्धो वा, करभो मुक्तबन्धनः ॥ १९१ ॥

## उदुत्सोरुन्मनसि ॥ ७ ॥ १ ॥ १९२ ॥

उन्मनस्यभिधेये स्या–दुदुत्सुभ्यां च कस्ततः ।
इष्टार्थसाधनोद्यक्त, उत्क उत्सुक उन्मनाः ॥ १९२ ॥

---

आरूढशब्दः कर्तरि कर्मणि च क्तप्रत्यये सिद्धः ॥ १८७ ॥ स्पष्टे ॥ १८८ ॥ १८९ ॥ मुख्य इति किम्? देवदत्तः शत्रुरेषाम् ॥ १९० ॥ करभाणां काष्ठमयं पादबन्धनं शृङ्खलम् । वयःशब्दश्चायम् । शृङ्खलं बन्धनं भवतु वा मा भूत ॥ १९१ ॥ स्पष्टम् ॥ १९२ ॥

## कालहेतुफलाद्रोगे ॥ ७ ॥ १ ॥ १९३ ॥

कालहेतुफलाद्रोगे, षष्ठ्यर्थे प्रथमान्ततः ।
कः स्याद्द्वितीयकः काश-पुष्पकः शीतको ज्वरः ॥१९३॥

## प्रायोऽन्नमस्मिन्नाम्नि ॥ ७ ॥ १ ॥ १९४ ॥

स्यान्नाम्नि प्रथमान्तात् कः, सप्तम्यथ च तद्यदि ।
प्रायोऽन्नं पौर्णमासीयं, गुडापूपिकया श्रुता ॥ १९४ ॥

## कुल्मासादण् ॥ ७ ॥ १ ॥ १९५ ॥

कुल्मासशब्दतो नाम्नि, भवेदण् प्रथमान्ततः ।
प्रायोऽन्नं प्रथमान्तं चेत्, कौल्मासी पूर्णिमा यथा ॥ १९५ ॥

## वटकादिन् ॥ ७ ॥ १ ॥ १९६ ॥

वटकशब्दतो नाम्नि, भवेदिन् प्रथमान्ततः ।
प्रायोऽन्नं प्रथमान्तं चे-द्यथा वटकिनी तिथिः ॥ १९६ ॥

## साक्षाद्द्रष्टा ॥ ७ ॥ १ ॥ १९७ ॥

द्रष्टेत्यस्मिन् भवेदर्थे, साक्षादिन् ननु नामनि ।
साक्षिणः साक्षिणां साक्षी, भव्ये भव्यो भवेद्भवे ॥ १९७ ॥

इति प्रथमः पादः ॥

---

द्वितीयो दिवसोऽस्याविर्भावायेति द्वितीयकः, कालः । काशपुष्पं हेतुः कारणमस्येति काशपुष्पकः, हेतुः । शीतं फलं कार्यमस्य शीतकः, फलम् । रोग इति किम् ? द्वितीयो दिवसोऽस्य जातस्य बालकस्य ॥ १९३ ॥ प्रायशब्दोऽत्रा-न्नासमानाधिकरणो नियतलिङ्गसंख्यः । प्रायः अकृत्स्नबहुत्वम् ॥ १९४ ॥ कुल्मास इति मूर्धन्योपान्त्योऽप्यस्ति ॥१९५॥ स्पष्टम् ॥१९६॥ 'प्रायोऽव्ययस्य' ७-४-६५ इत्यन्त्यस्वरादिलोपः । नाम्नीत्येव साक्षाद्द्रष्टा ॥ १९७ ॥

इति प्रथमः पादः

## अथ द्वितीयः पादः ।

### तदस्यास्त्यस्मिन्निति मतुः ॥ ७ ॥ २ ॥ १ ॥

सप्तम्यर्थेऽथ षष्ठ्यर्थे, मतुर्वा प्रथमान्ततः ।
चेत् प्रथमान्तमस्तीति, ना गोमान् वृक्षवान् नगः ॥ १ ॥

### आ यात् ॥ ७ ॥ २ ॥ २ ॥

गुणादिभ्यो यपर्यन्तं, प्रकृतिभ्यो भवेन्मतुः ।
तदस्यास्ति तदस्मिन् वा–ऽस्तीत्यस्मिन विषये ननु ॥ २ ॥

### नावादेरिकः ॥ ७ ॥ २ ॥ ३ ॥

नावादिभ्य इको ज्ञेयो, मत्वर्थे च मतुस्तथा ।
नौरस्य नाविको नौमान्, कुमारीमान् कुमारिकः ॥ ३ ॥

### शिखादिभ्य इन् ॥ ७ ॥ २ ॥ ४ ॥

इन् मत्वर्थे शिखादिभ्यो, मतुश्च प्रत्ययो मतः ।
शाखी शाली शिखी माली, शिखावानिति बुध्यताम् ॥४॥

---

भूमनिन्दाप्रशंसासु, नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां प्रायो मत्वादयो मताः ॥ १ ॥ शैषिकाच्छैषिको नेष्टः, सरूपः प्रत्ययः क्वचित् । समानवृत्तौ मत्वर्थान्मत्वर्थीयोऽपि नेष्यते ॥ १ ॥ एतद्विवरणं वृहद्वृत्तेरवसेयम् ॥ १ ॥ आयादित्यभिविधावाङ् । अपवादैर्बाधा मा भूदिति वचनम् । तेन यथाभिधानमुत्तरत्र मतुरपि भवति ॥ २ ॥ नावादयः पञ्च ॥ ३ ॥ शिखादयः पञ्चाशत् । आकृतिगणोऽयम् ॥ ४ ॥

## व्रीह्यादिभ्यस्तौ ॥ ७ ॥ २ ॥ ५ ॥

व्रीह्यादिभ्य इकेनौ स्तो, मत्वर्थ च मतुस्तथा ।
व्रीहिको व्रीहिमान् व्रीही, मायावान् मायिमायिकौ ॥५॥

## अतोऽनेकस्वरात् ॥ ७ ॥ २ ॥ ६ ॥

अनेकस्वरतोऽदन्ता-दिकेनौ च मतुस्तथा ।
छत्रवान् छत्रिकः छत्री, दण्डवान् दण्डिदण्डिकौ ॥६॥

## अशिरसोऽशीर्षश्च ॥ ७ ॥ २ ॥ ७ ॥

अशिरस इकेनौ स्तो-ऽशीर्षादेशस्तथा मतुः ।
अशीर्षवानशीर्षी चा-शीर्षिकः केतुरुच्यते ॥ ७ ॥

## अर्थार्थान्ताद्भावात् ॥ ७ ॥ २ ॥ ८ ॥

मत्वर्थेऽर्थान्ततोऽर्थाच्च, स्त इकेनौ नु भावतः ।
प्रत्यर्थिकश्च प्रत्यर्थी, स्यादर्थी पुनरर्थिकः ॥ ८ ॥

व्रीह्यादयः प्रयोगगम्याः ॥ ५ ॥ अनेकस्वरादिति किम् खवान् । अभिधानार्थस्येतिकरणस्यानुवृत्तेः कृदन्तान्न भवतः । जातिशब्देभ्यो न भवतः । धनादुत्तमर्णे भवतः । सप्तम्यर्थे न भवतः । एतत्सर्वं प्रायिकमवसेयमिति ॥ ६ ॥ इकेनौ 'शीर्षः स्वरे तद्धिते' ३-२-१०३ इति शीर्षादेशो विद्यत एव, मतौ त्वशिरसोऽशीर्षभावोऽनेन विधीयते ॥ ७ ॥ नियमार्थमिदम् । उभयथा चायं नियमो वाक्यभेदेन क्रियते । भाववाचिन एवैतौ प्रत्ययौ भवतः । भाववाचिनश्चैतावेव भवतः ॥ ८ ॥

## व्रीह्यर्थतुन्दादेरिलश्च ॥ ७ ॥ २ ॥ ९ ॥

व्रीह्यर्थेभ्यश्च तुन्दादे–रिलेकेना मतुस्तथा ।
शालिलः शालिकः शाला, शालिमान् तुन्दितुन्दिलौ॥९॥

## स्वाङ्गाद्विवृद्धात्ते ॥ ७ ॥ २ ॥ १० ॥

विवृद्धोपाधिकात् स्वाङ्गा–दिलेकेना मतुस्तथा ।
कर्णिलः कर्णिकः कर्णी, कर्णवान् कर्णवृद्धितः ॥ १० ॥

## वृन्दादारकः ॥ ७ ॥ २ ॥ ११ ॥

मत्वर्थे वृन्दाशब्दात् स्या–दारकश्च मतुस्तथा ।
वृन्दी वृन्दारको वृन्द–वाँश्च रूपत्रयं मतम् ॥ ११ ॥

## शृङ्गात् ॥ ७ ॥ २ ॥ १२ ॥

मत्वर्थे शृङ्गशब्दात् स्या–दारकश्च मतुस्तथा ।
शृङ्गी शृङ्गारकः शृङ्ग–वानपि भाति शृङ्गतः ॥ १२ ॥

## फलबर्हाच्चेनः ॥ ७ ॥ २ ॥ १३ ॥

शृङ्गाच्च फलबर्हाभ्यां, मत्वर्थे स्यादिनो मतुः ।
बर्हिणो बर्हवान् बर्ही, फलिनः फलवान् फली ॥ १३ ॥

---

तुन्दादयो नव । एवं तुन्दिकः, तुन्दवानिति ॥ ९ ॥ विवृद्धादिति किम् ? अन्यत्रेलो न भवति ॥ १० ॥ वृन्दीति शिखादित्वात् ॥ ११ ॥ शिखादित्वात् ङ्गी ॥ १२ ॥ एतेन शृङ्गात् शृङ्गिणः ॥ १३ ॥

## मलादीमसश्च ॥ ७ ॥ २ ॥ १४ ॥

ईमसेनौ मलात् स्यातां, मत्वर्थे च मतुस्तथा ।
मनो न मलिनं धर्म्यं, मलवच्च मलीमसम् ॥ १४ ॥

## मरुत्पर्वणस्तः ॥ ७ ॥ २ ॥ १५ ॥

तो मरुत्पर्वशब्दाभ्यां, मत्वर्थे च मतुस्तथा ।
मरुत्वान् पर्ववांश्चापि मरुत्तः पर्वतस्तथा ॥ १५ ॥

## वलिवटितुण्डेर्भः ॥ ७ ॥ २ ॥ १६ ॥

स्याद् वलिवटितुण्डिभ्यो, भप्रत्ययो मतुस्तथा ।
वलिभो वटिभस्तुण्डि-भो बलिनश्च तुण्डिलः ॥१६॥

## ऊर्णाहंशुभमो युस् ॥ ७ ॥ २ ॥ १७ ॥

मत्वर्थे युस् भवेदूर्णा-अहं-शुभमिति त्रयात् ।
ऊर्णायुरथ चाहंयुः, शुभंयुः संभवेत् क्वचित् ॥ १७ ॥

## कंशंभ्यां युस्तियस्तुतवभम् ॥ ७ ॥ २ ॥ १८ ॥

कंशंभ्यां सप्त वाच्या यु-स्तियस्तुतवभा इति ।
कंयुः कन्तिश्च कंयश्च, कन्तः कंवश्च कन्तुकः ॥ १८ ॥

---

स्पष्टे ॥ १४ ॥ १५ ॥ बलिन इत्यङ्गादित्वान्ने । तुण्डिल इति सिध्मादिपाठाल्ले । तुण्डिः प्रवृद्धा नाभिः ॥१६॥ ऊर्णायुः उरभ्रः । अहंयुः अहंकारी । शुभंयुः कल्याणबुद्धिः ॥ १७ ॥ एवं कंभः । एवमेव शंयुरित्यादयोऽपि सप्त । युस्यसोः सकारो 'नामसिदय्व्यञ्जने' १-१-२१ इति पदत्वार्थः । तेन 'तौ मुमो व्यञ्जने स्वौ' १-३-१४ इत्यनुस्वारानुनासिकौ सिद्धौ ॥ १८ ॥

## बलवातदन्तललाटादूलः ॥ ७ ॥ २ ॥ १९ ॥

बलाद्वाताल्ललाटाश्च, दन्तादूलो मतुस्तथा ।
ललाटूलश्च वातूलो, दन्तूलो ना बलूलभृत् ॥ १९ ॥

## प्राण्यङ्गादातो लः ॥ ७ ॥ २ ॥ २० ॥

लः स्यादादन्ततः शब्दात्, प्राण्यङ्गतो मतुस्तथा ।
चूडालश्च शिखालश्च,जङ्घालोऽपि भवेन्नरः ॥ २० ॥

## सिध्मादिक्षुद्रजन्तुरुग्भ्यः ॥ ७ ॥ २ ॥ २१ ॥

सिध्मादेः क्षुद्रजन्तुभ्यो, रुग्भ्यश्च लो मतुस्तथा ।
स्यात् सिध्मलश्च, यूकालो, मूर्च्छालो दुःखदुःखितः ॥२१॥

## प्रज्ञापर्णोदकफेनाल्लेलौ ॥ ७ ॥ २ ॥ २२ ॥

प्रज्ञातः पर्णतः फेना–दुदकाल्ल इलो मतुः ।
प्रज्ञालः प्रज्ञिलः पर्ण–लश्चोदकलफेनलौ ॥ २२ ॥

---

स्पष्टम् ॥१९॥ प्राण्यङ्गादिति किम् ? जङ्घावान् प्रासादः । शिखावान् प्रदीपः । अङ्गग्रहणं किम् ? इच्छावान् । आत इति किम् ? हस्तवान् ॥२०॥ सिध्मादयः पञ्चत्रिंशत् । आनकुलात् क्षुद्रजन्तुः, रुग्भ्य इति बहुवचनं स्वरूपविधिनिषेधार्थम् ॥२१॥ स्पष्टम् ॥२२॥

## कालाजटाघाटात् क्षेपे ॥ ७ ॥ २ ॥ २३ ॥

क्षेपे कालाजटाघाटा-भ्यो लेलौ प्रत्ययौ ततः ।
कालालः कालिलो घाटा-लो घाटिलो जटालवित् ॥२३॥

## वाच आलाटौ ॥ ७ ॥ २ ॥ २४ ॥

क्षेपे स्तो वाच आलाटौ, ग्मिनूमत्वोरपवादकौ ।
वाचालोऽपि च वाचाटो, निःसारं बहु भाषते ॥ २४ ॥

## ग्मिन् ॥ ७ ॥ २ ॥ २५ ॥

मत्वर्थे ग्मिन् भवेद्वाचो, मतुश्च प्रत्ययः पुनः ।
अननुनासिकार्थं गो, वाग्मी सर्वत्र शस्यते ॥ २५ ॥

## मध्वादिभ्यो रः ॥ ७ ॥ २ ॥ २६ ॥

मध्वादिभ्यो भवेद् रस्तन्, मधुरं मधुरो रसः ।
खरकुञ्जरकण्डूराः, शुषिरोषरमुष्कराः ॥ २६ ॥

---

मतुना क्षेपो न गम्यते इति क्षेपे मतुर्न भवति ॥२३॥ क्षेपे मतुर्न । क्षेप इति किम् ? वाग्मी । वाग्वान् ॥२४॥ क्षेप इति निवृत्तम् ॥ २५ ॥ मत्वादयः प्रयोगगम्याः मधुरो रसः । अत्र मधुशब्दः स्वादुत्वे गुणत्वे गुणसामान्ये वर्तते । मधुरं मधु । मधुरं क्षीरम्-अत्र गुणे । क्षौद्रादिद्रव्यवृत्तेस्तु मतुरेव इति करणात् । मधुमान् घटः । एवं खं महत्कण्ठविवरमस्यास्ति खरः, गर्दभः । खवानन्यः । मुखं सर्वस्मिन् वक्तव्ये यस्यास्तीति मुखरः वाचालः । मुखवानन्यः । कुञ्जरो हस्ती । कुञ्जशब्दोऽत्र हनुपर्यायः । कुञ्जवानन्यः । नगरं पुरम् । नगवदन्यत् । ऊषरं क्षेत्रम् । उषवदन्यत् । मुष्करः पशुः मुष्कवानन्यः । शुषिरं शुषिमत् काष्ठम् । कण्डूरः कण्डूमान् । पाण्डुरः पाण्डुमान् । पांशुरः पांशुमान् ॥ २६ ॥

## कृष्यादिभ्यो बलच् ॥ ७ ॥ २ ॥ २७ ॥

कृष्यादिभ्यो बलच् वाच्यः, स्यात् कुटुम्बी कृषीबलः ।
रजस्वलाः स्त्रियो हस्ती, दन्तावलः प्रयोगतः ॥ २७ ॥

## लोमपिच्छादेः शेलम् ॥ ७ ॥ २ ॥ २८ ॥

लोमादिभ्यो भवेत् शोऽथ, पिच्छादिभ्य इलः पुनः ।
लोमशो रोमशश्चव–मुरसिलश्च पिच्छिलः ॥२८॥

## नोऽङ्गादेः ॥ ७ ॥ २ ॥ २९ ॥

अङ्ग इत्येवमादिभ्यो, मत्वर्थे नस्तथा मतुः ।
कल्याणाङ्ग्यङ्गना रूढ्या, पामनवामनादयः ॥२९॥

## शाकीपलालीदर्द्र्वा ह्रस्वश्च ॥ ७ ॥ २ ॥ ३० ॥

शाक्या दर्द्र्वाः पलाल्याश्च, नो ह्रस्वश्च मतुस्तथा ।
शाकिनो दर्द्रुणः कश्चित्, पलालिनो भवेत् पुनः ॥३०॥

---

कृष्यादयः प्रयोगगम्याः ॥ २७ ॥ लोमाद्याः दश । पिच्छाद्याः षट् ॥२८॥ अङ्गादय योदश ॥२९॥ योगविभाग उत्तरार्थः महच्छाकं शाकसमूहो वा शाकी । महत्पलालं पलालक्षोदो वा पलाली । दर्द्रूर्नाम व्याधिः ॥३०॥

## विष्वचो विषुश्च ॥ ७ ॥ २ ॥ ३१ ॥

विष्वचो नरतथाचास्या-देशो विषुर्विधीयते ।
आदित्यो विषुणो वायु-र्विष्वग्वान् स्यान्मतौ पुनः ॥३१॥

## लक्ष्म्या अनः ॥ ७ ॥ २ ॥ ३२ ॥

मत्वर्थे स्यादनो लक्ष्मी-शब्दान्मतुरपीष्यते ।
लक्ष्मीवान् लक्ष्मणो रामा-नुजोऽयं हरिरष्टमः ॥ ३२ ॥

## प्रज्ञाश्रद्धार्चावृत्तेर्णः ॥ ७ ॥ २ ॥ ३३ ॥

णो मत्वर्थे भवेत् प्रज्ञा-श्रद्धार्चावृत्तितो मतुः ।
प्राज्ञः श्राद्धस्तथैवार्चो, वार्तश्च वृत्तिमानिति ॥ ३३ ॥

## ज्योत्स्नादिभ्योऽण् ॥ ७ ॥ २ ॥ ३४ ॥

ज्योत्स्ना इत्येवमादिभ्यो, मत्वर्थेऽण् प्रत्ययो भवेत् ।
ज्यौत्स्नः पक्षो निशा ज्यौत्स्नी, ज्योत्स्नादयः प्रयोमगाः ॥३४॥

## सिकताशर्करात् ॥ ७ ॥ २ ॥ ३५ ॥

सिकताशर्कराभ्यां स्या-दण् मत्वर्थे मतुस्तथा ।
सैकतः सिकतावाँश्च, शर्करावाँश्च शार्करः ॥ ३५ ॥

---

विषुशब्दो निपातो नानात्वे वर्तते । विष्वगिति अखण्डमव्ययं वा ॥३१॥ स्पष्टम् ॥ ३२ ॥ एवं प्रज्ञावान्, श्रद्धावान् । स्त्री तु प्राज्ञा, श्राद्धा, आर्चा, वार्ता । प्राज्ञीति स्वार्थिकाणन्तात् ॥ ३३ ॥ स्पष्टं सूत्रद्वयम् ॥३४॥३५॥...

## इलश्च देशे ॥ ७ ॥ २ ॥ ३६ ॥

सिकताशर्कराभ्यां स्तो, देशेऽणिलौ मतुस्तथा ।
देशाः सिकतिलाः सैक–तशार्करिलशार्कराः ॥ ३६ ॥

## द्युद्रोर्मः ॥ ७ ॥ २ ॥ ३७ ॥

मो भवेद् द्युद्रुशब्दाभ्यां, मत्वर्थे तद् द्युमो द्रुमः ।
रूढिशब्दाविमौ रूढि–विषये हि मतुर्नहि ॥ ३७ ॥

## काण्डाण्डभाण्डादीरः ॥ ७ ॥ २ ॥ ३८ ॥

काण्डाण्डभाण्डशब्देभ्यः, स्यादीरः प्रत्ययो मतुः ।
काण्डीराण्डीरभाण्डीराः, काण्डवान् भाण्डवाँस्तथा ॥३८॥

## कच्छ्वा डुरः ॥ ७ ॥ २ ॥ ३९ ॥

कच्छूशब्दाड्डुरो वाच्यो, मत्वर्थे मतुरप्यथ ।
कच्छूमान् कच्छुरो डित्वा–दन्त्यस्वरादि लुप्यते ॥ ३९ ॥

## दन्तादुन्नतात् ॥ ७ ॥ २ ॥ ४० ॥

औन्नत्योपाधिकाद् दन्तात्, स्यान्मत्वर्थे डुरस्ततः ।
हसति दन्तुरं दृष्ट्वा, वरं किं सुदती सती ॥ ४० ॥

---

॥३६॥ द्यौर्द्युर्वास्यास्मिन् वास्तीति द्युमः । द्रूणि दारूण्यस्यास्मिन् वा सन्तीति द्रुमः । रूढिविषयादन्यत्र तु मतुरेव द्युमान्, द्रुमान् ॥ ३७ ॥ आण्डौ मुष्कौ ॥३८॥ स्पष्टम् ॥ ३९ ॥ उन्नतादिति किम्? दन्तवान् ॥४०॥

## मेधारथान्नवेरः ॥ ७ ॥ २ ॥ ४१ ॥

इरो मेधारथाभ्यां वा, पक्षे भवेद्यथोचितम् ।
मेधावी मेधिरो वोध्यो, रथिरो रथिको रथी ॥ ४१ ॥

## कृपाहृदयादालुः ॥ ७ ॥ २ ॥ ४२ ॥

कृपाहृदयशब्दाभ्यां, वालुर्मत्वर्थतो मतुः ।
कृपालुर्हृदयालुश्च, कृपावान् हृदयी तथा ॥ ४२ ॥

## केशाद्वः ॥ ७ ॥ २ ॥ ४३ ॥

मत्वर्थे केशशब्दाद्वः प्रत्ययो वा मतुस्तथा ।
केशवः केशिकः केशी, केशवान् केशवो हरिः ॥४३॥

## मण्यादिभ्यः ॥ ७ ॥ २ ॥ ४४ ॥

मण्यादिभ्यो भवेद्वा वो, मत्वर्थतो मतुस्तथा ।
मणिवो मणिमान् सिध्मा-दिपाठान्मणिलः पुनः ॥४४॥

## हीनात् स्वाङ्गादः ॥ ७ ॥ २ ॥ ४५ ॥

स्याद्धीनोपाधिकात् स्वाङ्गा-दो मत्वर्थेऽन्यथा मतुः ।
खण्डकर्णो भवेत् कर्णो, नासिकश्छिन्ननासिकः ॥ ४५ ॥

---

सूत्रत्रयमतिरोहितार्थम् ॥ ४१ ॥ ४२ ॥ ४३ ॥ मण्यादयो दश ॥ ४४ ॥
हीनादिति किम् ? कर्णवान्, नासिकावान् इत्येव भवति ॥ ४५ ॥

## अभ्रादिभ्यः ॥ ७ ॥ २ ॥ ४६ ॥

अभ्र इत्येवमादिभ्यो, मत्वर्थे त्वो मतुस्तथा ।
यथादर्शनमभ्रं ख–मर्शस उरसो मतः ॥ ४६ ॥

## अस्तपोमायामेधास्रजो विन् ॥ ७ ॥ २ ॥ ४७ ॥

असन्तेभ्यस्तपोमाया–मेधास्रग्भ्यश्च विन्मतुः ।
यशस्वी च तपस्वी च, मायावी जातु जायते ॥४७॥

## आमयाद् दीर्घश्च ॥ ७ ॥ २ ॥ ४८ ॥

आमयाद् विन् भवेद् दीर्घ, आमयस्य मतुस्तथा ।
आमयावी सुखं किञ्चि–दामयवान्न विन्दति ॥ ४८ ॥

## स्वान् मिन्नीशे ॥ ७ ॥ २ ॥ ४९ ॥

मिन्न मत्वर्थे स्वशब्दात् स्या–दीशे वाच्येऽस्य दीर्घता ।
स्वामी चेद्वीतरागो मे, स्ववानहमनीश्वरः ॥ ४९ ॥

## गोः ॥ ७ ॥ २ ॥ ५० ॥

भवेद् मिन्प्रत्ययो गोतो, मत्वर्थे मतुरप्यतः ।
गोमिनो ननु गोमन्तः सन्ति गावोऽस्य भूरिशः ॥५०॥

---

चतुर्दशाभ्रादयः, अभ्रादिराकृतिगणः ॥ ४६ ॥ एवं मेधावी, स्रग्वी । असन्तेनैव सिद्धे तपसो ग्रहणं ज्योत्स्नाद्यणा बाधो मा भूदित्येवमर्थम् ॥ ४७ ॥ स्पष्टानि ॥ ४८ ॥ ४९ ॥ ५० ॥

## ऊर्जो विन्वलावश्चान्तः ॥ ७ ॥ २ ॥ ५१ ॥

ऊर्ज्शब्दाद् विन्वलौ स्यातां, तथाऽश्चान्तोऽस्य जायते ।
ऊर्जस्वलस्तथोर्जस्वी, मतावूर्ग्वानपीष्यते ॥ ५१ ॥

## तमिस्रार्णवज्योत्स्ना ॥ ७ ॥ २ ॥ ५२ ॥

तमःशब्दात्तमिस्रेति, ज्योत्स्ना च ज्योतिषः पुनः ।
अर्णवश्चार्णसः शब्दा-न्निपात्यन्ते यथाक्रमं ॥ ५२ ॥

## गुणादिभ्यो यः ॥ ७ ॥ २ ॥ ५३ ॥

यः प्रत्ययो गुणादिभ्यो, मत्वर्थे जायते मतुः ।
पुरुषो गुणवान् गुण्यो, हिम्यश्च हिमवानगः ॥५३॥

## रूपात् प्रशस्ताहतात् ॥ ७ ॥ २ ॥ ५४ ॥

स्यात् प्रशस्ताहतोपाधे-र्मत्वर्थे यश्च रूपतः ।
प्रशस्तरूपतो रूप्यो, रूप्यश्चाहतरूपतः ॥ ५४ ॥

## पूर्णमासोऽण् ॥ ७ ॥ २ ॥ ५५ ॥

मत्वर्थे पूर्णमास्शब्दा-दण् प्रत्ययो भवेत्ततः ।
पूर्णो माश्चन्द्रमा अस्यां, पौर्णमासी तु पूर्णिमा ॥ ५५ ॥

---

कथमूर्जस्वान् ऊर्जयतेः असप्रत्ययान्तस्य मतौ ॥ ५१ ॥ स्पष्टम् ॥ ५२ ॥ गुणादयः प्रयोगगम्याः ॥५३॥ निघातिकाताडनाद् दीनारादिषु यद्रूपमुत्पद्यते तदाहतं रूप्यम् । प्रशस्ताहतादिति किम् ? रूपवान् । प्रशंसायां मतुरपि, रूपवती कन्या । भायादित्यस्य पूर्णोऽवधिः, अतः परं मतुर्नास्ति ॥ ५४ ॥ स्पष्टम् ॥ ५५ ॥

## गोपूर्वादत इकण् ॥ ७ ॥ २ ॥ ५६ ॥

गोशब्दपूर्वतोऽदन्तात्, स्यादिकण् प्रत्ययस्ततः ।
गौशतिको नरः कश्चि–दधिपो गौसहस्रिकः ॥ ५६ ॥

## निष्कादेः शतसहस्रात् ॥ ७ ॥ २ ॥ ५७ ॥

इकण् शतसहस्रान्ता–न्निष्कादेर्मतुतो भवेत् ।
स्यान्नैष्कशतिकः श्रीमान्, नैष्कसहस्रिकोऽप्यतः ॥ ५७ ॥

## एकादेः कर्मधारयात् ॥ ७ ॥ २ ॥ ५८ ॥

भवेदिकणकारान्ता–देकादेः कर्मधारयात् ।
स्यादैकगविकश्चैक–शतिकैकसहस्रिकौ ॥ ५८ ॥

## सर्वादेरिन् ॥ ७ ॥ २ ॥ ५९ ॥

इन् सर्वादेरकारान्ता–न्मत्वर्थे कर्मधारयात् ।
सर्वकेशी नटः सर्व–बीजी सर्वधनी क्वचित् ॥ ५९ ॥

---

मत्वादीनामपवादः । अत इति किम् ? गोविंशतिमान् । कथं गौशकटिकः ? शकटीशब्देन समानार्थः शकटशब्दोऽस्ति; शकटी–शब्दात्तु मतुः अनभिधानान्न भवति ॥ ५६ ॥ निष्कादेरिति किम् ? शती, सहस्री । आदिग्रहणात् सुवर्णनिष्कशतमस्यास्तीत्यत्र न भवति ॥ ५७ ॥ कर्मधारयादिति किम् ? एकस्य गौरेकगवः सोऽस्यास्तीति न भवति ॥ ५८ ॥ स्पष्टम् ॥ ५९ ॥

## प्राणिस्थादस्वाङ्गाद् द्वन्द्वरुग्निन्द्यात्

॥ ७ ॥ २ ॥ ६० ॥

अस्वाङ्गवाचिनोऽदन्ताद्, द्वन्द्वाद्रुग्निन्द्यतो ह्यथेन् ।
प्राणिस्थात् ककुदावर्ती, शङ्खनूपुरिणी तथा ॥ ६० ॥

## वातातीसारपिशाचात् कश्चान्तः ॥ ७ ॥ २ ॥ ६१ ॥

इन् कश्चान्तो भवेद्वाता–दतीसारात् पिशाचतः ।
कोऽप्यतीसारकी कश्चिद्, वातकी च पिशाचकी ॥६१॥

## पूरणाद्वयसि ॥ ७ ॥ २ ॥ ६२ ॥

स्यादिन्नेव वयोगम्ये, पूरणप्रत्यान्ततः ।
दशमः पञ्चमो मासो–ऽस्य दशमी च पञ्चमी ॥ ६२ ॥

## सुखादेः ॥ ७ ॥ २ ॥ ६३ ॥

स्यादिन्नेव सुखादिभ्यो, मत्वर्थे प्रत्ययस्ततः ।
सुखी भवति धर्मेण, दुःखी पापेन कर्मणा ॥ ६३ ॥

---

रुक्. कुष्ठी, प्राणिस्थादिति किम् ? पुष्पफलवान् वृक्षः । अस्वाङ्गादिति किम् ? स्तनकेशवर्ती । अत इत्येव, चित्रकल्लाटिकावती । 'अतोऽनेकस्वरात्' ७–२–६२ इत्येव सिद्धे इकादिबाधनार्थं वचनम् ॥ ६० ॥ स्पष्टे ॥ ६१ ॥ ६२ ॥ सुखादयश्चतुर्दश ॥ ६३ ॥

## मालायाः क्षेपे ॥ ७ ॥ २ ॥ ६४ ॥

क्षेपे मत्वर्थतो माला-शब्दादिन्नेव जायते ।
मालाकारो नरो माली मालावानन्यतो मतः ॥ ६४ ॥

## धर्मशीलवर्णान्तात् ॥ ७ ॥ २ ॥ ६५ ॥

स्याद्धर्मशीलवर्णान्ता-न्मताविन्नेव शब्दतः ।
मुनिधर्मी सुधाशीली, ब्राह्मणवर्णिनो मताः ॥ ६५ ॥

## बाहूर्वादेर्बलात् ॥ ७ ॥ २ ॥ ६६ ॥

बाहूर्वादेर्बलान्तात् स्या-न्मताविन्नेव नामतः ।
ऊरुबली तथा बाहु-बल्यार्षभिर्भुवि श्रुतः ॥ ६६ ॥

## मन्माब्जादेर्नाम्नि ॥ ७ ॥ २ ॥ ६७ ॥

मन्नन्तेभ्यश्च मान्तेभ्यो-ऽब्जादिभ्यो नाम्नि हीन् भवेत् ।
दामिनी कामिनी राजी-विन्यब्जिनी मृणालिनी ॥६७॥

## हस्तदन्तकराज्जातौ ॥ ७ ॥ २ ॥ ६८ ॥

हस्ताद् दन्तात् कराज्जातौ, मताविन्नेव जायते ।
हस्ती दन्ती करी हस्त-वान् करवाँश्च दन्तवान् ॥६८॥

---

मालाशब्दः शिखादिः । ततः क्षेपे मतुनिवृत्यर्थं वचनम् ॥ ६४ ॥ सूत्रद्वयं स्पष्टम् ॥ ६५ ॥ ६६ ॥ नाम्नीति किम्? सामवान्, सोमवान्, अब्जवान् ॥ ६७ ॥ स्पष्टम् ॥ ६८ ॥

## वर्णाद् ब्रह्मचारिणि ॥ ७ ॥ २ ॥ ६९ ॥

ब्रह्मचार्यभिधेयश्चेद्, भवेदिन् वर्णतो मतौ ।
वर्णी ना नारदो विश्वे, वर्णं विन्दति भास्वरम् ॥ ६९ ॥

## पुष्करादेर्देशे ॥ ७ ॥ २ ॥ ७० ॥

इन्नेव पुष्करादिभ्यो, देशे मत्वर्थतो मतः ।
देशः पुष्करिणी पद्मि-नीभः पुष्करवान् पुनः ॥७०॥

## सूक्तसाम्नोरीयः ॥ ७ ॥ २ ॥ ७१ ॥

ईयो मत्वर्थतः सूक्ते, सामनि चाभिधेयतः ।
अच्छावाकीयमाख्यातं, यज्ञायज्ञीयमित्यपि ॥ ७१ ॥

## लुब् वाध्यायानुवाके ॥ ७ ॥ २ ॥ ७२ ॥

लुब् वाऽध्यायानुवाके स्या-दीयस्य विहितस्य तत् ।
अध्यायो गर्दभाण्डश्च, गर्दभाण्डीय इत्यपि ॥ ७२ ॥

---

वर्णशब्दो ब्रह्मचर्यपर्यायः। अन्ये तु वर्णशब्दो ब्राह्मणादिवर्णवचनः। तत्र ब्रह्मचारीत्यनेन शूद्रव्यवच्छेदः क्रियते इति मन्यन्ते तेन त्रैवर्णिको वर्णीत्युच्यते। स हि विद्याग्रहणार्थमुपनीतो ब्रह्म चरति, न शूद्र इति । ब्रह्मचारीति किम्? वर्णवान् ॥ ६९ ॥ त्रयोविंशतिः पुष्करादिः। 'नडकुमुद—' ६-२-७४- इत्यादिना चातुरर्थिकेन मतुना नड्वान्, कुमुद्वानिति ॥ ७० ॥ मत्वादीनामपवादः। सूक्तसाम्नी ग्रन्थविशेषौ ॥७१॥ अध्यायानुवाकौ ग्रन्थविशेषौ ॥७२॥

## विमुक्तादेरण् ॥ ७ ॥ २ ॥ ७३ ॥

अण् मत्वर्थे विमुक्तादेः, स्यादध्यायानुवाकयोः ।
अनुवाकश्च वैमुक्तो–ऽध्यायो दैवासुरो यथा ॥ ७३ ॥

## घोषदादेरकः ॥ ७ ॥ २ ॥ ७४ ॥

मत्वर्थे घोषदादेः स्या–दकोऽध्यायानुवाकयोः ।
प्राणकः स्वाहको घोष–दको गोषदकस्तथा ॥ ७४ ॥

## प्रकारे जातीयर् ॥ ७ ॥ २ ॥ ७५ ॥

जातीयर् स्यात् प्रकारेऽर्थे, षष्ठ्यर्थे प्रथमान्ततः ।
पटुजातीय इन्द्रोऽयं, नानाजातीय ईहितः ॥ ७५ ॥

## कोण्वादेः ॥ ७ ॥ २ ॥ ७६ ॥

अणु इत्येवमादिभ्यः, प्रकारे को भवेत्ततः ।
अणुक स्थूलकश्चैवं, गोलिकामाषकेषुकाः ॥ ७६ ॥

## जीर्णगोमूत्रावदातसुरायवकृष्णाच्छाल्याच्छादन-सुराहिव्रीहितले ॥ ७ ॥ २ ॥ ७७ ॥

जीर्णादिभ्यः क्रमाच्छाल्या–द्यर्थे कः स्यात् प्रकारतः ।
जीर्णः प्रकार एषां ते, जीर्णकाः शालयो मताः ॥७७॥

---

विमुक्तादयः षड्विंशतिः ॥ ७३ ॥ एकोनविंशतिर्घोषदादयः ॥ ७४ ॥ सामान्यस्य भिद्यमानस्य यो विशेषो विशेषान्तरानुप्रवृत्तः स प्रकारः । रित्करणं 'रिति' ३-२-५८ इत्यत्र विशेषणार्थम् ॥ ७५ ॥ अण्वादयो द्वाविंशतिः जातीयरोऽपवादः ॥७६॥ शाल्यादिष्विति किम् ? जीर्णजातीयोऽन्य इत्यादि ॥७७॥

## भूतपूर्वे प्चरट् ॥ ७ ॥ २ ॥ ७८ ॥

प्चरट् स्याद् भूतपूर्वेऽर्थे, स्थितात् स्वार्थेऽत्र नामतः ।
आढ्यचरो नरो दृष्टो, दर्शनीयचरः पुरः ॥ ७८ ॥

## गोष्ठादीनञ् ॥ ७ ॥ २ ॥ ७९ ॥

स्यादीनञ् प्रत्ययो भूत-पूर्वेऽर्थे गोष्ठशब्दतः ।
भूतपूर्वो यथा गोष्ठो, गोष्ठीनो देश उच्यते ॥ ७९ ॥

## षष्ठया रूप्यप्चरट् ॥ ७ ॥ २ ॥ ८० ॥

प्चरट् रूप्यश्च षष्ठयन्ताद्, भूतपूर्वेऽर्थतो मतौ ।
चैत्रस्य भूतपूर्वः स्या-चैत्राद् रूप्यस्तथा चरः ॥ ८० ॥

## व्याश्रये तसुः ॥ ७ ॥ २ ॥ ८१ ॥

नानापक्षाश्रये गम्य-माने षष्ठयन्ततस्तसुः ।
देवा अर्जुनतोऽभूव-न्नादित्यः कर्णतोऽभवत् ॥ ८१ ॥

---

अतः परं प्रायः स्वार्थिकाः प्रत्ययाः । तत्रोपाधिः प्रकृतेर्विज्ञायते स प्रत्ययस्य द्योत्यो भवति । टकारो ङ्यर्थः । पकारः पुंवद्भावार्थः । भूतशब्दो वर्तमानेऽप्यस्ति, पूर्वशब्दो दिगादावपीति अतिकान्तकालप्रतिपत्त्यर्थमुभयोरुपादानम् ॥ ७८ ॥ स्पष्टे ॥ ७९ ॥ ८० ॥ उकारो–'ऽधण्तस्वाद्याशसः १–१–३२ इत्यत्र विशेषणार्थः । व्याश्रये इति किम् ? वृक्षस्य शाखा । नाना पक्षाश्रयो व्याश्रयः ॥ ८१ ॥

## रोगात् प्रतीकारे ॥ ७ ॥ २ ॥ ८२ ॥

गम्यमाने प्रतीकारे, षष्ठ्यन्ताद्रोगतस्तसुः ।
कुरु प्रवाहिकातोऽस्य, रोगस्य भेषजं कुरु ॥ ८२ ॥

## पर्यभेः सर्वोभये ॥ ७ ॥ २ ॥ ८३ ॥

तसुः सर्वोभयार्थाभ्यां, पर्यभिभ्यां भवेत् क्रमात् ।
सागरः परितो लङ्का–मभितो नगरं नदी ॥ ८३ ॥

## आद्यादिभ्यः ॥ ७ ॥ २ ॥ ८४ ॥

स्यात् सम्भवद्विभक्त्यन्ता–दाद्यादिशब्दतस्तसुः ।
आदितो मध्यत श्चान्त–तोऽन्यतः पूर्वतास्त्वितः ॥ ८४ ॥

## क्षेपातिग्रहाव्यथेष्वकर्तुस्तृतीयायाः ॥ ७ ॥ २ ॥ ८५ ॥

क्षेपाद्यर्थे तृतीयान्ता–दकर्तृवाचिनस्तसुः ।
वृत्तेन वृत्ततः क्षिप्तो, न व्यथतेऽतिगृह्यते ॥ ८५ ॥

---

स्पष्टम् ॥ ८२ ॥ सर्वोभय इति किम्? वृक्षं परि, वृक्षमभि ॥ ८३ ॥ आद्यादयः प्रयोगगम्याः ॥ ८४ ॥ क्षेपो निन्दा । अतिक्रम्य ग्रहणमतिग्रहः । अचलनमक्षोभनमव्यथा, अभीतिर्वा ॥ ८५ ॥

## पापहीयमानेन ॥ ७ ॥ २ ॥ ८६ ॥

स्यात् पापहीयमानाभ्या–मकर्तृवाचिनस्तसुः ।
तृतीयान्ताद्भवेत् पापो, हीनो वृत्तेन वृत्ततः ॥ ८६ ॥

## प्रतिना पञ्चम्याः ॥ ७ ॥ २ ॥ ८७ ॥

पञ्चमीप्रतियोगे या, तदन्तात् स्यान्नवा तसुः ।
अर्जुनात् प्रति सौभद्रो–ऽर्जुनतः प्रति सङ्गरे ॥ ८७ ॥

## अहीयरुहोऽपादाने ॥ ७ ॥ २ ॥ ८८ ॥

या स्यात् पञ्चम्यपादाने, तदन्ताद् वा तसुर्भवेत् ।
हीयरुहोर्यदि स्यान्नो, चौराद्बिभेति चौरतः ॥ ८८ ॥

## किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित्तस् ॥ ७ ॥ २ ॥ ८९ ॥

किमो बहोरवैपुल्यात्, सर्वादेर्द्व्यादिवर्जितात् ।
पञ्चम्यन्तात्तसुः पिच्च, स भवेत् सर्वतः कुतः ॥ ८९ ॥

---

पापहीयमानेनेति किम्? चारित्रेण शुद्धः। अकर्तुरित्येव, चैत्रेण हीयते। तृतीयाया इत्येव, ग्रामे हीयते ॥ ८६ ॥ अर्जुनस्य प्रतिनिधिरित्यर्थः। पञ्चम्या इति किम्? ग्रामं प्रति विद्योतते ॥ ८७ ॥ अहीयरुह इति किम्? सार्थाद् हीयते, पर्वतादवरोहति। अपादान इति किम्? ऋते धर्मात् कुतः सुखम् ॥८८॥ व्यक्तं सूत्रयुगलम् ॥ ८९ ॥...

## इतोऽतः कुतः ॥ ७ ॥ २ ॥ ९० ॥

इदंशब्दादितोऽतः स्या–देतच्छब्दात् कुतः किमः ।
निपात्यन्ते त्रयः शब्दाः, कुतः संसाध्यते शिवः ॥ ९० ॥

## भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैकार्थात् ॥ ७ ॥ २ ॥ ९१ ॥

भवत्वादिभिरेकार्था–द्विभक्त्यन्तात् किमादितः ।
स्यात् पित्तस् प्रत्ययो वा स, भवानस्ति ततोभवान् ॥९१॥

## त्रप् च ॥ ७ ॥ २ ॥ ९२ ॥

भवत्वादिभिरेकार्था–द्विभक्त्यन्तात् किमादितः ।
त्रप्प्रत्ययो नवा तत्र–भवान् स च भवानिति ॥ ९२ ॥

## क्वकुत्रात्रेह ॥ ७ ॥ २ ॥ ९३ ॥

क्वकुत्रात्रेहचत्वारः, स्युस्त्रबन्ता निपातिताः ।
कुत्रभवान् भवानत्र, क्वचायुष्मान् भवानिह ॥ ९३ ॥

---

... ९० ॥ एवं तौ भवन्तौ, ततो भवन्तादित्यादि । एवमेव चायं भवानितोभवान्, कोभवान् कुतोभवान् इत्यादि । आयुष्मद्दीर्घायुर्देवानांप्रियैः सहाप्येवमेवोदाहरणीयम् ॥ ९१ ॥ रूढिशब्दाश्चैते ततो भवदादयः समुदायाः पूजावचना यथाकथंचित् व्युत्पाद्यन्ते । अत एव पुनस्त्यदादिरनुप्रयुज्यते ॥ ९२ ॥ एषु 'सप्तम्याः' ७–२–९४ इति त्रप् । त्रप्मात्रे चैते आदेशा विधीयन्ते तेन भवदादियोगेऽपि भवन्ति ॥ ९३ ॥

## सप्तम्याः ॥ ७ ॥ २ ॥ ९४ ॥

त्रप् स्यात् किमादिसर्वादे-रवैपुल्याद्बहोस्तथा ।
सप्तम्यन्तात्ततः कुत्र, कस्मिन् सर्वत्र तत्र च ॥ ९४ ॥

## कियत्तत्सर्वैकान्यात् काले दा ॥ ७ ॥ २ ॥ ९५ ॥

दा सप्तम्यन्तकिंयत्तत्-सर्वैकान्याच्च कालतः ।
कदा यदा तदा सर्व-देकदा ह्यन्यदा सदा ॥९५॥

## सदाधुनेदानींतदानीमेतर्हि ॥ ७ ॥ २ ॥ ९६ ॥

काले वाच्ये निपात्यन्ते, शब्दाः पञ्च सदादयः ।
सदैतर्हितदानीञ्चा-धुनेदानीं नमोऽर्हते ॥ ९६ ॥

## सद्योऽद्यपरेद्यव्यह्नि ॥ ७ ॥ २ ॥ ९७ ॥

अह्निकाले निपात्यन्ते, सद्यश्चाद्य परेद्यवि ।
अद्य मे सफलं जन्म, सद्यो देवस्य दर्शनात् ॥ ९७ ॥

## पूर्वापराधरोत्तरान्यान्यतरेतरादेद्युस् ॥ ७ ॥ २ ॥ ९८ ॥

पूर्वादिसप्ततः सप्त-म्यन्तादेद्युस् अहन्यतः ।
पूर्वेद्युरपरेद्युश्चा-धरेद्युः साध्यतेऽन्वहम् ॥ ९८ ॥

---

पकारस्य पुंवद्भावार्थत्वात् बह्वीषु बहुत्र ॥ ९४ ॥ काल इति किम् ? क्वदेशे ॥ ९५ ॥ सर्वस्मिन् काले सदा, अस्मिन् कालेऽधुना, अस्मिन् काले इदानीम्, तस्मिन् काले तदानीम्, अस्मिन् काले एतर्हि ॥ ९६ ॥ समानेऽह्नि सद्यः, अस्मिन्नहनि अद्य, परस्मिन्नहनि परेद्यवि ॥ ९७ ॥ एवमुत्तरेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युः ॥ ९८ ॥

## उभयात् द्युस् च ॥ ७ ॥ २ ॥ ९९ ॥

द्युश्चैद्युस् प्रत्ययः काले-ऽह्नि स्यादुभयशब्दतः ।
उभयद्युर्यथा शुद्ध-मुभयेद्युस्तथैव हि ॥ ९९ ॥

## ऐषमः परुत्परारि वर्षे ॥ ७ ॥ २ ॥ १०० ॥

निपात्यन्ते त्रयो वर्षे, परारिपरुदैषमः ।
वर्षेऽस्मिन्नैषमः पूर्व-स्मिन् परस्मिन् भवेत् परुत् ॥१००॥

## अनद्यतने र्हिः ॥ ७ ॥ २ ॥ १०१ ॥

र्हिः सप्तम्यन्ततः कालेऽनद्यतने किमादितः ।
कर्हि यर्हि तथैतर्हि, तर्ह्यन्यर्हि बहुर्हि च ॥ १०१ ॥

## प्रकारे था ॥ ७ ॥ २ ॥ १०२ ॥

था किमद्व्यादि सर्वाद्य-वैपुल्यबहुतो भवेत् ।
प्रकारे वर्तमानात् तत्, सर्वथोभयथाऽन्यथा ॥ १०२ ॥

---

स्पष्टम् ॥ ९९ ॥ अस्मिन् इमकस्मिन् संवत्सरे ऐषमः, पूर्वस्मिन परस्मिन् वा संवत्सरे परुत्, पूर्वतरे परेतरे वा संवत्सरे परारि ॥ १०० ॥ अनद्यतनेऽपि काले कालमात्रविवक्षायां दादिः प्रत्ययो भवति । सप्तम्यर्थमात्र-विवक्षायां त्रबपि भवति ॥ १०१ ॥ सप्तम्या इति निवृत्तम् । यथासम्भवं विभक्तिः । सामान्यस्य भिद्यमानस्य भेदान्तरानुप्रवृत्तो भेदः प्रकारः । बहोस्तु परत्वाद्धा भवति ॥ १०२ ॥

## कथमित्थम् ॥ ७ ॥ २ ॥ १०३ ॥

निपात्यते कथञ्चेत्थ-मिदमो वैतदः किमः ।
प्रकारेऽर्थे कथं भुक्त-मित्थमित्यवदद्गुरुः ॥ १०३ ॥

## संख्याया धा ॥ ७ ॥ २ ॥ १०४ ॥

धा संख्यावाचिनो नाम्नः, प्रकारे वर्तमानतः ।
एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ॥ १०४ ॥

## विचाले च ॥ ७ ॥ २ ॥ १०५ ॥

विचाले गम्यमाने वा, धा संख्यावाचिनो भवेत् ।
एकधा क्रियते राशि-र्द्विधा वा क्रियते त्वया ॥ १०५ ॥

## वैकाद् ध्यमञ् ॥ ७ ॥ २ ॥ १०६ ॥

ध्यमञ् संख्यार्थतो वैकात्, प्रकारार्थविचालयोः ।
ऐकध्यमेकधा भुंक्ते, करोत्यैकध्यमेकधा ॥ १०६ ॥

## द्वित्रेर्धमञेधौ वा ॥ ७ ॥ २ ॥ १०७ ॥

द्वित्रिभ्यां धमञेधौ वा, प्रकारार्थविचालयोः ।
द्वैधं द्वेधा द्विधा त्रैधं, त्रेधा त्रिधा विभज्यते ॥ १०७ ॥

---

स्पष्टे ॥१०३॥१०४॥ विचलनं विचालः । द्रव्यस्य पूर्वसंख्यायाः प्रच्युतिः संख्यान्तरापत्तिः एकस्यानेकीभावः अनेकस्य चैकीभावः । 'यदि मे यतमानाय, वचनं न करिष्यसि । उन्मनशतधा मूर्धा, तवैषोऽद्य फलिष्यति ॥ १ ॥' चकार उत्तरत्र प्रकारे विचाले चेत्युभयोः समुच्चयार्थः ॥ १०५ ॥ वाग्रहणं धार्थम् ॥१०६॥ वचनभेदाद्यथासंख्यं नास्ति ॥ १०७ ॥

## तद्वति धण् ॥ ७ ॥ २ ॥ १०८ ॥

द्वित्रिभ्यां प्रत्ययो धण् स्या–दभिधेये च तद्वति ।
राजद्वैधान्यथो द्वैधी–भावोऽशुभोऽशुभं नृणाम् ॥ १०८ ॥

## वारे कृत्वस् ॥ ७ ॥ २ ॥ १०९ ॥

स्याद् वारेऽर्थे स्थितात् कृत्वस्, सङ्ख्यावाचकशब्दतः ।
पञ्चकृत्वोऽह्नि षट्कृत्वो, भुङ्क्ते ह्यविरतो नरः ॥१०९॥

## द्वित्रिचतुरः सुच् ॥ ७ ॥ २ ॥ ११० ॥

भवेद् द्वित्रिचतुर्भ्यः सुज् वारेऽर्थे वर्तमानतः ।
भुङ्क्ते द्विस्त्रिश्चतुः कश्चिद्, बुभुक्षार्दितमानसः ॥११०॥

## एकात् सकृच्चास्य ॥ ७ ॥ २ ॥ १११ ॥

एकतः सुज् भवेद्वारे, चास्यादेशः सकृद् भवेत् ।
तपस्व्यपि सकृद् भुङ्क्ते, पारणे तपसो हितम् ॥१११॥

## बहोर्धासन्ने ॥ ७ ॥ २ ॥ ११२ ॥

सङ्ख्यार्थाद् बहुतो वारे, धाऽऽसन्ने प्रत्ययो भवेत् ।
पिबति बहुधा भुङ्क्ते, बहुकृत्वः पुनरन्यथा ॥११२॥

---

स्पष्टम् ॥ १०८ ॥ संख्या इति वर्तते । वारो धात्वर्थस्यायौगपद्येन वृत्तिः, तत्कालो वा । भुज्यर्थो वारवानिति भुज्यर्थस्य इदं विशेषणम् । तद्वतीत्येव भोजनस्य पञ्च वाराः । संख्याया इत्येव, भूरयो वारा अस्य भोजनस्य ॥ १०९ ॥ कृत्वसोऽपवादः । चः 'सुचो वा' २–३–१०–इत्यत्र विशेषणार्थः ॥ ११० ॥ स्पष्टे ॥ १११ ॥ ११२ ॥

## दिक्शब्दाद् दिग्देशकालेषु प्रथमापञ्चमीसप्तम्याः ॥ ७ ॥ २ ॥ ११३ ॥

प्रथमापञ्चमीसप्त–म्यन्ताद् दिग्शब्दतो दिशि ।
देशे काले च धा स्वार्थे, प्राग्रमणीयमिष्यते ॥११३॥

## ऊर्ध्वाद्रिरिष्टातावुपश्चास्य ॥ ७ ॥ २ ॥ ११४ ॥

पूर्ववदूर्ध्वशब्दाद्रि–रिष्टातावस्य च ह्युपः ।
उपरि रमणीयश्चो–परिष्टाद्रामणीयकम् ॥११४॥

## पूर्वावराधरेभ्योऽसस्तातौ पुरवधश्चैषाम् ॥ ७ ॥ २ ॥ ११५ ॥

पूर्वावराधरेभ्योऽस–स्तातौ स्तः पूर्ववत्तथा ।
चैषां पुरवधादेशाः, पुरस्तादागतः पुरः ॥११५॥

## परावरात् स्तात् ॥ ७ ॥ २ ॥ ११६ ॥

स्वार्थे परावराभ्यां स्तात्–प्रत्ययः पूर्ववद् भवेत् ।
परस्ताद्रमणीयं वा, देशः कालो दिशा परा ॥११६ ॥

---

'लुबञ्चेः' ७-२-१२३–इति धाप्रत्ययस्य लुप् । लुपि 'ङ्यादेः' २-४-६४–इत्यादिना ङीलुक् । दिग्देशकालेष्विति बहुवचनं प्रथमादिभिर्यथा-संख्यनिवृत्त्यर्थम् ॥ ११३ ॥ स्पष्टम् ॥ ११४ ॥ एवम् अवः, अवस्तात् । अधः, अधस्तात् ॥ ११५ ॥ एवम् अवरस्तात् ॥ ११६ ॥

## दक्षिणोत्तराच्चातस् ॥ ७ ॥ २ ॥ ११७ ॥

दक्षिणोत्तरतश्चातस्, पूर्ववत् परतोऽवरात् ।
परतोऽवरतो दक्षि–णतश्चोत्तरतो वरम् ॥ ११७ ॥

## अधरापराच्चात् ॥ ७ ॥ २ ॥ ११८ ॥

अधरादपरात् पूर्व–वदात् स्याद् दक्षिणोत्तरात् ।
समागतोऽधरात् पश्चा–दुत्तरादथ दक्षिणात् ॥ ११८ ॥

## वा दक्षिणात् प्रथमासप्तम्या आः ॥ ७ ॥ २ ॥ ११९ ॥

सप्तमीप्रथमान्ताद्वा, दिग्देशार्थाच्च दक्षिणात् ।
आ भवेद् दक्षिणा रम्यं, ततो वसति दक्षिणा ॥ ११९ ॥

## आही दूरे ॥ ७ ॥ २ ॥ १२० ॥

आ–आही स्तोऽवधेर्दूरे, दक्षिणात् पूर्ववत्ततः ।
दक्षिणा दक्षिणाहि स्या–द्रमणीयमतो वसेत् ॥ १२० ॥

---

अकारस्तसोऽस्य भेदार्थः । तेनातः 'क्वेहामात्रतसस्त्यच्' ६–३–१६ इति त्यच् न भवति, परतो भवं पारतमित्यणेव ॥ ११७ ॥ 'पश्चोऽपरस्य' ७–२–१२४ इत्यादिना पश्चादेशः ॥ ११८ ॥ पक्षे अतसातौ । पञ्चम्यां सावकाशावतसातावाकारो बाधेतेति वाग्रहणम् ॥११९॥ आकारस्तु पूर्वेण भवत्येव, यद्येवमत्र तद्ग्रहणं किमर्थम् ? विशेषविहितेनाहिना बाधो मा भूदित्येवमर्थम्, उत्तरार्थं च ॥ १२० ॥

## वोत्तरात् ॥ ७ ॥ २ ॥ १२१ ॥

सप्तमीप्रथमान्ताद्वा, आ-आही उत्तरात्ततः ।
उत्तरा रमणीयश्चो-त्तराहि रामणीयकम् ॥ १२१ ॥

## अदूरे एनः ॥ ७ ॥ २ ॥ १२२ ॥

सप्तमीप्रथमान्ताद् दिक्-शब्दाददूरतोऽवधेः ।
एनो दिग्देशकालार्थात्, पूर्वेणास्य परं वरम् ॥ १२२ ॥

## लुबञ्चेः ॥ ७ ॥ २ ॥ १२३ ॥

प्रथमाद्यन्ततोऽञ्चयन्ता-द्दिगादिकस्थितेर्दिशः ।
धेनयोर्लुप् समायातः, प्राग् प्राग् वसन्त्यवागुदक् ॥१२३॥

## पश्चोऽपरस्य दिक्पूर्वस्य चाति ॥ ७ ॥ २ ॥ १२४ ॥

अपरस्याति पश्चः स्याद्, दिक् पूर्वस्याप्यथो भवेत् ।
रम्यं दक्षिणपश्चादा-गतः पश्चादनाकुलः ॥ १२४ ॥

## वोत्तरपदेऽर्धे ॥ ७ ॥ २ ॥ १२५ ॥

पश्चः केवलदिक्पूर्वस्यार्धोत्तरेऽपरस्य वा ।
पश्चार्धमपरार्धश्च, ग्रन्थस्य सरसं क्वचित् ॥ १२५ ॥

---

योगविभागाद् दूर इति नानुवर्तते ॥ १२१ ॥ दिग्देशकालमात्रे वृत्त्यं ये सामान्यप्रत्यया उक्ता अदूरे अपि सामान्यविवक्षायां ते भवन्त्येव प्रकरणादेश्चादूरता गम्यत इति नार्थो वाग्रहणेन ॥ १२२ ॥ लुपि च सत्यां स्त्रीप्रत्ययस्यापि लुप् भवति ॥ १२३ ॥ स्पष्टम् ॥ १२४ ॥ उत्तरपदे इति किम्? अपरा अर्धे शोभते । असमासोऽयम् । पूर्वपदमुत्तरपदमिति हि समासे भवति ॥ १२५ ॥

## कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्त्वे च्विः ॥ ७ ॥ २ ॥ १२६ ॥

करोति कर्मणो भ्वस्ति—कर्तुश्चाभूततद्भवे ।
कृभ्वस्तिभ्यां च योगे च्विः, पटं शुक्लीकरोति सः ॥ १२६ ॥

## अरुर्मनश्चक्षुश्चेतोरहोरजसां लुक् च्वौ ॥ ७ ॥ २ ॥ १२७ ॥

षण्णामरुर्मुखानां लु—गन्तस्य च्वौ परे भवेत् ।
चेतीभवन्ति मूर्खाणां, मनांसि गुरुसन्निधौ ॥ १२७ ॥

## इसुसोर्बहुलम् ॥ ७ ॥ २ ॥ १२८ ॥

लुगन्तस्येसुसन्तस्य, बहुलं च्वौ परे भवेत् ।
नित्यशो नवनीतं वै, सर्पीकरोति धेनुमान् ॥ १२८ ॥

## व्यञ्जनस्यान्त ईः ॥ ७ ॥ २ ॥ १२९ ॥

बहुलं व्यञ्जनान्तस्ये—कारोऽन्तश्च्वौ परे भवेत् ।
यत् समिधीभवत्काष्ठं, तद् दृषदीभवच्छिला ॥ १२९ ॥

---

सूत्रस्याप्य विशदोऽर्थो बृहद्वृत्तेरवसेयः ॥ १२६ ॥ बहुवचनं तदन्तानामपि परिग्रहार्थम् । अन्यथा ग्रहणवता न तदन्तविधिरित्युपतिष्ठेत ॥ १२७ ॥ बहुलग्रहणं प्रयोगानुसरणार्थम् ॥ १२८ ॥ स्पष्टम् ॥ १२९ ॥

## व्याप्तौ स्सात् ॥ ७ ॥ २ ॥ १३० ॥

पूर्ववत्प्रत्ययः सादिः, साद्व्याप्तिर्गम्यते यदि ।
ज्ञानाग्निः सर्वकर्माणि, भस्मासात् कुरुतेऽर्जुन ॥ १३० ॥

## जातेः सम्पदा च ॥ ७ ॥ २ ॥ १३१ ॥

जातेः कृभ्वस्तिभिः सम्प–दायोगे स्सात् च पूर्ववत् ।
देवोऽग्निसात् करोत्यस्यां, सेनायां सर्वमस्त्रकम् ॥ १३१ ॥

## तत्राधीने ॥ ७ ॥ २ ॥ १३२ ॥

सप्तम्यन्तादधीनेऽर्थे, कृभ्वस्तिभिश्च सम्पदा ।
सादिः सात् प्रत्ययो राज–सात्करोति निजं धनम् ॥ १३२ ॥

## देये त्रा च ॥ ७ ॥ २ ॥ १३३ ॥

तत्र कृभ्वस्तिसम्पद्भि–र्देयेऽधीने च त्रा भवेत् ।
द्रव्यं करोति देवत्रा, देवेऽधीनं करोति तत् ॥ १३३ ॥

---

द्विसकारपाठः षत्वनिषेधार्थः । व्याप्तिः सर्वात्मना द्रव्येणाभिसम्बन्धः । व्याप्ताविति किम् ? अग्नीकरोति काष्ठम् । व्याप्तिस्तु प्रकरणादेर्गम्यते ॥१३०॥ यथैव ह्येकस्य द्रव्यस्य सर्वावयवाभिसम्बन्धे व्याप्तिर्भवति तथा जातेः सामान्यस्य सर्वव्यक्तिसम्बन्धे भवति । एवञ्च व्याप्ताविति सामान्योपादानात् कृभ्वस्तियोगे पूर्वेणैव स्सात् सिद्धः—संपदर्थं तु वचनम् । चकार उत्तरत्रोभयोः समुच्चयार्थः ॥ १३१ ॥ स्पष्टम् ॥ १३२ ॥ चकारो न स्सातोऽनुकर्षणार्थः तस्याधीनतामात्रविवक्षायां पूर्वेणैव सिद्धत्वात् । किन्तु कृभ्वस्तिभ्यां सम्पदा चेत्यस्यानुकर्षणार्थः । तेनोत्तरत्र नानुवर्तते ॥ १३३ ॥

## सप्तमीद्वितीयाद् देवादिभ्यः॥ ७ ॥ २ ॥ १३४ ॥

त्रा सप्तमीद्वितीयान्तात्, स्वार्थे देवादितो नवा ।
देवान् करोति देवत्रा, देवेष्वपि तथा भवेत ॥ १३४ ॥

## तीयशम्बबीजात् कृगा कृषौ डाच् ॥ ७ ॥ २ ॥ १३५ ॥

तीयान्ताच्छम्बबीजाभ्यां, कृगा योगे च डाच् कृषौ ।
द्वितीया कुरुते क्षेत्रं, तृतीया कुरुते तथा ॥ १३५ ॥

## संख्यादेर्गुणात् ॥ ७ ॥ २ ॥ १३६ ॥

संख्यादिगुणशब्दान्तात्, कृगा योगे च डाच् कृषौ ।
द्विगुणा कुरुते क्षेत्रं, त्रिगुणा कुरुते पुनः ॥ १३६ ॥

## समयाद्यापनायाम् ॥ ७ ॥ २ ॥ १३७ ॥

यापनायां कृगा योगे, स्याद् डाच् समयशब्दतः ।
स समयाकरोत्यद्य, श्वो त्वा दास्यामि ते पटम् ॥ १३७ ॥

---

देवादयः शिष्टप्रयोगगम्याः ॥ १३४ ॥ एवं शम्बाकरोति, बीजाकरोति । चो 'डाच्यादौ' ७-२-१४९-इत्यत्र विशेषणार्थः ॥ १३५ ॥ कृषावित्येव द्विगुणां रज्जुं करोति ॥ १३६ ॥ यापनायामिति किम् ? समयंकरोति ॥ १३७ ॥

## सपत्रनिष्पत्रादतिव्यथने ॥ ७ ॥ २ ॥ १३८ ॥

डाच् स्यात् सपत्रनिष्पत्र-शब्दाभ्यामतिपीडने ।
सपत्रा कुरुते व्याधो, निष्पत्रा कुरुते मृगम् ॥ १३८ ॥

## निष्कुलान्निष्कोषणे ॥ ७ ॥ २ ॥ १३७ ॥

निष्कोषणे कृगा योगे, डाच् स्यान्निष्कुलशब्दतः ।
निष्कुष्णार्तातिवान्ये नि-ष्कुला करोति दाडिमम् ॥ १३९ ॥

## प्रियसुखादानुकूल्ये ॥ ७ ॥ २ ॥ १४० ॥

आनुकुल्ये कृगा योगे, डाच्प्रत्ययः प्रियात् सुखात् ।
प्रियाकरोति यः शिष्यः, सुखाकरोत्यसौ गुरुम् ॥१४०॥

## दुःखात् प्रातिकूल्ये ॥ ७ ॥ २ ॥ १४१ ॥

प्रातिकूल्ये कृगा योगे, डाज् भवेद् दुःखशब्दतः ।
दुःखाकरोति योऽरातिं, स शौर्येण विराजते ॥ १४१ ॥

---

अतिव्यथन इति किम् ? सपत्रं करोति वृक्षं जलसेकः । निष्पत्रं करोति वृक्षतलं भूमिशोधकः ॥ १३८ ॥ निष्क्रुष्टं कुलमवयवसंघातोऽस्मादिति निष्कुलम् । अन्तरवयवानां बहिर्निष्कासनं निष्कोषणम् । निष्कोषण इति किम् ? निष्कुलं करोति शत्रुम् ॥ १३९ ॥ गुरोरानुकूल्यं करोति समाराधयतीत्यर्थः । आनुकूल्य इति किम् ? प्रियंकरोति मामवचनम् ॥ १४० ॥ प्रातिकूल्य इति किम् ? दुःखं करोति रोगः ॥ १४१ ॥

## शूलात् पाके ॥ ७ ॥ २ ॥ १४२ ॥

पाके गम्ये कृगा योगे, डाज् भवेत् शूलशब्दतः ।
कदन्नं कुरुते शूलं, मासं शूलाकरोति ही ॥ १४२ ॥

## सत्यादशपथे ॥ ७ ॥ २ ॥ १४३ ॥

अशपथे कृगा योगे, डाज् भवेत् सत्यशब्दतः ।
सत्याकरोति भाण्डं ना, पापः सत्यं करोति किम् ॥ १४३ ॥

## मद्रभद्राद्वपने ॥ ७ ॥ २ ॥ १४४ ॥

डाज् भवेद् मद्रभद्राभ्यां, मुण्डनेऽर्थे कृगा सह ।
भद्राकरोति पर्वाप्य, मद्राकरोति नापितः ॥ १४४ ॥

## करणादनेकस्वरात् कृभ्वस्तिनानितौ द्विश्च ॥ ७ ॥ २ ॥ १४५ ॥

अनेकस्वरतोऽव्यक्ता–नुकरणादितौ न चेत् ।
कृभ्वस्तिभिर्नवा डाज् स्याद्, द्विश्च पटपटाभवेत् ॥१४५॥

---

पाक इति किम्? शूलं करोति कदन्नम् ॥ १४२ ॥ कार्षापणादिदानेन मयावश्यमेवैतत् क्रेतव्यमिति विक्रेतारं प्रत्याययति–सत्याकरोति, नतु शपथं करोति ॥ १४३ ॥ मद्रभद्रशब्दौ मङ्गल्यवचनौ । वपन इति किम्? मद्रं करोति ॥ १४४ ॥ यस्मिन् ध्वनावकारादयो वर्णा विशेषरूपेण नाभिव्यज्यन्ते सोऽव्यक्तः तस्यानुकरणमव्यक्तानुकरणम् । अव्यक्तवर्णस्यापि कथञ्चिद् ध्वनिमात्रसादृश्यात् व्यक्तवर्णमनुकरणं भवति ॥ १४५ ॥

## इतावतो लुक् ॥ ७ ॥ २ ॥ १४६ ॥

लुगनेकस्वरस्याव्य-क्तानुकृतेरितावतः ।

**पटिति झटिति ज्ञेयं, पटत् इति झटत् इति ॥ १४६ ॥**

## न द्वित्वे ॥ ७ ॥ २ ॥ १४७ ॥

द्वित्वेऽनेकस्वरस्याव्य-क्तानुकृतेरतो न लुग् ।

**इतौ पटत पटदिति, झटत् झटदिति श्रुतम् ॥ १४७ ॥**

## तो वा ॥ ७ ॥ २ ॥ १४८ ॥

द्वित्वेऽनेकस्वरस्याव्य-क्तानुकृतेरितावतः ।

**तो लुग वा पटत्पटेति, पटत् पटदितीति वा ॥ १४८ ॥**

## डाच्यादौ ॥ ७ ॥ २ ॥ १४९ ॥

द्वित्वेऽनेकस्वरस्याव्य-क्तानुकृतेरदन्ततः ।

**डाच्यादौ लुगतस्तस्य, पटपटाकरोति किम्? ॥ १४९ ॥**

असिद्धं बहिरङ्गमन्तरङ्ग इति लुकि सति तृतीयत्वं न भवति ॥१४६॥ कथं नटच्चटिति, भगद्‌घगिति, नात्र द्वित्वमपि तु समुदायानुकरणमिति भवति ॥ १४७ ॥ स्पष्टम् ॥ १४८ ॥ आदाविति किम्? पतपता करोति । डाच्यन्त्यस्वरादिलोपे मूलप्रकृतेस्तकारस्य लुग् न भवति ॥ १४९ ॥

## बह्वल्पार्थात् कारकादिष्टानिष्टे प्शस्
॥ ७ ॥ २ ॥ १५० ॥

बह्वल्पार्थान्नवा नाम्नः, प्शस् कारकाभिधायिनः ।
इष्टे च विषयेऽनिष्टे, ददाति बहुशोऽल्पशः ॥ १५० ॥

## संख्यैकार्थाद्वीप्सायां शस् ॥ ७ ॥ २ ॥ १५१ ॥

सङ्ख्यैकार्थाद्भवेन्नाम्नः, शस् कारकाभिधायिनः ।
वीप्सायामेकशो दत्ते, ददाति वा द्विशस्त्रिशः ॥१५१॥

## संख्यादेः पादादिभ्यो दानदण्डे चाकल् लुक् च
॥ ७ ॥ २ ॥ १५२ ॥

सङ्ख्यादिपरपादादे–र्वीप्सायां दानदण्डयोः ।
स्यादकल् लुक् तथान्तस्य, द्विपदिकां ददाति तत ॥१५२॥

---

इष्टं प्राशित्रादि । अनिष्टं श्राद्धादि । बह्वल्पार्थादिति किम् ? गां ददाति । कारकादिति किम् ? बहूनां स्वामी । इष्टानिष्ट इति किम् ? बहु ददाति श्राद्धे, अल्पं ददाति प्राशित्रादौ । पकारः पित्कार्यार्थः ॥ १५० ॥ वीप्सायां द्विर्वचनस्य प्राप्तौ तदपवादोऽयम् । वाधिकारात् पक्षे द्विर्वचनमपि भवति ॥ १५१ ॥ संख्यायाः प्रकृत्याद्यवयवात् परे ये पादादयस्तदन्तान्नाम्नो दानदण्डे चकाराद्वीप्सायां च विषयेऽकल् प्रत्ययो भवति, तत्संनियोगे च प्रकृतेरन्तस्य लुग् भवतीति सूत्रस्य विशदोऽर्थः । संख्यादेरिति किम् ? पादं ददाति । पादादिभ्य इति किम् ? द्वौ द्वौ माषौ ददाति । दानदण्डे चेति किम् ? द्वौ पादौ भुङ्क्ते । चकारो वीप्साया अनुकर्षणार्थः । लकारः स्त्रीत्वार्थः । लुग्वचनम् अनिमित्तलुगर्थम् . तेन पादः पद्भावो भवति । परनिमित्तायां तु लुचि स्थानिवद्भावो न स्यात् ॥ १५२ ॥

**तीयाट्टीकण् न विद्या चेत् ॥ ७ ॥ २ ॥ १५३ ॥**

टीकण् स्वार्थे न चेद् विद्या, वा तीयप्रत्ययान्ततः ।
द्वैतीयीकं द्वितीयं स्यात्, तार्तीयीकं तृतीयतः ॥१५३॥

**निष्फले तिलात् पिञ्जपेजौ ॥ ७ ॥ २ ॥ १५४ ॥**

पिञ्जपेजौ तिलात् स्यातां, निष्फले वर्तमानतः ।
विज्ञेयस्तिलपिञ्जश्च, तिलपेजस्तिलोऽफलः ॥ १५४ ॥

**प्रायोऽतोर्द्वयसट्मात्रट् ॥ ७ ॥ २ ॥ १५५ ॥**

स्तो मात्रट् द्वयसट् प्रायः, स्वार्थेऽतुप्रत्ययान्ततः ।
स्याद् यावद्द्वयसं याव-न्मात्रं च यावदेव यत् ॥१५५॥

**वर्णाव्ययात् स्वरूपे कारः ॥ ७ ॥ २ ॥ १५६ ॥**

कारः स्वार्थे स्वरूपे स्या-द्वर्णतोऽव्ययतोऽपि च ।
ओँकाराय नमस्कारो-ऽस्त्वकारो ज्ञायते यतः ॥१५६॥

**रादेफः ॥ ७ ॥ २ ॥ १५७ ॥**

रशब्दतः स्वरूपेऽर्थे, भवेदेफो विभाषया ।
मन्त्रात्मकं भवेदर्हँ ऊर्ध्वाधोरेफयोगतः ॥१५७॥

---

न विद्या चेति किम्? द्वितीया विद्या ॥ १५३ ॥ स्पष्टम् ॥ १५४ ॥ प्रायोग्रहणं प्रयोगानुसरणार्थम् ॥ १५५ ॥ ककार इत्यादिष्वकार उच्चारणार्थः । ननु यथा हुंकृतिरित्यादि भवति तथा कारशब्देन घञन्तेन समासे ओँकारादयो भविष्यन्ति । सत्यम् । किन्तु ओँकारमुच्चारयतीत्यादि न सिध्यति । प्रायोऽनुवृत्तेरन्यत्रापि भवति । मन एव मनस्कारः । अहमेवाहंकारः ॥ १५६ ॥ प्रायोवचनाद्रकार इत्यपि ॥ १५७ ॥

## नामरूपभागाद् धेयः ॥ ७ ॥ २ ॥ १५८ ॥

नाम्नो रूपाच्च भागाच्च, स्वार्थे धेयो विभाषया ।
नामधेयं विधेयं चेद्, भागधेयं विधेहि सत् ॥१५८॥

## मर्तादिभ्यो यः ॥ ७ ॥ २ ॥ १५९ ॥

मर्त इत्येवमादिभ्यः, स्वार्थे यः प्रत्ययो नवा ।
मर्त एव भवेन्मर्त्यः, सूर्यः स्यात् सूर एव च ॥१५९॥

## नवादीनतनत्नं च नू चास्य ॥ ७ ॥ २ ॥ १६० ॥

ईनतनत्नयाः स्युर्वा, नवात् स्वार्थेऽस्य नूर्भवेत् ।
नवीनं नूतनं नूत्नं, नव्यं नवं नवाह्निकम् ॥१६०॥

## प्रात् पुराणे नश्च ॥ ७ ॥ २ ॥ १६१ ॥

स्वार्थे नेनतनत्नाः प्रात्, पुराणेऽर्थे भवन्ति तत् ।
पुराणं प्रतनं, प्रत्नं, प्रणं प्रीणं चिरस्थिरम् ॥१६१॥

## देवात्तल् ॥ ७ ॥ २ ॥ १६२ ॥

स्वार्थे तल्प्रत्ययो देवा–द्विकल्पेन विधीयते ।
जिनं नन्तुं समायान्ति, देवा देव्यश्च देवताः ॥ १६२ ॥

---

अन्येनान्योन्यस्मै यदाह त्वयेदं कर्तव्यमिति तत्संदिष्टं कर्म । स्पष्टम् ॥ १५८ ॥ मर्तादयः प्रयोगगम्याः ॥ १५९ ॥ स्पष्टे ॥ १६० ॥ १६१ ॥ लित्करणं ङ्यर्थम् ॥ १६२ ॥

## होत्राया ईयः ॥ ७ ॥ २ ॥ १६३ ॥

स्यादीयप्रत्ययो होत्रा-शब्दात् स्वार्थे विभाषया ।
होत्रैव ननु होत्रीयं, हव्यं भव्यं मनोरमम् ॥१६३॥

## भेषजादिभ्यष्ट्यण् ॥ ७ ॥ २ ॥ १६४ ॥

भवति भेषजादिभ्यः, स्वार्थतष्ट्यण् विभाषया ।
भैषज्यं पुनरानन्त्य-मैतिह्यं बुध्यतामतः ॥ १६४ ॥

## प्रज्ञादिभ्योऽण् ॥ ७ ॥ २ ॥ १६५ ॥

प्रज्ञ इत्येवमादिभ्यः, स्वार्थे स्यादण् विभाषया ।
प्रज्ञ एव भवेत् प्राज्ञः, प्राज्ञी प्राज्ञाऽन्यतः कनी ॥ १६५ ॥

## श्रोत्रौषधिकृष्णाच्छरीरभेषजमृगे ॥ ७ ॥ २ ॥ १६६ ॥

अण् श्रोत्रौषधिकृष्णेभ्यः, शरीरे भेषजे मृगे ।
यथासंख्यं नवा स्वार्थे, श्रौत्रं कार्ष्णस्तथौषधम् ॥ १६६ ॥

## कर्मणः संदिष्टे ॥ ७ ॥ २ ॥ १६७ ॥

अण् स्वार्थे कर्मणो ज्ञेयः सन्दिष्टे वर्तमानतः ।
स्याद्वशीकरणं कर्म, कार्मणं विनयः सताम् ॥ १६७ ॥

---

स्पष्टम् ॥ १६३ ॥ इतिहेति निपातसमुदाय उपदेशपारंपर्ये वर्तते । चातुर्वैद्यमित्यादिषु अनुशतिकादित्वादुभयपदवृद्धिः । भेषजादयः शिष्टप्रयोगगम्याः ॥ १६४ ॥ सप्तपञ्चाशत् प्रज्ञादयः । प्रज्ञादिराकृतिगणः ॥ १६५ ॥ श्रौत्रं शरीरम् । औषधं भेषजम् । कार्ष्णो मृगः ॥ १६६ ॥ वशीकरणमपि वृद्धपरंपरोपदेशात् क्रियत इति कार्मणमुच्यते । सत्यपि महावाक्याधिकारे विशिष्टोऽर्थः प्रत्ययमन्तरेण न प्रतीयत इत्यस्मिन् विषये नित्य एव प्रत्ययः ॥ १६७ ॥

## वाच इकण् ॥ ७ ॥ २ ॥ १६८ ॥

सन्दिष्टे वर्तमानाद्वाच्–शब्दात् स्वार्थे भवेदिकण् ।
वाचिकमात्मानीनं स–न्देशयन्ति मुनीश्वराः ॥ १६८ ॥

## विनयादिभ्यः ॥ ७ ॥ २ ॥ १६९ ॥

इकण् वा विनयादिभ्यः, स्वार्थे विधीयते ततः ।
वैनयिकं च सामायि–कं च सामयिकं भवेत् ॥ १६९ ॥

## उपायाद्ध्रस्वश्च ॥ ७ ॥ २ ॥ १७० ॥

इकणुपायशब्दाद्वा, स्वार्थे ह्रस्वस्तथा भवेत् ।
दर्शनज्ञानचारित्रं, मोक्षौपयिकमामतम् ॥ १७० ॥

## मृदस्तिकः ॥ ७ ॥ २ ॥ १७१ ॥

वा तिकः प्रत्ययः स्वार्थे, मृच्छब्दतो भवेत्ततः ।
सितेव मधुरा मिष्टा, मृत्तिकाऽऽसीत् कृते युगे ॥१७१॥

## सस्नौ प्रशस्ते ॥ ७ ॥ २ ॥ १७२ ॥

प्रशस्ते वर्तमानान्मृ–च्छब्दात् सस्नौ नवा ततः ।
प्रशस्ता मृद्भवेन्मृत्सा, मृत्स्नाऽर्हद्धर्मकर्मणि ॥१७२॥

॥ इति द्वितीयः पादः ॥

---

अत्रापि पूर्ववन्नित्यो विधिः ॥ १६८ ॥ विनयादयः सप्तदश ॥ १६९ ॥ स्पष्टे ॥ १७० ॥ १७१ ॥ रूपप्रत्ययापवादः ॥ १७२ ॥

इति द्वितीयः पादः ।

## अथ तृतीयः पादः

### प्रकृते मयट् ॥ ७ ॥ ३ ॥ १ ॥

प्रकृते वर्तमानात् स्या-न्नाम्नः स्वार्थे मयट् ततः ।
भवेद् घृतमयं भोज्य-मन्नं दधिमयं मधु ॥ १ ॥

### अस्मिन् ॥ ७ ॥ ३ ॥ २ ॥

सप्तम्यर्थे मयड् नाम्नः, प्रकृते वर्तमानतः ।
नृणामन्नमयं क्षीण-वित्तानां भोजनं भवेत् ॥ २ ॥

### तयोः समूहवच्च बहुषु ॥ ७ ॥ ३ ॥ ३ ॥

स्याद्बहुषु तयोर्नाम्नो, मयड् तथा समूहवत् ।
पर्वापूपमयं चापू-पिकं केभ्यो न रोचते ॥ ३ ॥

### निन्द्ये पाशप् ॥ ७ ॥ ३ ॥ ४ ॥

नाम्नः स्वार्थे भवेत् पाशप्, निन्द्येऽर्थे वर्तमानतः ।
वैयाकरणपाशोऽपि, नरो निन्दति वैदिकान् ॥ ४ ॥

---

टकारो ङ्यर्थः । प्रकृत इति किम्? अन्नम् घृतम् ॥ १ ॥ स्पष्टम् ॥ २ ॥ चान्नमयट् ॥ ३ ॥ पकारः पुंवद्भावार्थः । कुत्सिता कुमारी कुमारपाशा, किशोरपाशा । अथेह वयोवचनत्वात् पुंवद्भावः कस्मान्न भवति । कुमारादयो वयोवचना न कुमारपाशादयः । निन्दावचना हि ते इति न भवति ॥ ४ ॥

## प्रकृष्टे तमप् ॥ ७ ॥ ३ ॥ ५ ॥

नाम्नः प्रकर्षवत्यर्थे, वर्तमानात्तमप् भवेत् ।
दलं मृदुतमं दृष्टं सर्वदा जलजन्मनः ॥ ५ ॥

## द्वयोर्विभज्ये च तरप् ॥ ७ ॥ ३ ॥ ६ ॥

प्रकृष्टेऽर्थे भवेन्नाम्नो, विभक्तव्ये द्वयोस्तरप् ।
सुकुमारतरौ पाणी, पाणिपादस्य सर्वथा ॥ ६ ॥

## क्वचित् (स्वार्थे) ॥ ७ ॥ ३ ॥ ७ ॥

स्वार्थेऽपि स्यात्तरप् शिष्ट–प्रयोगस्यानुसारतः ।
अभिन्नतरकं चोच्चै–स्तरामुच्चैरभिन्नकम् ॥ ७ ॥

## किंत्याद्येऽव्ययादसत्त्वे तयोरन्तस्याम् ॥ ७ ॥ ३ ॥ ८ ॥

स्यात् किंत्याद्यव्ययादन्त–स्यामसत्त्वे तयोरततः ।
नितरां सुतरां प्राह्णे–तरामथ च किंतराम् ॥ ८ ॥

---

प्रकर्षोऽतिशयः । स च गुणक्रिययोरेव न जातिद्रव्ययोः । शुक्लकृष्णयोः कृष्णो भास्वरतर इत्यत्र भास्वरत्वमेकजातीयम् । अन्धानां काणतम इत्यत्र काणशब्दोऽन्धपर्यायः । पिरवाच्छुक्लतमा शाटी ॥ ५ ॥ तमपोऽपवादः, पकारः पुंवद्भावार्थः । शुक्लतरा शाटी ॥ ६ ॥ स्पष्टम् ॥ ७ ॥ अस्मादेव वचनात् त्याद्यन्तादपि द्व्यर्थप्रकर्षे तरप् बह्वर्थप्रकर्षे तमप् भवति । एग्रहणसामर्थ्यात् काले सत्त्वेऽप्याम् भवति नान्यस्मिन्नदन्ताभावात् । किंत्याद्यव्ययादिति किम्? शीघ्रतरं गच्छति । असत्त्व इति किम्? किंतरं दारु ॥ ८ ॥

## गुणाङ्गाद्वेष्ठेयसू ॥ ७ ॥ ३ ॥ ९ ॥

गुणाङ्गाद्वा तयोः स्यातां, क्रमत इष्ठ ईयसुः ।
पटुतमः पटिष्ठो ल-घीयान् लघुतरोऽवरः ॥ ९ ॥

## त्यादेश्च प्रशस्ते रूपप् ॥ ७ ॥ ३ ॥ १० ॥

त्यादेर्नाम्नश्च रूपप् स्यात्, प्रशस्ते वर्तमानतः ।
पचतिरूपमिष्टं वि-द्वद्रूपश्च प्रशस्यते ॥ १० ॥

## अतमबादेरीषदसमाप्ते कल्पप् देश्यप् देशीयर् ॥ ७ ॥ ३ ॥ ११ ॥

स्युरीषदसमाप्तेऽर्थे, तमबाद्यन्तवर्जितात् ।
त्रयस्त्याद्यन्ततो नाम्नः, पचतिकल्पमुच्यते ॥ ११ ॥

## नाम्नः प्राग् बहुर्वा ॥ ७ ॥ ३ ॥ १२ ॥

स्यादीषदसमाप्तेऽर्थे, नामतः प्राग् बहुर्नवा ।
आगच्छामि क्षणं तिष्ठ, बहुभुक्तं मयाऽधुना ॥ १२ ॥

---

गुणग्रहणं किम् ? गोतमः, गोतरः । अङ्गग्रहण किम् ? शुक्लतमम्, शुक्लतरम् रूपम् । उदित्त्वात् पटीयसी ॥ ९ ॥ त्याद्यन्तानां क्रियाप्रधानत्वात्तस्याश्च साध्यत्वेन लिङ्गसङ्ख्याभ्यामयोगात् रूपबन्तस्यौत्सर्गिकमेकवचन नपुंसकलिङ्गं च भवति । पकारः पुंवद्भावार्थः, शोभनरूपा ॥ १० ॥ एवं पचतिदेशीयम् । इदमेव त्यादिग्रहणं ज्ञापकं [illegible] नाम्न एव भवति । देशीयर् इतिरेफो 'रिति' ३-२-[illegible]८ इत्यत्र विशेषणार्थः । पचमदेशीया ॥ ११ ॥ नामग्रहणं स्याद्यन्तनिवृत्त्यर्थम् । स्याद्यन्तेषु सावकाशाः कल्पबादयो बहुना मा बाधिषतेति वावचनम्, तेन पक्षे तेऽपि भवन्ति ॥ १२ ॥

## न तमबादिः कपोऽच्छिन्नादिभ्यः ॥ ७ ॥ ३ ॥ १३ ॥

कपो न तमबादिः स्यात्, त्यक्त्वा छिन्नादिकाँस्ततः ।
पटुकः छिन्नकः छिन्न-कतमः पटुरूपकः ॥ १३ ॥

## अनत्यन्ते ॥ ७ ॥ ३ ॥ १४ ॥

अनत्यन्तकबन्तात्तु, तमबादिर्न जायते ।
छिन्नाद्यर्थो विधिस्तेना-नत्यन्तं छिन्नकं मतम् ॥ १४ ॥

## यावादिभ्यः कः ॥ ७ ॥ ३ ॥ १५ ॥

याव इत्येवमादिभ्यः, स्वार्थे कः प्रत्ययो भवेत् ।
गणोऽयमाकृतिर्ज्ञेयो, यावको मणिकोऽविकः ॥ १५ ॥

## कुमारीक्रीडनेयसोः ॥ ७ ॥ ३ ॥ १६ ॥

क्रीडनेभ्यः कुमारीणां, स्वार्थे स्यादीयसोश्च कः ।
कन्दुकः कन्दुरेवस्यात्, श्रेयान् श्रेयस्क इत्यथ ॥ १६ ॥

## लोहितान्मणौ ॥ ७ ॥ ३ ॥ १७ ॥

लोहितात् स्यान्मणौ स्वार्थे, कः प्रत्ययो विभाषया ।
लोहितकं मणिं प्राप्य, लोहितवान्नरो भवेत् ॥ १७ ॥

---

प्रकर्षादिमतः कुत्सितत्वादिविवक्षायां तमबाद्यन्तेभ्यः कप् भवत्येव । पकारः किम्? लोहितकतमो मणिः । छिन्नादयः प्रयोगगम्याः ॥ १३ ॥ यदातु प्रकर्षवतोऽनत्यन्तविशिष्टविवक्षा तदा तमबाद्यन्तात् 'क्तात्तमबादेश्चानत्यन्ते' ७-३-५६ इति कब् भवत्येव । छिन्नतमकम् ॥ १४ ॥ स्पष्टे ॥ १५ ॥ १६ ॥ लिङ्गविशिष्टस्यापि ग्रहणाल्लोहिन्येव लोहिनिका मणिः । मणाविति किम्? लोहितागौः ॥ १७ ॥

## रक्तानित्यवर्णयोः ॥ ७ ॥ ३ ॥ १८ ॥

रक्तेऽनित्ये च वर्णे स्याल्लोहितात् को विभाषया ।
पटो लोहितकश्चक्षुः, क्रुधा लोहितकं भवेत् ॥ १८ ॥

## कालात् ॥ ७ ॥ ३ ॥ १९ ॥

कालात् को वा भवेद्रक्ते-ऽनित्यवर्णे च संस्थितात् ।
वसनं कालकं रक्तं, वदनं कालकं खलम् ॥ १९ ॥

## शीतोष्णादृतौ ॥ ७ ॥ ३ ॥ २० ॥

शीतोष्णाभ्यामृतावर्थे, कः प्रत्ययो विभाषया ।
शिशिरः शीतकश्चैवं, स्याद् ग्रीष्म ऋतुरुष्णकः ॥ २० ॥

## लूनवियातात् पशौ ॥ ७ ॥ ३ ॥ २१ ॥

लूनवियातशब्दाभ्यां, पशौ स्वार्थे हि को नवा ।
वियातकः पशुर्ज्ञेयो, लूनकोऽपि पशुस्तथा ॥ २१ ॥

---

नित्योऽपि रक्तो वर्णोऽस्ति यथा कृमिरागादिरक्ते पट इति रक्तग्रहणम् । अनित्य ग्रहणं किम् ? लोहित इन्द्रगोपकः । वर्णग्रहणं द्रव्यनिवृत्त्यर्थम् । असति वर्णग्रहणे स्त्रीणामार्तवे द्रव्ये स्यात् । तद्धि सत्येवाश्रये स्त्रियां कदाचिन्न भवति लोहितशब्दवाच्यं च ॥ १८ ॥ स्पष्टम् ॥ १९ ॥ ऋताविति किम् ? शीतो वायुः, उष्णः स्पर्शः ॥ २० ॥ पशाविति किम् ? लूनो यवः, वियातो बटुः ॥ २१ ॥

**स्नानाद्वेदसमाप्तौ ॥ ७ ॥ ३ ॥ २२ ॥**

स्नातात् को गम्यमानायां, समाप्तौ वेदसंविदः ।
वेदं समाप्य यः स्नातः, स्नातकः स विराजते ॥ २२ ॥

**तनुपुत्राणुबृहतीशून्यात् सूत्रकृत्रिमनिपुणाच्छादनरिक्ते ॥ ७ ॥ ३ ॥ २३ ॥**

सूत्राद्यर्थे यथासङ्ख्यं, स्वार्थे तन्वादितोऽपि कः ।
तनुकं पुत्रकः शून्य–कश्च बृहतिकाणुकः ॥ २३ ॥

**भागेऽष्टमाञ्ञः ॥ ७ ॥ ३ ॥ २४ ॥**

अष्टमशब्दतः स्वार्थे, भागेंऽशे ञो नवा भवेत् ।
आष्टमश्चाष्टमो भागो, जिनश्चन्द्रप्रभोऽष्टमः ॥ २४ ॥

**षष्ठात् ॥ ७ ॥ ३ ॥ २५ ॥**

षष्ठशब्दाद्भवेत् स्वार्थे, भागेंऽशे ञो विभाषया ।
षाष्ठो भागो भवेत् षष्ठः, षष्ठः पद्मप्रभो जिनः ॥२५॥

---

वेदसमाप्ताविति किम्? तीर्थे स्नातः ॥ २२ ॥ तनोः सूत्रे, तनुसूत्रं तनुकं भङ्गादिमयं कल्पादि च। सूत्र इति किम्? तनुर्वंशः । पुत्रात् कृत्रिमे, कृत्रिमस्तक्षादिव्यापारनिष्पादितः । कृत्रिमः पुत्रः पुत्रकः । कृत्रिम इति किम्? औरसः पुत्रः । अणोर्निपुणे, निपुणो निष्णातोऽणुः अणुकः । निपुण इति किम्? अणुर्व्रीहिः। बृहत्या आच्छादने, बृहतिका आच्छादनविशेषः। प्रत्ययमन्तरेणार्थानवगमात् नित्य एवायं विधिः। आच्छादन इति किम्? बृहती छन्दः । बृहती ओषधिः । शून्याद्रिक्ते, रिक्तो धनप्रज्ञादिना, शून्य एव शून्यकः रिक्तश्चेत् । रिक्त इति किम्? शुने हितं शून्यम् ॥ २३ ॥ स्पष्टम् ॥ २४ ॥ योगविभाग उत्तरार्थः ॥ २५ ॥

## माने कश्च ॥ ७ ॥ ३ ॥ २६ ॥

षष्ठशब्दात् कञौ स्यातां, माने भागे विभाषया ।
भागश्चेन् मानरूपः स्यात्, षष्ठः षाष्ठश्च षष्ठकः ॥२६॥

## एकादाकिन् चासहाये ॥ ७ ॥ ३ ॥ २७ ॥

एकशब्दाद्भवेदाकिन्, कश्चासहायवाचिनः ।
दीक्षायां केवले मोक्षे, ह्येकाकी वीर एककः । ॥ २७ ॥

## प्राग् नित्यात् कप् ॥ ७ ॥ ३ ॥ २८ ॥

नित्यात् प्राक् कीर्तिता येऽर्था – स्तेषु द्योत्येषु कब् भवेत् ।
कुत्सितोऽल्पोऽथवाऽज्ञातो–ऽश्वोऽश्वकोऽपि स्वराद्वरः ॥२८॥

## त्यादिसर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक् ॥ ७ ॥ ३ ॥ २९ ॥

त्यादिसर्वादिशब्दानां, स्वरेष्वन्त्यात् स्वराद् भवेत् ।
अक्पूर्वं प्रत्ययस्तेन, पचन्तकि च सर्वके ॥ २९ ॥

---

मान इति किम् ? षष्ठ एव षाष्ठो भागोऽन्यः ॥ २६ ॥ असहाय इति किम् ? एक आचार्याः । एको द्वौ बहवः ॥ २७ ॥ पकारः पुंवद्भावार्थः, कुत्सिता दरद् दारदिका । प्राग् नित्यादित्यवध्यर्थम् । अन्यथापवादबाधितो नोत्तरत्रानुवर्तेत । परतोऽपिचानुवर्तते ॥ २८ ॥ परमसर्वके । तदन्तस्यापि सर्वादित्वमस्तीत्यत्राप्यक । स्वरेष्वन्त्यादिति किम् ? त्याद्यन्तात्सर्वादेश्च पूर्वं मा भूत् । पूर्वमिति किम् ? परो मा भूत् ॥ २९ ॥

## युष्मदस्मदोऽसोभादिस्यादेः ॥ ७ ॥ ३ ॥ ३० ॥

असाद्योदादिभादिस्या–द्यन्तयोर्युष्मदस्मदोः ।
स्वरेष्वन्त्याद्भवेदक् प्राक्, त्वयका मयका यथा ॥ ३० ॥

## अव्ययस्य को द् च ॥ ७ ॥ ३ ॥ ३१ ॥

येऽर्थाः प्राङ् नित्यतस्तेष्व–व्ययस्याक् पूर्ववद्भवेत् ।
कान्तस्य दान्तताऽपि स्याद्, हिरुक् हिरकुदुच्चकैः ॥ ३१ ॥

## तूष्णीकाम् ॥ ७ ॥ ३ ॥ ३२ ॥

तूष्णीमः कागमो मात् प्राक्, तूष्णीकां तन्निपात्यते ।
पूर्ववत् संसदि ज्ञाः किं, तूष्णीकां समुपासते ॥ ३२ ॥

## कुत्सिताल्पाज्ञाते ॥ ७ ॥ ३ ॥ ३३ ॥

कुत्सितेऽल्पेऽथवाज्ञाते, वर्तमानाद्यथाविधि ।
कबाद्याः प्रत्यया ज्ञेया, अश्वकोऽज्ञातकोऽल्पकः ॥ ३३ ॥

## अनुकम्पातद्युक्तनीत्योः ॥ ७ ॥ ३ ॥ ३४ ॥

कृपायां तद्विशिष्टायां, नीतौ च स्युः कबादयः ।
प्रत्ययास्ते यथायोगं, पुत्रको वत्सको यथा ॥ ३४ ॥

---

युष्मदस्मदोः स्वरेष्वन्त्यात् पूर्वस्यापवादः । युष्मदस्मद इति किम् ? तकया । असोभादिस्यादेरिति किम् ? युष्मकासु ॥ ३० ॥ कपोऽपवादः । चकारोऽन्वाचये तेन सर्वस्याव्ययस्याक् भवति । योगविभागस्त्यादेर्दादेशाभावार्थः ॥ ३१ ॥ अकोऽपवादः ॥ ३२ ॥ **कुत्सितं** निन्दितम् । **अल्पं** महत्प्रतियोगि । **अज्ञातं** प्रकृत्युपात्तधर्मव्यतिरेकेण केनचित् स्वस्वादिना धर्मेणानिश्चितम् ॥ ३३ ॥ अनुकम्पा कारुण्येन परस्यानुग्रहः । नीतिः सामादिप्रयोगः । तत्रानुकम्पायां सामोपप्रदाने एव न भेददण्डौ तयोः अनुकम्पाया अयोगात् ॥ ३४ ॥

## अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा ॥ ७ ॥ ३ ॥ ३५ ॥

बहुस्वरादजातेः स्यु-र्वेयेकेला नृनामतः ।
कृपायां देवियो देवि-को देविलोऽनुकम्पितः ॥ ३५ ॥

## वोपादेरडाकौ च ॥ ७ ॥ ३ ॥ ३६ ॥

स्युर्वोपादेरडाकौ चे-येकेलाः कब् नृनामतः ।
कृपायामुपडश्चो-कोपियावुपिकोपिलौ ॥ ३६ ॥

## ऋवर्णोवर्णात् स्वरादेर्लुक् प्रकृत्या च ॥ ७ ॥ ३ ॥ ३७ ॥

ऋवर्णान्तादुवर्णान्तात्, स्वरादिप्रत्ययस्य लुक् ।
स्यादादेरनुकम्पायां, प्रकृतिर्नो विकारभाक् ॥ ३७ ॥

## लुक्युत्तरपदस्य कपन् ॥ ७ ॥ ३ ॥ ३८ ॥

कप्नप्रत्ययः कृपायां स्या, लुक्युत्तरपदस्य नुः ।
दवको यज्ञको दत्ता, दत्तिका देवका तथा ॥ ३८ ॥

---

वावचनात् कबपि । अजातेरिति किम्? महिषकः इत्यादयो जातिशब्दा मनुष्यनामानि च । नृनाम्न इति किम्? गृसीमकः, सीमा स्फटा । बहुस्वरादिति किम्? रामकः ॥ ३५ ॥ स्पष्टम् ॥ ३६ ॥ अनुकम्पितो मातृदत्तः मातृयः । मातृकः । मातृलः । प्रकृतिवद्भावात् रेफावादेशौ न भवतः । ऋवर्णोवर्णादिति किम्? अनुकम्पितो देवदत्तो देवियः, देविकः, देविलः । स्वरादेरिति किम्? मद्रबाहुकः । आदेरिति किम्? सर्वस्य मा भूत् ॥ ३७ ॥ नुः-नृनाम्नः । पकारः पुंवद्भावार्थः । नकारः 'इच्चापुंसोऽनित्क्याप्परे' २-४-१०६-इत्यत्र पर्युदासार्थः ॥ ३८ ॥

## लुक् चाजिनान्तात् ॥ ७ ॥ ३ ॥ ३९ ॥

अजिनान्तान्नृनाम्नः स्यात्, कप्न् कृपायां तथाच लुक् ।
उत्तरपदकस्यानु–कम्पितौ व्याघ्रकोलकौ ॥ ३९ ॥

## षड्वर्जैकस्वरपूर्वपदस्य स्वरे ॥ ७ ॥ ३ ॥ ४० ॥

षड्वर्जैकस्वरं पूर्व–पदं तद्योगिनः स्वरे ।
लुगुत्तरपदस्य स्यात्, कृपायां प्रत्यये परे ॥ ४० ॥

## द्वितीयात् स्वरादूर्ध्वम् ॥ ७ ॥ ३ ॥ ४१ ॥

ऊर्ध्वं स्वराद् द्वितीयाल्लुक्, स्वरादौ प्रत्यये परे ।
कृपायां शब्दरूपस्य, देवियदविकोपडाः ॥ ४१ ॥

## सन्ध्यक्षरात्तेन ॥ ७ ॥ ३ ॥ ४२ ॥

सन्ध्यक्षराद् द्वितीयाल्लुक्, स्वरादूर्ध्वं स्वरादिके ।
प्रत्यये सह सन्ध्यक्ष–रेण स्यात् कुवियोऽमियः ॥ ४२ ॥

---

'आतो नेन्द्रवरुणस्य' ७–४–२९ इत्यत्र ज्ञापनादकृतसन्धेरेवोत्तरपदस्य लुक् ॥ ३९ ॥ अनुकम्पितो वागाशीः, वाग्दत्तः, वागाशीर्दत्तो वा वाचियः, वाचिकः, वाचिलः । स्वर इति किम्? वागाशीकः, वागाशीर्दत्तकः ॥ ४० ॥ ऊर्ध्वग्रहणं सर्वलोपार्थम् ॥ ४१ ॥ सन्ध्यक्षरादिति किम्? अनुकम्पितो गुरुदत्तः गुरुयः, गुरुकः, गुरुलः ॥ ४२ ॥

## शेवलाद्यादेस्तृतीयात् ॥ ७ ॥ ३ ॥ ४३ ॥

नृनाम्नः शेवलाद्यादेः, स्वरादौ प्रत्यये परे ।
स्वरादूर्ध्वं तृतीयाल्लुग्, भवेच्छेवलियो यथा ॥ ४३ ॥

## क्वचित्तुर्यात् ॥ ७ ॥ ३ ॥ ४४ ॥

स्वरादावनुकम्पायां, क्वचिल्लक्ष्यानुसारतः ।
स्वरादूर्ध्वं चतुर्थाल्लुक्, स्याद् बृहस्पतियो यथा ॥ ४४ ॥

## पूर्वपदस्य वा ॥ ७ ॥ ३ ॥ ४५ ॥

स्वरादावनुकम्पायां, लुक् स्यात् पूर्वपदस्य वा ।
वावचनाद्यथाप्राप्तं, दत्तियदत्तिलादयः ॥ ४५ ॥

## ह्रस्वे ॥ ७ ॥ ३ ॥ ४६ ॥

ह्रस्वेऽर्थे वर्तमानात् स्युः, शब्दरूपात् कबादयः ।
यथायोगं पटो ह्रस्वः, पटकः सर्वके यथा ॥ ४६ ॥

## कुटीशुण्डाद्रः ॥ ७ ॥ ३ ॥ ४७ ॥

अर्थे ह्रस्वे कुटी शुण्डा-इत्येताभ्यां भवेच्च रः ।
शुण्डारश्च कुटीरश्च, कुटीरः कैश्चिदुच्यते ॥ ४७ ॥

---

अत्रापि अकृतसन्धेरेव लोपः शेवलेन्द्रदत्तोऽनुकम्पितः शेवलिक इति यथा स्यात्, शेवलयिक इति मा भूत् । शेवल, सुपरि, विशाल, वरुण, अर्यमन्, इति शेवलादिः । केचित्तु विशाखिलः, कुमारिल इत्यत्रापीच्छन्ति ॥ ४३ ॥ स्पष्टे ॥ ४४ ॥ ॥ ४५ ॥ दीर्घप्रतियोगि ह्रस्वम् । ह्रस्वं पचति पचतकि, ह्रस्वकालयोगात् क्रिया ह्रस्वेत्युच्यते ॥ ४६ ॥ कस्रोऽपवादः ॥ ४७ ॥

## शम्या रुरौ ॥ ७ ॥ ३ ॥ ४८ ॥

शमीशब्दाद्रुरौ स्यातां, ह्रस्वेऽर्थे वर्तमानतः ।
ह्रस्वा शमी शमीरुः स्यात्, शमीरोऽपि च लक्ष्यते ॥४८॥

## कुत्वा डुपः ॥ ७ ॥ ३ ॥ ४९ ॥

स्वार्थे डुपः कुतूशब्दाद्, ह्रस्वे चर्ममयं कुतूः ।
तैलाद्यावपनं ह्रस्वा, कुतूः स्यात् कुतुपस्ततः ॥ ४९ ॥

## कासूगोणीभ्यां तरट् ॥ ७ ॥ ३ ॥ ५० ॥

अर्थे ह्रस्वे भवेत् कासू-गोणीभ्यां प्रत्ययस्तरट् ।
कासूः शक्तिस्तथा गोणी, धान्यावपनमुच्यते ॥ ५० ॥

## वत्सोक्षाश्वर्षभाद्ध्रासे पित् ॥ ७ ॥ ३ ॥ ५१ ॥

वत्सोक्षाश्वर्षभेभ्यः स्याद्, ह्रासेऽर्थे स्वार्थिकस्तरट् ।
स च पित् ह्रसितो वत्सो, वत्सतरोऽश्वतरस्तथा ॥५१॥

## वैकाद् द्वयोर्निर्धार्ये डतरः ॥ ७ ॥ ३ ॥ ५२ ॥

एकशब्दाद्द्वयोर्मध्ये, निर्धार्ये डतरो नवा ।
भवेदेकतरो दण्डी, कठो वा भवतोः पटुः ॥ ५२ ॥

---

स्पष्टे ॥ ४८ ॥ ४९ ॥ कासूतरी, गोणीतरी । पुंलिङ्गमपि दृश्यत इत्येके कासूतरः, गोणीतरः । शक्तिः शस्त्रम् । टकारो ङ्यर्थः ॥ ५० ॥ पित्करणं पुंवद्भावार्थम् ॥ ५१ ॥ द्वयोरिति किम् ? एकोऽस्मिन् ग्रामे प्रधानम् । निर्धार्य इति किम् ? एकोऽनयोर्ग्रामयोः स्वामी ॥ ५२ ॥

## यत्तत्किमन्यात् ॥ ७ ॥ ३ ॥ ५३ ॥

यत्तत्किमन्यशब्देभ्यो, निर्धार्ये डतरो द्वयोः ।
यतरो भवतोर्दण्डी, ततर आयातु साम्प्रतम् ॥ ५३ ॥

## बहूनां प्रश्ने डतमश्च वा ॥ ७ ॥ ३ ॥ ५४ ॥

यत्तत्किमन्यशब्देभ्यो, डतमः प्रत्ययो नवा ।
निधार्येऽर्थे बहूनां स्यात्, प्रश्ने च डतरस्तथा ॥ ५४ ॥

## वैकात् ॥ ७ ॥ ३ ॥ ५५ ॥

एकशब्दाद्बहूनां वा, निर्धार्ये डतमो भवेत् ।
एकतमः कठो गन्ता, भवतां कुशलो यतः ॥ ५५ ॥

## क्तात्तमबादेश्चानत्यन्ते ॥ ७ ॥ ३ ॥ ५६ ॥

क्तान्ताच्च केवलादर्थे-ऽनत्यन्ते तमबादितः ।
कप्प्रत्ययो भवेद्भिन्न-मनत्यन्तं च भिन्नकम् ॥ ५६ ॥

## न सामिवचने ॥ ७ ॥ ३ ॥ ५७ ॥

न सामिवचने कप् चा-नत्यन्ते तमबादितः ।
क्तान्ताच्च केवलाद्भिन्नं, साम्यनत्यन्तमर्धकम् ॥ ५७ ॥

---

स्पष्टम् ॥ ५३ ॥ प्रमाणान्तरात् प्रतिपत्तौ बहूनामप्रयोगेऽपि भवति । यथा बहुष्वासीनेषु कश्चित्कंचित्पृच्छति कतमो देवदत्तः, कतरो देवदत्तः ॥ ५४ ॥ पृथगयोगो डतरनिवृत्त्यर्थः । ५५ ॥ क्रियायाः स्वेनाश्रयेण साकल्येनानभिसम्बन्धोऽनत्यन्तता ॥ ५६ ॥ सामि अर्धः । वचनग्रहणं पर्यायार्थम् ॥ ५७ ॥

## नित्यं ञिनोऽण् ॥ ७ ॥ ३ ॥ ५८ ॥

आन्ताञ्ञिनन्ततश्चापि, नित्यमण् स्वार्थिको भवेत् ।
व्यावक्रोशी तथा व्याव–हासी सांराविणं यथा ॥५८॥

## विसारिणो मत्स्ये ॥ ७ ॥ ३ ॥ ५९ ॥

विसारिन्शब्दतो मत्स्ये–ऽर्थे स्वार्थेऽणप्रत्ययो भवेत् ।
मत्स्यो वैसारिणः प्रोक्तो, विसारी देवदत्तकः ॥ ५९ ॥

## पूगादमुख्यकाञ्ञ्यो द्रिः ॥ ७ ॥ ३ ॥ ६० ॥

ञ्यो भवेन्मुख्यतः स्वार्थे, नामतः पूगवाचिनः ।
द्रिसंज्ञः स च विज्ञेयो, लौहध्वज्योऽयमीक्ष्यताम् ॥ ६० ॥

## व्रातादस्त्रियाम् ॥ ७ ॥ ३ ॥ ६१ ॥

स्वार्थे ञ्यः प्रत्ययो व्रात–वाचिनो नामतोऽस्त्रियाम् ।
द्रिसंज्ञः स च कापोत–पाक्यो व्रैहिमता स्त्रियाम् ॥६१॥

---

नित्यग्रहणान्महाविभाषा निवृत्ता ॥ ५८ ॥ विसरतीति विसारी, ग्रहादित्वा-णिन् ॥ ५९ ॥ नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगाः । द्रित्वात् बहुवस्त्रियां लुप् । अमुख्यकादिति किम् ? देवदत्तो मुख्योऽस्य देवदत्तकः पूगः ॥ ६० ॥ नानाजातीया अनियतवृत्तयः शरीरायासजीविनः सङ्घा व्राताः । अस्त्रियामिति किम् ? कपोतपाकी स्त्री ॥ ६१ ॥

## शस्त्रजीविसङ्घाञ्ञ्यड् वा ॥ ७ ॥ ३ ॥ ६२ ॥

स्याच्छस्त्रजीविसङ्घस्य, वाचिनो ञ्यड् भवेन्नवा ।
स्वार्थे द्रिसंज्ञकः स स्यात्, कौन्त्यः कौन्त्यौ च कुन्तयः ॥६२॥

## वाहीकेष्वब्राह्मणराजन्येभ्यः ॥ ७ ॥ ३ ॥ ६३ ॥

वाहीकेषु भवेच्छस्त्र–जीविकसङ्घवाचिनः ।
स्वार्थे ब्राह्मणराजन्य–वर्जिताञ्ञ्यड् द्रिसंज्ञकः ॥ ६३ ॥

## वृकाट्टेण्यण् ॥ ७ ॥ ३ ॥ ६४ ॥

वृकशब्दाद्भवेच्छस्त्र–जीविकसङ्घवाचिनः ।
स्वार्थे टेण्यण् द्रिसंज्ञः स, वार्केण्योऽयं वृका इमे ॥६४॥

## यौधेयादेरञ् ॥ ७ ॥ ३ ॥ ६५ ॥

यौधेयादेर्भवेच्छस्त्र – जीविकसङ्घवाचिनः ।
अञ् स्वार्थे स भवेद् द्रिश्च, ज्यावनेयादयो यथा ॥६५॥

---

पक्षे कुन्तिः । शस्त्रजीविग्रहणं किम्? मल्लाः सङ्घः, मल्लः । सङ्घादिति किम्? सम्राट्, वागुरः, नैते श्रेणिबद्धा इति न सङ्घः । टकारो ङ्यर्थः ॥ ६२ ॥ कौण्डीविश्य इत्यादि ॥ ६३ ॥ शस्त्रजीविसङ्घादित्येव 'कामक्रोधौ मनुष्याणां खादितारौ वृकाविव ।' वाहीकत्वे नित्यमवाहीकत्वे तु विकल्पेन ञ्यटि प्राप्ते वचनम् । एवमुत्तरसूत्रत्रयमपि ॥ ६४ ॥

## पर्श्वादेरण् ॥ ७ ॥ ३ ॥ ६६ ॥

पर्श्वादिभ्यो भवेच्छस्त्र – जीविकसङ्घवाचिनः ।
अण् स्वार्थे स भवेद् द्रिश्च, पार्शवः पर्शवस्तथा ॥ ६६ ॥

## दामन्यादेरीयः ॥ ७ ॥ ३ ॥ ६७ ॥

दामन्यादेर्भवेच्छस्त्र – जीविकसङ्घवाचिनः ।
ईयः स्वार्थे द्रिसंज्ञः स, दामनीयादयो यथा ॥ ६७ ॥

## श्रुमच्छमीवच्छिखावच्छालावदूर्णावद्विदभृदभिजितो गोत्रेऽणो यञ् ॥ ७ ॥ ३ ॥ ६८ ॥

यञ् श्रुमदादिसप्तभ्यो, गोत्राणन्तेभ्य इष्यते ।
स्वार्थे द्रिः स च श्रौमत्यः, श्रौमत्यौ श्रौमता यथा ॥६८॥

## समासान्तः ॥ ७ ॥ ३ ॥ ६९ ॥

पादसमाप्तिपर्यन्त–मधिकारो विधीयते ।
समासान्त इति प्राज्ञै–स्तदवयवतेक्ष्यताम् ॥ ६९ ॥

---

ननु यौधेयादयः सङ्घवचनाः कथं गोत्रं भवन्ति ? उच्यते भर्गाद्यन्तर्गणो यौधेयादिस्तत्र येऽपत्यप्रत्ययान्तास्ते गोत्रं भवन्ति औपगवादिवत्, अपत्यं हि गोत्रम् ॥ ६५ ॥ पर्श्वादयस्त्रयोदश ॥ ६६ ॥ दामन्यादयोऽष्टाविंशतिः ॥ ६७ ॥ शस्त्रजीविसङ्घादिति निवृत्तम् । गोत्रग्रहणं किम् ? श्रुमत इदं श्रौमतम् । आभिजितो मुहूर्तः ॥ ६८ ॥ अतः परं ये प्रत्ययास्ते समासस्यान्ता अवयवा भवन्ति, तद्ग्रहणेन गृह्यन्ते इति स्पष्टोऽर्थः ॥ ६९ ॥

## न किमः क्षेपे ॥ ७ ॥ ३ ॥ ७० ॥

किं शब्दो यश्च निन्दायां, तदन्तान्नैव जायते ।
वक्ष्यमाणः समासान्तः, किंराजा यो न रक्षति ॥ ७० ॥

## नञ्तत्पुरुषात् ॥ ७ ॥ ३ ॥ ७१ ॥

वक्ष्यमाणः समासान्तो, न नञ्तत्पुरुषाद्भवेत् ।
योऽराजा तस्य पन्थाः स्या-दपन्था भुवि विद्रुतः ॥ ७१ ॥

## पूजास्वतेः प्राक् टात् ॥ ७ ॥ ३ ॥ ७२ ॥

पूजायां यौ स्वती ताभ्यां, परतो ये ऋगादयः ।
तदन्तान्नो समासान्तः, प्राक् टात् अतिसखा सुधूः ॥ ७२ ॥

## बहोर्डे ॥ ७ ॥ ३ ॥ ७३ ॥

डः कच्च नैव बहुन्ता-ड्डविषये भवेत्ततः ॥
आसन्नबहवो द्वित्राः, स्यात् प्रियबहुकस्तथा ॥ ७३ ॥

---

किम इति किम्? कुराजः। क्षेपे इति किम्? केषां राजा किंराजः ॥७०॥ तत्पुरुषादिति किम्? न विद्यते धूरस्य अधुरं शकटम् ॥ ७१ ॥ स्वतेरिति किम्? परमधुरा । प्राक् टादिति किम्? स्वङ्गुलं काष्ठम् ॥ ७२ ॥ द्वित्रा इति प्रत्युदाहरणं बहोरित्यस्य। प्रियबहुक इति ड इत्यस्य प्रत्युदारणम् ॥७३॥

## इच् युद्धे ॥ ७ ॥ ३ ॥ ७४ ॥

इच् युद्धे यः समासः स्यात्, समासान्तस्ततस्ततः ।
मुष्टामुष्टि तथा केशा–केशि कुर्वन्ति कानराः ॥ ७४ ॥

## द्विदण्ड्यादिः ॥ ७ ॥ ३ ॥ ७५ ॥

द्विदण्डिप्रमुखाः सिद्धाः, समासाः स्युरिजन्तकाः ।
द्विदण्डि प्रहरेत् क्रुद्धः, खञ्जश्चैकपदि व्रजेत् ॥ ७५ ॥

## ऋक्पूःपथ्यपोऽत् ॥ ७ ॥ ३ ॥ ७६ ॥

अकारः स्यात् समासान्त, ऋक्पूःपथ्यप्चतुष्कतः ।
अर्धर्चः श्रीपुरं द्वीपं, जलपथो यथायथम् ॥ ७६ ।

## धुरोऽनक्षस्य ॥ ७ ॥ ३ ॥ ७७ ॥

धुरन्तादत् समासान्तः, साऽक्षसम्बन्धिनी न चेत् ।
धर्मधुरा सदा धर्म–धुरन्धरैः समुह्यते ॥ ७७ ॥

---

चकारः 'इच्यस्वरे दीर्घ आच्च' ३–२–७२ इत्यत्र विशेषणार्थः ॥ ७४ ॥

तिष्ठद्ग्वादित्वादव्ययीभावः । अत्र या या विशेषता सा सा निपातनादवसेया । क्रियाविशेषणाच्चान्यत्र न भवति, द्वौ दण्डावस्यां शालायां द्विदण्डा ॥ ७५ ॥

पुरपथशब्दाभ्यां सिद्धे पुर् पथिन् इत्येतयोरुपादानमेतद्विषये प्रयोगनिवृत्त्यर्थम् ॥७६ ॥

अनक्षस्येति किम् ? अक्षधूः, दृढधूरक्षः ॥ ७७ ॥

## सङ्ख्यापाण्डूदक्कृष्णाद्भूमेः ॥ ७ ॥ ३ ॥७८॥

सङ्ख्यातो भूमिशब्दो यः, पाण्डूदक्कृष्णतस्तथा ।
तदन्तादत् समासान्तो, द्विभूमं भवनं यथा ॥ ७८ ॥

## उपसर्गादध्वनः ॥ ७ ॥ ३ ॥ ७९ ॥

अध्वनश्चोपसर्गादत्, समासान्तो विधीयते ।
प्राध्वं शकटमत्यध्वं, रथः प्राध्वश्च दृश्यते ॥ ७९ ॥

## समवान्धात्तमसः ॥ ७ ॥ ३ ॥ ८० ॥

समासान्तोऽत्तमःशब्दात्, समवान्धपराद्भवेत् ।
सन्तमसान्धतमसा-वतमसानि नारके ॥ ८० ॥

## तप्तान्ववाद्रहसः ॥ ७ ॥ ३ ॥ ८१ ॥

तप्तान्ववपरादत् स्यात्, समासान्तो रहःपरः ।
स्यादनुरहसं तप्त-रहसं रहसाश्रितम् ॥ ८१ ॥

---

सङ्ख्यादिभ्य इति किम्? सर्वभूमिः ॥ ७८ ॥ स्पष्टं सूत्रद्वयम् ॥ ७९ ॥ ८० ॥ रह इति अप्रकाश्यं विजनं वा एवमवरहसम् ॥ ८१ ॥

## प्रत्यन्ववात् सामलोम्नः ॥ ७ ॥ ३ ॥ ८२ ॥

प्रत्यन्ववपरौ यौ स्तः सामन्लोमन् स्वावथ ।
तदन्तादत् समासान्तः, प्रतिसामानुलोमवित् ॥ ८२ ॥

## ब्रह्महस्तिराजपल्याद्वर्चसः ॥ ७ ॥ ३ ॥ ८३ ॥

ब्रह्मन्नादिचतुर्भ्यो यो, वर्चस्शब्दस्तदन्ततः ।
समासादत् समासान्तो, ब्रह्मवर्चसमुत्तमम् ॥ ८३ ॥

## प्रतेरुरसः सप्तम्याः ॥ ७ ॥ ३ ॥ ८४ ॥

सप्तम्यन्त उरस्शब्दः, प्रतिशब्दात् परो यदि ।
तदन्तादत् समासान्तः, प्रत्युरमुरसःस्थितम् ॥ ८४ ॥

## अक्ष्णोऽप्राण्यङ्गे ॥ ७ ॥ ३ ॥ ८५ ॥

अप्राण्यङ्गेऽक्षिशब्दान्तात्, समासान्तोऽद्विधीयते ।
लवणाक्षं गवाक्षश्च, पुष्कराक्षमजाक्षि च ॥ ८५ ॥

---

अव्ययीभावे तु परत्वाद्विकल्पः । प्रत्यन्ववादिति किम् ? निःषाम वचनम् । निर्लोमा पुरुषः । सामलोम्न इति किम् ? प्रतिकर्म ॥ ८२ ॥ एवं हस्तिवर्चसम्, राजवर्चसम्, पल्यवर्चसम् । पल्यं कटकृतं पलालवर्तिकृतं वा धान्यभाजनम् । ब्रह्मादिभ्य इति किम् ? नृपाः सोमार्कवर्चसः ॥ ८३ ॥ सप्तम्या इति किम् ? प्रतीगतमुरः उरः प्रति वा प्रत्युरः ॥ ८४ ॥ अजाक्षि इति प्राण्यङ्गत्वान्नात् समासान्तः ॥ ८५ ॥

## संकटाभ्याम् ॥ ७ ॥ ३ ॥ ८६ ॥

संकटपूर्वकादत् स्यात्, समासान्तोऽक्षिशब्दतः ।
निःश्रेयसं समक्षं स्या-च्चेत् कटाक्षोऽर्हतां भवेत् ॥ ८६ ॥

## प्रतिपरोऽनोरव्ययीभावात् ॥ ७ ॥ ३ ॥ ८७ ॥

प्रतिपरोऽनुपूर्वादत्, समासान्तोऽक्षिशब्दतः ।
अव्ययीभावतोऽन्वक्षं, प्रत्यक्षं च परोक्षकम् ॥ ८७ ॥

## अनः ॥ ७ ॥ ३ ॥ ८८ ॥

अन्नन्तादत् समासान्तोऽव्ययीभावसमासतः ।
यस्याध्यात्ममभीष्टं तं, संसारो नैव बाधते ॥ ८८ ॥

## नपुंसकाद्वा ॥ ७ ॥ ३ ॥ ८९ ॥

नपुंसकं यदन्नन्तं, तदन्तादत् समासतः ।
समासान्तोऽव्ययीभावा-द्वोपचर्मोपचर्ममीः ॥ ८९ ॥

## गिरिनदीपौर्णमास्याग्रहायण्यपञ्चमवर्ग्याद्वा ॥ ७ ॥ ३ ॥ ९० ॥

स्यादपञ्चमवर्ग्यान्ताद्, गिर्याद्यन्तात् समासतः ।
समासान्तोऽव्ययीभावा-दद्वाऽन्तार्गिरमाश्रुतम् ॥ ९० ॥

---

प्राप्त्यर्थं वचनम् ॥ ८६ ॥ परसमानार्थः परस्शब्दोऽव्ययम् । अक्ष-शब्देन्द्रियपर्यायेण सिद्धे प्रत्यादिभ्यः परस्याव्ययीभावे प्रयोगो मा भूदिति वचनम् ॥८७॥ स्पष्टम् ॥८८॥ पूर्वेण नित्ये प्राप्ते विकल्पः ॥८९॥ पक्षे उपगिरि ॥९०॥

## सङ्ख्याया नदीगोदावरीभ्याम् ॥ ७ ॥ ३ ॥ ९१ ॥

नदीगोदावरी शब्दौ, सङ्ख्यापरौ तदन्ततः ।
समासान्तोऽव्ययीभावा-दद् द्विगोदावरं यथा ॥ ९१ ॥

## शरदादेः ॥ ७ ॥ ३ ॥ ९२ ॥

समासान्तोऽव्ययीभावा-च्छरदाद्यन्ततोऽद् भवेत् ।
स्यादुपशारदं हंसः, कलनादेन नादितः ॥ ९२ ॥

## जराया जरस् च ॥ ७ ॥ ३ ॥ ९३ ॥

जरान्तादव्ययीभावात्, समासान्तोऽत्तथा जरस् ।
आदेशः स्याज्जरायास्त-दुपजरसमिष्यते ॥ ९३ ॥

## सरजसोपशुनानुगवम् ॥ ७ ॥ ३ ॥ ९४ ॥

अदन्ता अव्ययीभावा, निपात्यन्ते ह्यमी त्रयः ।
सरजसं तथाचोप-शुनमनुगवं भवेत् ॥ ९४ ॥

---

सङ्ख्याया इति किम्? उपनदि। अव्ययीभावादित्येव एकनदी। इह नदीग्रहणं नित्यार्थम् ॥ ९१ ॥ शरदाद्या विंशतिः । अत्रापञ्चमवर्यन्तपाठो नित्यार्थः । अव्ययीभावादित्येव परमशरद् ॥९२॥ स्पष्टम् ॥९३॥ उपशुनमित्यत्र निपातनाद्ध्रस्योत्वम् । गामन्वायतमनुगवम् 'दैर्घ्येऽनुः' ३-१-३४ इत्यव्ययीभावः । दैर्घ्यादन्यत्र न भवति गवां पश्चादनुगु यानम् ॥ ९४ ॥

**जातमहद्वृद्धादुक्ष्णः कर्मधारयात् ॥७॥ ३ ॥९५॥**

स्यादज्ञातमहद्वृद्धा-दुक्ष्णश्च कर्मधारयात् ।
समासान्तो महोक्षो जा-तोक्षो वृद्धोक्ष इत्यपि ॥ ९५ ॥

**स्त्रियाः पुंसो द्वन्द्वाच्च ॥ ७ ॥ ३ ॥ ९६ ॥**

स्त्रियाः पुंसः समासान्तो-ऽद् द्वन्द्वाच्च कर्मधारयात् ।
स्त्रीपुंसोऽयं शिखण्डी स्यात्, स्त्रीपुंसौ स्त्रीपुमाँस्तथा ॥ ९६ ॥

**ऋक्सामर्ग्यजुषधेन्वनुडुहवाङ्मनसाहोरात्र-रात्रिंदिवनक्तंदिवाहर्दिवोर्वष्ठीवपदष्ठीवाक्षि-भ्रुवदारगवम् ॥ ७ ॥ ३ ॥ ९७ ॥**

स्युर्ऋक्सामादयोऽदन्ता, द्वन्द्वा द्वादश साधवः ।
वाङ्मानसे च ऋक्सामे, नक्तंदिवमहर्दिवम् ॥ ९७ ॥

---

जातादिभ्य इति किम् ? परमोक्षा । उक्ष्ण इति किम् ? महाश्मश्रु । कर्मधारयादिति किम् ? जातस्योक्षा जातोक्षा ॥ ९५ ॥ द्वन्द्वाच्चेति किम् ? स्त्रियाः पुमान् स्त्रीपुमान् ॥ ९६ ॥ धेनुश्च अनड्वाँश्च धेन्वनडुहौ. असमाहारार्थं धेन्वनडुहग्रहणम् । समाहारे तूत्तरेणैव सिद्धम् । रात्रिंदिवमित्यत्र निपातनात् पूर्वपदस्य मोऽन्तः । एवं नक्तंदिवमित्यत्रापि । अहश्च दिवाच अहर्दिवम् पर्याययोरपि वीप्सायां द्वन्द्वो निपातनात् । अहरहरित्यर्थः । रात्रिपर्यायोऽत्रान्यतर इत्येके । अहर्निशमित्यर्थः । ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम् । निपातनादन्त्यस्वरादिलोपः । पादौ चाष्ठीवन्तौ च पदष्ठीवम् । अत्र पद्भावश्च । अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् ॥ दाराश्च गावश्च दारगवम् । अत्र भ्रूशब्दस्य निपातनादुवादेशोऽक्षिदारशब्दयोश्च पूर्वनिपातः ॥ द्वन्द्वादित्येव । ऋक्साम यस्य ऋक्सामा मुग्धः ॥ ९७ ॥

## चवर्गदषहः समाहारे ॥ ७ ॥ ३ ॥ ९८ ॥

स्याद् द्वन्द्वादत् समाहारे, चवर्गदषहान्ततः ।
समासान्तो यक्रुन्मेदो, वाक्त्वचं श्रीस्रजं तथा ॥ ९८ ॥

## द्विगोरनह्नोऽट् ॥ ७ ॥ ३ ॥ ९९ ॥

अनह्नः स्यात् समाहारे, समासान्तोऽड् द्विगोस्ततः ।
दशाक्षी च दशाक्षं च, द्व्यहस्त्र्यहः समीक्ष्यताम् ॥९९॥

## द्वित्रेरायुषः ॥ ७ ॥ ३ ॥ १०० ॥

समाहारे समासान्तोऽट्, स्याद् द्वित्रेरायुषो द्विगोः ।
द्व्यायुषं त्र्यायुषं नैव, केनापि भुज्यते समम् ॥ १०० ॥

## वाञ्जलेरलुकः ॥ ७ ॥ ३ ॥ १०१ ॥

द्वित्रिभ्यामञ्जलेरड् वा, समासान्तो द्विगोः स चेत् ।
स्यात्तद्धितलुगन्तो न, द्व्यञ्जलि द्व्यञ्जलं यथा ॥ १०१ ॥

---

समासान्तत्वेन प्रत्ययस्य द्वन्द्वावयवत्वात् छत्रोपानहिनीति द्वन्द्वलक्षणो मत्वर्थीय इन् भवति । चवर्गदषह इत्यस्य प्रत्युदाहरणं यक्रुन्मेदः इति । समाहारे इति किम् ? प्रावृट्शरद्भ्याम् । द्वन्द्वादित्येव पञ्चवाचः समाहृताः पञ्चवाक् ॥ ९८ ॥ द्विगोरिति किम् ? समाहृतास्तक्षाणः संतक्षाणः । समाहारे इत्येव द्वाभ्यामुक्षभ्यां क्रीतः द्व्युक्षा ॥ ९९ ॥ द्वित्रेरिति किम् ? चतुरायुः । समाहारे इत्येव द्व्यायुःप्रियः ॥ १०० ॥ अलुक इति किम् ? द्वाभ्यामञ्जलिभ्यां क्रीतः द्व्यञ्जलिर्घटः । द्विगोरित्येव द्वयोरञ्जलिः द्व्यञ्जलिः । नित्योऽयं विधिरित्येके ॥ १०१ ॥

## खार्या वा ॥ ७ ॥ ३ ॥ १०२ ॥

अट् नवा स्यात् समासान्तः, खार्यन्तादलुको द्विगोः ।
द्विखारी च द्विखारं च पञ्चखारीधनो यथा ॥ १०२ ॥

## वार्धाच्च ॥ ७ ॥ ३ ॥ १०३ ॥

समासाद्वालुकोऽट् खार्याः, समासान्तोऽर्धतो परम् ।
अर्धखार्यर्धखारश्चा-ऽन्तो न स्यात् स्त्रियां विधेः ॥ १०३ ॥

## नावः ॥ ७ ॥ ३ ॥ १०४ ॥

अर्धात् पराद् द्विगोश्चाट् वै, समासान्तोऽलुको भवेत् ।
नौशब्दान्ताद् द्विनावं चा-र्धनावी चार्धनावकम् ॥१०४॥

## गोस्तत्पुरुषात् ॥ ७ ॥ ३ ॥ १०५ ॥

गोशब्दान्तात् समासान्तो-ऽलुकोऽट् तत्पुरुषाद्भवेत् ।
पुंगवः स्त्रीगवी राज-गवो राजगवी यथा ॥ १०५ ॥

---

पृथग्योगाद् द्वित्रेरिति निवृत्तम् ॥ १०२ ॥ चकारो द्विगोरनुकर्षणार्थः । तेनोत्तरत्र द्वयमप्यनुवर्तते ॥१०३॥ अलुक इत्येव द्वाभ्यां नौभ्यां क्रीतः द्विनौः । द्विगोरित्येव द्वयोर्नावोः द्विनौ । अर्धादित्येव राजनौः । टकारो ङ्यर्थः । तत्पुरुषादिति किम् ? चित्रगुः । अलुक इत्येव पञ्चभिर्गोभिः क्रीतः पञ्चगुः ॥ १०५ ॥

## राजन्सखेः ॥ ७ ॥ ३ ॥ १०६ ॥

तत्पुरुषात् समासान्तो, राजन्सख्यन्ततोऽट् भवेत् ।
देवराजो महाराजो, राजसखो महासखः ॥ १०६ ॥

## राष्ट्राख्याद्ब्रह्मणः ॥ ७ ॥ ३ ॥ १०७ ॥

तत्पुरुषात् समासान्तोऽट्, ब्रह्मणो राष्ट्रवाचिनः ।
परादवन्तिब्रह्मोऽयं, देवब्रह्मा च नारदः ॥ १०७ ॥

## कुमहद्भ्यां वा ॥ ७ ॥ ३ ॥ १०८ ॥

तत्पुरुषाद्भवेदट् वा, ब्रह्मणः कुमहत्परात् ।
महाब्रह्मा महाब्रह्मः, कुब्रह्मा कुब्रह्मो यथा ॥ १०८ ॥

## ग्रामकौटात्तक्ष्णः ॥ ७ ॥ ३ ॥ १०९ ॥

तत्पुरुषात् समासान्तोऽट्, तक्ष्णः स्याद्ग्रामकौटतः ।
परतो ग्रामतक्षोऽयं, कौटतक्षो न चाश्रितः ॥ १०९ ॥

---

अलुक इति निवृत्तं पृथग्योगात् । राजन्निति नान्तनिर्देशा दनकारान्तान्न भवति मद्राणां राज्ञी मद्रराज्ञी । सखी शब्दात्त्वट्टि सत्यसति वा न रूपभेदः ॥१०६॥ देवब्रह्मेति प्रत्युदाहरणम् । आख्याग्रहणं राष्ट्रवाच्यर्थम् ॥ १०७ ॥ स्पष्टम् ॥ १०८ ॥ ग्रामकौटादिति किम् ? राजतक्षा । तत्पुरुषादित्येव ग्रामश्च तक्षा च ग्रामतक्षाणौ ॥ १०९ ॥

## गोष्ठातेः शुनः ॥ ७ ॥ ३ ॥ ११० ॥

तत्पुरुषात् समासान्तोऽड्, गोष्ठातिभ्यां पराच्छुनः ।
गोष्ठश्वः श्वा भवेद्गोष्ठे, स्यादतिश्वश्च सेवकः ॥ ११० ॥

## प्राणिन उपमानात् ॥ ७ ॥ ३ ॥ १११ ॥

तत्पुरुषाच्छुनः स्यादट्, प्राणिन उपमानतः ।
व्याघ्रश्वश्च वृकश्वश्च, सिंहश्वो लक्ष्यते बुधैः ॥ १११ ॥

## अप्राणिनि ॥ ७ ॥ ३ ॥ ११२ ॥

अप्राणिन्युपमानादट्, शुनस्तत्पुरुषाद्भवेत् ।
शाकटश्वस्तथाकर्ष – श्वः फलकश्च इष्यते ॥ ११२ ॥

## पूर्वोत्तरमृगाच्च सक्थ्नः ॥ ७ ॥ ३ ॥ ११३ ॥

पूर्वोत्तरमृगाच्चोप–मानात् स्यात् सक्थिशब्दतः ।
तत्पुरुषात् समासान्तोऽट्, मृगसक्थं भवेद् दृढम् ॥११३॥

---

स्पष्टम् ॥ ११० ॥ 'उपमेयं–३–१–१०२' इति समासः । अत एव वचनात् श्वन्शब्दस्य परनिपातः । मयूरव्यंसकादित्वाद्वा समासः । प्राणिन उपमानादिति पूर्वपदविज्ञानादिह न भवति वानरः श्वेव वानरश्वा । प्राणिन इति किम्? फलकमिव श्वा फलकश्वा । उपमानग्रहणं किम्? देवदत्तश्वा ॥ १११ ॥ पूर्वसूत्रे उपमानादिति पूर्वपदस्य विशेषणम् इह तु शुनः । अप्राणिनीति किम्? वानरः श्वेव वानरश्वा । उपमानादित्येव आकर्षे श्वा आकर्षश्वा । कुक्कुरवच्छारेऽपि श्वन्शब्दो रूढो नोपमानम् ॥ ११२ ॥ स्पष्टम् ॥ ११३ ॥

## उरसोऽग्रे ॥ ७ ॥ ३ ॥ ११४ ॥

अग्रं मुखं प्रधानं वा, तत्रोरसो विधीयते ।
तत्पुरुषात् समासान्तोऽट्, दृश्यतेऽश्वोरसं रसम् ॥ ११४ ॥

## सरोऽनोऽश्मायसो जातिनाम्नोः ॥ ७ ॥ ३ ॥ ११५ ॥

सरोऽनोऽश्मायसो जातौ, नाम्नि तत्पुरुषाद्भवेत् ।
अट् समासान्तको जात-सरसं च महानसम् ॥ ११५ ॥

## अह्नः ॥ ७ ॥ ३ ॥ ११६ ॥

तत्पुरूषात् समासान्तो-ऽहन्शब्दान्ताद्भवेदथाट् ।
ॐ पुण्याहं च पुण्याह-मित्युद्‌घोषः सुमङ्गलः ॥ ११६ ॥

## सङ्ख्यातादह्नश्च वा ॥ ७ ॥ ३ ॥ ११७ ॥

सङ्ख्यातपरतोऽह्नश्चाट्, तत्पुरुषात्तथाच वा ।
अह्नादेशस्त्वहन्शब्दः, सङ्ख्याताह्नो विभाषया ॥ ११७ ॥

---

अग्र इति किम्? अश्वोरस्यावर्तः ॥ ११४ ॥ जातिनाम्नोरिति किम्? परमसरः, सदनः इत्यादि। कथं बिन्दुसरः, बकसरः इति, नैषा संज्ञा; रूढ्या ह्यत्र संज्ञाविज्ञानं शूर्पनखीवत् ॥ ११५ ॥ स्पष्टम् ॥ ११६ ॥ पक्षेसङ्ख्याताहः । अह्नादेशार्थं वचनम् । अट्तु पूर्वेणैव सिद्धः। चकार उत्तरत्राह्नादेशस्याट्संनियोगशिष्टत्वार्थः। अन्यथा ह्रयटोऽपवादोऽह्नादेशो विज्ञायेत, तथाच स्त्रियां ङीर्न स्यात् ॥ ११७ ॥

## सर्वांशसङ्ख्याऽव्ययात् ॥ ७ ॥ ३ ॥ ११८ ॥

अहन्नन्ताच्च सर्वांश-सङ्ख्याऽव्ययात् परादथाट् ।
तत्पुरुषात्तथाचाह्ना-देशः सर्वाह्ण उच्छ्रयेत् ॥ ११८ ॥

## संख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत् ॥ ७ ॥ ३ ॥ ११९ ॥

सङ्ख्यातादेश्च सर्वादे, रात्रि शब्दस्तदन्ततः
तत्पुरुषात् समासान्तोऽत्, वर्षारात्रः सजीवनः ॥ ११९ ॥

## पुरुषायुषद्विस्तावत्रिस्तावम् ॥ ७ ॥ ३ ॥ १२० ॥

एतेऽदन्ता निपात्यन्ते, त्रयस्तत्पुरुषास्ततः ।
द्विस्तावा वेदिका वाच्या त्रिस्तावा पुरुषायुषम्
॥ १२० ॥

## श्वसो वसीयसः ॥ ७ ॥ ३ ॥ १२१ ॥

श्वसः परो वसीयस् यः, शब्दो भवेत्तदन्ततः ।
तत्पुरुषात् समासान्तोऽत्, कल्याणं श्वोवसीयसम्
॥ १२१ ॥

---

एकग्रहणं सङ्ख्याग्रहणेनानेकस्याग्रहणार्थम् । तेन पूर्वसूत्रे सङ्ख्याशब्देनैकस्याग्रहणम् । एकमहः एकाहम् । अटि प्रकृतेऽत्विधानं स्त्रियां ङ्यभावार्थम् ॥ ११९ ॥ मानम् ॥ १२० ॥ वसुमच्छब्दादीयसौ मतोरन्त्यस्वरादेश्च लोपे वसीयः ॥ १२१ ॥

## निसश्च श्रेयसः ॥ ७ ॥ ३ ॥ १२२ ॥

निसः श्वसः पराच्छ्रेयोऽ–न्तादत् तत्पुरुषाद्भवेत् ।
निःश्रेयसं च निर्वाणं, श्वःश्रेयसं च शोभनम् ॥१२२॥

## नञव्ययात् संख्याया डः ॥ ७ ॥ ३ ॥ १२३ ॥

नञोऽव्ययाच्च सङ्ख्याया, डस्तत्पुरुषतो भवेत् ।
अदशा अनवा खड्गो, निस्त्रिंशो दुर्जनोऽथवा ॥१२३॥

## संख्याव्ययादङ्गुलेः ॥ ७ ॥ ३ ॥ १२४ ॥

सङ्ख्याऽव्ययात् पराड्डोऽन्तः, स्यात्तत्पुरुषतोऽङ्गुलेः ।
द्व्यङ्गुलं त्र्यङ्गुलं छिन्धि, रज्जुं यद्यधिकं तदा ॥१२४॥

## बहुव्रीहेः काष्ठे टः ॥ ७ ॥ ३ ॥ १२५ ॥

काष्ठे स्याट्टो बहुव्रीहेः, समासान्तोऽङ्गुलेस्ततः ।
द्व्यङ्गुलंत्र्यङ्गुलंपञ्चा–ङ्गुलं च चतुरङ्गुलम् ॥ १२५ ॥

---

स्पष्टम् ॥१२२॥ नञव्ययादिति किम् ? गोत्रिंशत् । नञ्ग्रहणं 'नञ्तत्पुरुषात्' ७–३–७१ इति प्रतिषेधे प्राप्ते प्रतिप्रसवार्थम् । सङ्ख्याया इति किम् ? निःशङ्कुत् । तत्पुरुषादित्येव न विद्यन्ते त्रयो यस्य सोऽत्रिः । डित्वमन्त्यस्वरादिलोपार्थम् ॥ १२३ ॥ कथमात्माङ्गुलं प्रमाणाङ्गुलम् उत्सेधाङ्गुलमिति । अङ्गुलशब्दः प्रमाणवाची प्रकृत्यन्तरम् । यथा 'स्वेनाङ्गुलप्रमाणेनाङ्गुलानांशतं पुमान्' । हस्तोऽङ्गुलविंशत्येति ॥१२४॥ अङ्गुलिसदृशावयवं धान्यकाष्टकादीनां विक्षेपणकाष्टमेवमुच्यते । अङ्गुलेरिति निर्देशादङ्गुलीशब्दान्नाप्न भवति । द्वावङ्गुलीसदृशाववयवौ यस्य तत् द्व्यङ्गुलीकत् दारु । 'न कचि' २–४–१०४ इति ह्रस्वाभावः ॥ १२५ ॥

## सक्थ्यक्ष्णः स्वाङ्गे ॥ ७ ॥ ३ ॥ १२६ ॥

समासान्तो बहुव्रीहे-ष्टः स्वाङ्गे सक्थितोऽक्षितः ।
दीर्घसक्थी विशालाक्षी, विशालाक्षमभीप्सति ॥१२६॥

## द्वित्रेर्मूर्ध्नो वा ॥ ७ ॥ ३ ॥ १२७ ॥

बहुव्रीहेः समासान्त-ष्टो वा मूर्ध्नो द्वितस्त्रितः ।
द्विमूर्धं च द्विमूर्धाणं, द्विमूर्धा किं हसेदहो ॥ १२७॥

## प्रमाणीसंख्याड्डुः ॥ ७ ॥ ३ ॥ १२८ ॥

प्रमाण्यन्ताच्चा संख्यान्ताड्डो बहुव्रीहितो भवेत् ।
पञ्चषा द्विदशा द्वित्राः, स्त्रीप्रमाणाः कुटुम्बिनः ॥१२८॥

## सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरश्रै-णीपदा-जपद-प्रोष्ठपद-भद्रपदम् ॥ ७ ॥ ३ ॥ १२९ ॥

स्युर्बहुव्रीहयो डान्ता एते नव निपातिताः ।
सुप्रातः सुदिवः सुश्वो, भव्यात्मन् भव सत्कृतेः ॥१२९॥

---

सक्थ्यक्ष्ण इति किम्? सुबाहुः । स्वाङ्ग इति किम्? दीर्घसक्थि शकटम् । बहुव्रीहेरित्येव परमसक्थि ॥ १२६ ॥ बहुव्रीहेरित्येव द्वयोर्मूर्धा द्विमूर्धा ॥१२७॥

प्रमाणशब्देन सिद्धे प्रमाणीशब्दान्तात्कजभावार्थं वचनम् । बहुव्रीहेरित्येव द्वादश ॥१२८॥ निपातनात्पद्भावो विषयव्यवस्था च भवति ॥१२९॥

## पूरणीभ्यस्तत्प्राधान्येऽप् ॥ ७ ॥ ३ ॥ १३० ॥

**पूरण्यन्ताद् बहुव्रीहेः, समासान्तोऽब् विधीयते ।**
**पूरण्याः खलु प्राधान्ये, कल्याणीपञ्चमा निशः ॥१३०॥**

## नञ्सुव्युपत्रिभ्यश्चतुरः ॥ ७ ॥ ३ ॥ १३१ ॥

**नञ्सुव्युपत्रिपूर्वादप्, चतुरो बहुव्रीहितः ।**
**दानशीलतपोभावाः, सुचतुरस्य शोभनाः ॥ १३१ ॥**

## अन्तर्बहिर्भ्यां लोम्नः ॥ ७ ॥ ३ ॥ १३२ ॥

**लोमन्शब्दाद्बहुव्रीहे-रन्तर्बहिःपरादथाप् ।**
**अन्तर्लोमो बहिर्लोमः, प्रावारः स्यादनेकधा । ॥ १३२ ॥**

## भान्नेतुः ॥ ७ ॥ ३ ॥ १३३ ॥

**नक्षत्रवाचिनो नेतु-रप् बहुव्रीहितो भवेत् ।**
**पठनीयं चिरं तात! मृगनेत्रासु रात्रिषु ॥ १३३ ॥**

---

पूरणीभ्य इति किम्? द्वितीया भार्या कल्याणी यासां भार्याणां ता द्वितीया-कल्याणीकाः। स्त्रीत्वनिर्देशः किम्? कल्याणपञ्चमकाः दिवसाः। तत्प्राधान्य इति किम्? कल्याणपञ्चमीकः पक्षः। पकारो 'नाप्प्रियादौ' ३-२-५३-इति पर्युदासार्थः ॥ १३० ॥ समासान्तविधेरनित्यत्वादिह न भवति। त्रयश्चत्वारो यस्य स त्रिचत्वा उन्मुग्धः ॥ १३१ ॥ स्पष्टम् ॥ १३२ ॥ भादिति किम्? देवदत्तनेतृकः। नेत्र शब्देनैव सिद्धे नेतृशब्दात् कच् मा भूदिति वचनम् ॥ १३३ ॥

## नाभेर्नाम्नि ॥ ७ ॥ ३ ॥ १३४ ॥

नाभ्यन्तादप् बहुव्रीहेः, समासान्तः स नाम चेत् ।
पद्मनाभं जिनं वन्दे, भाविनं भरतेऽग्रिमम् ॥ १३४ ॥

## नञ्बहोर्ऋचो माणवचरणे ॥ ७ ॥ ३ ॥ १३५ ॥

नञ्बहोरप् बहुव्रीहे-र्माणवे चरणे ऋचः ।
क्रमशश्चरणो ज्ञेयो, बह्वृचो माणवोऽनृचः ॥ १३५ ॥

## नञ्सुदुर्भ्यः सक्थिसक्थिहलेर्वा ॥ ७ ॥ ३ ॥ १३६ ॥

नञ्सुदुर्भ्योऽप् बहुव्रीहेः, सक्थिसक्थिहलेर्वा ।
असक्थिरथवाऽसक्थ-श्चाहलिरहलोऽथवा ॥ १३६ ॥

## प्रजाया अस् ॥ ७ ॥ ३ ॥ १३७ ॥

बहुव्रीहेः प्रजाशब्दा-न्नञादिभ्योऽस् भवेत् परः ।
अप्रजाः सुप्रजाः कश्चित्, कश्चिद्भवति दुष्प्रजाः ॥१३७॥

---

नाम्नीति किम् ? विकसितवारिजनाभिः । अम्भोनाभं प्रहृत्वानिति अव्ययीभावेऽपि तिष्ठद्ग्वादिषु तथापाठात् सिद्धम् ॥१३४॥ माणवचरण इति किम् ? बह्वृकं साम । 'ऋक्पूःपथ्यपोऽत्' ७-३-७६ इत्येव सिद्धे नियमार्थं वचनम् ॥१३५॥ नञ्सुदुर्भ्य इति किम् ? गौरसक्थी स्त्री । हलसक्थिशब्दाभ्यां सिद्धे कजभावार्थं वचनम्, तेन न विद्यते हलमस्य अहलक इत्यादि न भवति । वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः ॥१३६॥ स्पष्टम् ॥१३७॥

## मन्दाल्पाच्च मेधायाः ॥ ७ ॥ ३ ॥ १३८ ॥

मेधान्तादस् बहुव्रीहे–र्मदाल्पाच्च नञादितः ।
शास्त्रं हहा महाव्याधिं, मन्वते मन्दमेधसः ॥ १३८ ॥

## जातेरीयः सामान्यवति ॥ ७ ॥ ३ ॥ १३९ ॥

जातेरीयो बहुव्रीहेः, सामान्यवति जायते ।
भवेद्ब्राह्मणजातीयः, सुजातीयः सुजन्मना ॥ १३९ ॥

## भृतिप्रत्ययान्मासादिकः ॥ ७ ॥ ३ ॥ १४० ॥

भृतिप्रत्ययतो मासा–द्बहुव्रीहेरिको भवेत् ।
पञ्चकमासिकः कश्चित्, कश्चित् सप्तकमासिकः ॥१४०॥

## द्विपदाद्धर्मादन् ॥ ७ ॥ ३ ॥ १४१ ॥

द्विपदाद्धर्मशब्दान्ता–दन् बहुव्रीहितो भवेत् ।
साधुधर्मा सुधर्मा चा–नन्तधर्मा च धार्मिकः ॥१४१॥

---

एवमल्पमेधाः अमेधाः, सुमेधाः, दुर्मेधाः ॥ १३८ ॥ सामान्यग्रहणं किम् ? दुर्जातिः सूतपुत्रस्य । अत्र जातिशब्दो जन्मपर्याय इति सामान्यवानन्यपदार्थः । कथं पितृस्थानीयः ? स्थानीयं दुर्गमितिवत् स्थीयतेऽस्मिन्निति स्थानीय इत्यधिकरणप्रधानेन स्थानीयशब्देन भविष्यति । पितेव स्थानीयः पितृस्थानीयः ॥१३९॥ भृतिप्रत्ययादिति किम् ? सुमासः । भृतिग्रहणं किम् ? वर्षासु भवो वार्षिकः; वार्षिको मासोऽस्य वार्षिकमासकः । प्रत्ययग्रहणं किम् ? भृतिर्मासोऽस्य भृतिमासकः । मासादिति किम् ? पञ्चको दिवसोऽस्य पञ्चकदिवसकः ॥१४०॥ द्विपदादितिकिम् ? परमः स्वो धर्मोऽस्य परमस्वधर्मः । इह कस्मान्न भवति परमःस्वधर्मोऽस्य परमस्वधर्मः । प्रत्यासत्तेर्द्विपदस्य बहुव्रीहेर्यदि धर्म एवोत्तरपदं भवति तदा स्यादितीह न भवति ॥१४१॥

## सुहरिततृणसोमाज्जम्भात् ॥ ७ ॥ ३ ॥ १४२ ॥

**स्वादिचतुष्कतो जम्भा–दन् बहुव्रीहितो भवेत् ।**
**सुजम्भा सोमजम्भा च, तृणजम्भा यथायथम् ॥१४२॥**

## दक्षिणेर्मा व्याधयोगे ॥ ७ ॥ ३ ॥ १४३ ॥

**दक्षिणेर्मा बहुव्रीहि–रनन्तः स्यान्निपातितः ।**
**सति व्याधेन योगेऽयं, दक्षिणेर्मा मृगः स्थितः ॥१४३॥**

## सुपूत्युत्सुरभेर्गन्धादिद्गुणे ॥ ७ ॥ ३ ॥ १४४ ॥

**स्वादिचतुष्कतो गन्धा–दित् बहुव्रीहितो गुणे ।**
**सुगन्धि चन्दनं पूति–गन्धि करञ्जमुच्यते ॥ १४४ ॥**

## वागन्तौ ॥ ७ ॥ ३ ॥ १४५ ॥

**इद्वाऽऽहार्ये गुणे गन्धा–द्बहुव्रीहेः सुआदितः ।**
**सुगन्धि वा सुगन्धं वा, शरीरं शोभनं भवेत् ॥ १४५ ॥**

---

जम्भशब्दोऽभ्यवहार्यवचनो दंष्ट्रावचनो वा । स्वादिभ्य इति किम् चारुजम्भः ॥१४२॥ ईर्मं बहु व्रणं वा । व्याधयोग इति किम् ? दक्षिणेर्मं शकटम् ॥ १४३ ॥ उत्तरत्रागन्तोर्वावचनादिह स्वाभाविकाद्भवति । स्वादिभ्य इति किम् ? तीव्रगन्धं हिङ्गु । गन्धादिति किम् ? सुरसः । गुण इति किम् ? शोभना गन्धाः कुष्टादयोऽस्य सुगन्ध आपणिकः । इदिति तकार उच्चारणार्थः ॥ १४४ ॥ स्पष्टम् ॥१४५॥

## वाल्पे ॥ ७ ॥ ३ ॥ १४६ ॥

अल्पेऽर्थे गन्धशब्दादिद्, बहुव्रीहेर्विभाषया ।
श्रीमतां सूपगन्धं नो, स्यात् सूपगन्धि भोजनम् ॥१४६॥

## वोपमानात् ॥ ७ ॥ ३ ॥ १४७ ॥

उपमानात् पराद्गन्धा–दिद्बहुव्रीहितो नवा ।
मुखमुत्पलगन्धं वो–त्पलगन्धि सतां सदा ॥ १४७ ॥

## पात्पादस्याहस्त्यादेः ॥ ७ ॥ ३ ॥ १४८ ॥

समासान्तो बहुव्रीहे–रहस्त्याद्युपमानतः ।
पादादेशश्च पादस्य, व्याघ्रपात् सिंहपात्तथा ॥ १४८ ॥

## कुम्भपद्यादिः ॥ ७ ॥ ३ ॥ १४९ ॥

विहितपात्समासान्ताः, कुम्भपद्यादयस्त्विमे ।
स्युर्बहुव्रीहयो ङ्यन्ताः सिद्धाः कुम्भपदी यथा ॥ १४९ ॥

## सुसङ्ख्यात् ॥ ७ ॥ ३ ॥ १५० ॥

पात् समासान्त आदेशः, सु–सङ्ख्यापूर्वकस्य वै ।
पादस्य स्याद् बहुव्रीहौ, सुपाद् द्विपात्त्रिपाद्यथा ॥१५०॥

---

असामानाधिकरण्येऽपि उष्ट्रमुखादित्वाद् बहुव्रीहिः ॥१४६॥ स्पष्टम् ॥१४७॥ अहस्त्यादेरिति किम् ? हस्तिनः इव पादावस्य हस्तिपादः । हस्त्यादयोऽटादश ॥१४८॥ कुम्भपद्याद्याः षड्विंशतिः । येऽत्रोपमानपूर्वास्तेषां पूर्वेण सङ्ख्यादीनां चोत्तरेण सिद्धे यदिह वचने तेन 'वा पादः' २-४-६ इति ङीविकल्पो न भवति ॥१४९॥ स्त्रियां तु 'वा पादः' २-४-६ इति पक्षे ङीः सुपदी, सुपात् ॥१५०॥

**वयसि दन्तस्य दतृ ॥ ७ ॥ ३ ॥ ॥ १५१ ॥**

सुसङ्ख्यापूर्वदन्तस्य, वयसि दतृ जायते ।
बहुव्रीहौ समासान्तः, सुदती च सुदन् द्विदन् ॥ १५१ ॥

**स्त्रियां नाम्नि ॥ ७ ॥ ३ ॥ १५२ ॥**

बहुव्रीहौ समासान्तो, दन्तस्य दतृ जायते ।
स्त्रियां नाम्नि यथा फाल–दती काचिदयोदती ॥ १५२ ॥

**श्यावारोकाद्वा ॥ ७ ॥ ३ ॥ १५३ ॥**

श्यावारोकपरस्य स्याद्, दन्तस्य नाम्नि दत्रिति ।
बहुव्रीहौ नवा श्याव–दन्तश्च श्यावदँस्तथा ॥ १५३ ॥

**वाग्रान्तशुद्धशुभ्रवृषवराहाहिमूषिकशिखरात् ॥ ७ ॥ ३ ॥ १५४ ॥**

शुद्धादिसप्तकादग्रा–न्ताच्च दन्तस्य दत्रिति ।
बहुव्रीहौ विकल्पेन, शुद्धदन्तश्च शुद्धदन् ॥ १५४ ॥

**संप्राज्जानोर्ज्ञुज्ञौ ॥ ७ ॥ ३ ॥ १५५ ॥**

संप्रपूर्वकजानोः स्तो, ज्ञुज्ञादेशौ समासके ।
बहुव्रीहौ भवेत् संज्ञुः, संज्ञः प्रज्ञुश्च प्रज्ञकः ॥ १५५ ॥

---

वयसीति किम् ? सुदन्तो दाक्षिणात्यः । ऋकारो ङ्याद्यर्थः ॥१५१॥ स्त्रियामिति किम् ? वज्रदन्तः । नाम्नीति किम् ? समदन्ती । असमास उत्तरत्र नाम्नीत्येतावतोऽनुवृत्त्यर्थः ॥ १५२ ॥ नाम्नीत्येव श्यावदन्तः ॥१५३॥ योगविभागान्नाम्नीति निवृत्तम् ॥ १५४ ॥ संप्रादिति किम् ? विज्ञानुः । वचनभेदाद्यथासङ्ख्याभावः ॥ १५५ ॥

## वोर्ध्वात् ॥ ७ ॥ ३ ॥ १५६ ॥

ऊर्ध्वाज्जानोर्बहुव्रीहौ, ज्ञुज्ञादेशौ विभाषया ।
ऊर्ध्वज्ञो जानुनी ऊर्ध्वे, ऊर्ध्वज्ञुरूर्ध्वजानुकः ॥ १५६ ॥

## सुहृद्दुर्हृन्मित्रामित्रे ॥ ७ ॥ ३ ॥ १५७ ॥

मित्रेऽमित्रे सुहृद् दुर्हृद्, निपात्यते क्रमात्ततः ।
विपत्काले सुहृन्मित्रं, दुर्हृदपि परीक्ष्यते ॥ १५७ ॥

## धनुषो धन्वन् ॥ ७ ॥ ३ ॥ १५८ ॥

बहुव्रीहौ समासान्तः, स्याद् धन्वन् धनुषस्ततः ।
नरो गाण्डीवधन्वा स्या–च्छार्ङ्गधन्वा जनार्दनः ॥१५८॥

## वा नाम्नि ॥ ७ ॥ ३ ॥ १५९ ॥

बहुव्रीहौ भवेद् धन्वन्, धनुषो नाम्नि वा ततः ।
शतधन्वा स्मरः पुष्प–धन्वा पुष्पधनुस्तथा ॥ १५९ ॥

## खरखुरान्नासिकाया नस् ॥ ७ ॥ ३ ॥ १६० ॥

नस् स्यान्नाम्नि बहुव्रीहौ, नासिकायाः खरात् खुरात् ।
खरणाः खुरणाः कश्चिद्, नाम्नीति खरनासिकः ॥१६०॥

स्पष्टम् ॥१५६॥ मित्रामित्रे इति किम्? सुहृदयो मुनिः । दुर्हृदयो व्याधः ॥१५७॥ स्पष्टम ॥ १५८ ॥ पक्षे शतधनुः ॥ १५९ ॥ 'पूर्वपदस्थान्नाम्न्यगः' २–३–६५–इति णत्वम् ॥ १६० ॥

## अस्थूलाच्च नसः ॥ ७ ॥ ३ ॥ १६१ ॥

नाम्नि खरात् खुरात् पूर्व-पदाच्च स्थूलवर्जितात् ।
नासिकाया बहुव्रीहौ, नसः स्याद् द्रुणसो यथा ॥ १६१ ॥

## उपसर्गात् ॥ ७ ॥ ३ ॥ १६२ ॥

उपसर्गाद् बहुव्रीहौ, नासिकाया नसो भवेत् ।
भाति न भाति वैचित्र्या-न्मुखं प्रणसमुन्नसम् ॥ १६२ ॥

## वेः खुखग्रम् ॥ ७ ॥ ३ ॥ १६३ ॥

नासिकाया बहुव्रीहौ, खुखग्राः व्युपसर्गतः ।
विखुर्विख्रश्च विग्रश्च, विगता ह्यस्य नासिका ॥ १६३ ॥

## जायाया जानिः ॥ ७ ॥ ३ ॥ १६४ ॥

बहुव्रीहौ समासान्तो, जायया जानिरित्ययम् ।
श्रीरामो जानकीजानि-र्भूजानिः पृथिवीपतिः ॥ १६४ ॥

## व्युदः काकुदस्य लुक् ॥ ७ ॥ ३ ॥ १६५ ॥

बहुव्रीहौ समासान्तः, स्याद्व्युदः काकुदस्य लुक् ।
उत्काकुच्च विकाकुत्स्या-द्विगतमस्य काकुदम् ॥ १६५ ॥

---

अस्थूलादिति किम् ? स्थूलनासिकः । नाम्नीत्येव तुङ्गा नासिकाऽस्य तुङ्गनासिकः । कथं गोनासः । यद्यस्ति नासाशब्देन भविष्यति । चकारः पूर्वेणास्य बाधानिवृत्त्यर्थः ॥ १६१ ॥ 'नसस्य' २-३-६६ इति णः । असंज्ञार्थं वचनम् ॥१६२॥ उपसर्गादित्येव वेः पक्षिण इव नासिकाऽस्य विनासिकः ॥१६३॥ स्पष्टे ॥ १६४ ॥ १६५ ॥

## पूर्णाद्वा ॥ ७ ॥ ३ ॥ १६६ ॥

बहुव्रीहौ भवेल्लुग् वा, पूर्णतः काकुदस्य तत् ।
पूर्णं हि काकुदं पूर्ण–काकुच्च पूर्णकाकुदः ॥ १६६ ॥

## ककुदस्यावस्थायाम् ॥ ७ ॥ ३ ॥ १६७ ॥

बहुव्रीहाववस्थायां, लुक्ककुदस्य जायते ।
असंजातककुद्बालो, युवा पूर्णककुद्वृषः ॥ १६७ ॥

## त्रिककुद्गिरौ ॥ ७ ॥ ३ ॥ १६८ ॥

निपात्यते बहुव्रीहौ, त्रिककुदिति पर्वते ।
त्रिककुत् पर्वतोऽखर्वः, पर्वतेभ्यो विशिष्यते ॥ १६८ ॥

## स्त्रियामूधसो न् ॥ ७ ॥ ३ ॥ १६९ ॥

बहुव्रीहौ स्त्रियामूधस्–शब्दस्य नन्तिमो भवेत् ।
पीवरोध्नी घटोध्नी च, कुण्डोध्नी गौः प्रशस्यते ॥१६९॥

---

पूर्णादिति किम् ? रक्तकाकुदः ॥ १६६ ॥ अवस्थायामिति किम् ! श्वेतककुदः । ककुदच्छब्देनैव सिद्धे ककुदशब्दस्यास्मिन् विषये प्रयोगनिवृत्त्यर्थं वचनम् ॥ १६७ ॥ त्रैर्गिराविति सिद्धे निपातनं गिरिविशेषप्रतिपत्त्यर्थम् । तेनान्यस्मिन् त्रिककुद इत्येव भवति ॥ १६८ ॥ स्त्रियामिति किम् ? महोधाः पर्जन्यः । बहुव्रीहेरित्येव ऊधः प्राप्ता प्राप्तोधा गौः ॥ १६९ ॥

## इनः कच् ॥ ७ ॥ ३ ॥ १७० ॥

समासान्तो बहुव्रीहे-रिन्नन्तात् कच् भवेत् स्त्रियाम् ।
स्याद्बहुदण्डिका शाला बहुरासभराविका ॥१७०॥

## ऋन्नित्यदितः ॥ ७ ॥ ३ ॥ १७१ ॥

ऋदन्तात् कच् बहुव्रीहे-र्नित्यदिदन्ततस्तथा ।
स्याद् बहुब्रह्मबन्धूको, ग्रामोऽयं बहुकर्तृकः ॥१७१॥

## दध्युरःसर्पिर्मधूपानच्छालेः ॥ ७ ॥ ३ ॥ १७२ ॥

दध्याद्यन्ताद्बहुव्रीहेः, समासान्तः कजिष्यते ।
व्यूढोरस्कः प्रियोपान-त्कस्तथा प्रियशालिकः ॥१७२॥

## पुमनडुन्नौपयोलक्ष्म्या एकत्वे ॥ ७ ॥ ३ ॥ १७३ ॥

एकत्वे कच् बहुव्रीहेः, पुम्साद्यन्ताद्भवेत्ततः ।
सज्जनः प्रियपुंस्कः स्यात्, प्रियलक्ष्मीक ईश्वरः ॥१७३॥

---

अन्निनस्मन् ग्रहणान्यर्थवतानर्थकेन च तदन्तविधिं प्रयोजयन्ति । बहुस्वामिका, बहुवाग्मिका पुरी । स्त्रियामित्येव, बहुदण्डी बहुदण्डिको राजा । चकारो 'न कचि' २-४-१०४ इति विशेषणार्थः ॥ १७० ॥ नित्यग्रहणं किम् ? पृथुश्रीः, पृथुश्रीकः । पूर्वत्र स्त्रियां विधिरिति योगविभागः ॥ १७१ ॥ एवं प्रियदधिकः । प्रियसर्पिष्कः । प्रियमधुकः ॥ १७२ ॥ एवं प्रियानडुत्कः । प्रियनौकः । प्रियपयस्कः । एकत्व इति किम् ? द्विपुमान्, द्विपुंस्कः ॥ १७३ ॥

## नञोऽर्थात् ॥ ७ ॥ ३ ॥ १७४ ॥

बहुव्रीहेः समासान्तः, कजर्थतो नञः परात् ।
माऽनर्थकं वचो ब्रूहि, तथापार्थमपार्थकम् ॥ १७४ ॥

## शेषाद्वा ॥ ७ ॥ ३ ॥ १७५ ॥

उक्तातिरिक्तात् शेषा–द्बहुव्रीहेस्तु कज् नवा ।
स्याद्बहुवीणकश्चैवं, बहुवीणो वरस्वरः ॥ १७५ ॥

## न नाम्नि ॥ ७ ॥ ३ ॥ १७६ ॥

संज्ञायां विषये न स्यात्, समासान्तोऽत्र कच् ततः ।
विश्वदेवश्च पद्मश्रीः, श्वेताश्वतरिरीक्ष्यते ॥ १७६ ॥

## ईयसोः ॥ ७ ॥ ३ ॥ १७७ ॥

ईयस्वन्तात् समासात् कच्, समासान्तो न जायते ।
बहुश्रेयान् पुमान् श्रेयान्, स्याद् बहुश्रेयसी सती ॥१७७॥

## सहात्तुल्ययोगे ॥ ७ ॥ ३ ॥ १७८ ॥

बहुव्रीहेः समासान्त–स्तुल्ययोगे न कच् सहात् ।
सपुत्रो ब्राह्मणः स्थूलः, सपुत्रश्च समागतः ॥ १७८ ॥

---

स्पष्टम् ॥ १७४ ॥ शेषादिति किम्? प्रियपथ इत्यादि । असति शेषग्रहणे पक्षे परत्वात् कच् स्यात् ॥ १७५ ॥ स्पष्टे ॥ १७६ ॥ १७७ ॥ तुल्ययोगो वर्तिपदार्थस्य पुत्रादेर्वृत्त्यर्थेन पित्रादिना सह क्रिया गुणजातिद्रव्यैः साधारणः सम्बन्धः । सहादिति किम्? श्वेताश्वको देवदत्त आगतः । तुल्ययोग इति किम् । सह विद्यमानानि लोमान्यस्य सलोमकः ॥ १७८ ॥

## भ्रातुः स्तुतौ ॥ ७ ॥ ३ ॥ १७९ ॥

भ्रात्रन्तात् कच् समासान्तः, समासान्न भवेत् स्तुतौ ।
सुभ्राता शोभते विश्वे, न मूर्खभ्रातृकः क्वचित् ॥१७९॥

## नाडीतन्त्रीभ्यां स्वाङ्गे ॥ ७ ॥ ३ ॥ १८० ॥

समासान्तो न कज् नाडी–तन्त्रीभ्यां स्वाङ्गके भवेत् ।
बहुनाडिर्लसत्तन्त्रीः, कायो ग्रीवा प्रशस्यते ॥ १८० ॥

## निष्प्रवाणिः ॥ ७ ॥ ३ ॥ १८१ ॥

निष्प्रवाणिरिति ज्ञेयं, कजभावे निपातितम् ।
कम्बलो निष्प्रवाणिश्च, स्यात्तन्त्रादचिरोध्धृतः ॥ १८१ ॥

## सुभ्र्वादिभ्यः ॥ ७ ॥ ३ ॥ १८२ ॥

सुभ्रू इत्येवमादिभ्यः, समासान्तो न कज् भवेत् ।
सुभ्रूस्तथा शलाकाभ्रू–र्वरोरू रमणी मणी ॥ १८२ ॥

### इतिसप्तमाध्याये तृतीयः पादः

---

भ्रातुरिति किम् ? सुमातृकः ॥ १७९ ॥ ङ्याद्यन्ताभावाद्ध्रस्वो न भवति । स्वाङ्ग इति किम् ? बहुनाडीकः स्तम्बः ॥ १८० ॥ गोश्चान्ते ह्रस्वः’ २–४–९५ इत्यादिना ह्रस्वः । ऊयते अस्यामिति वानिः, प्रभृता वानिः, प्रवाणिः, सा निर्गता तन्तुभ्योऽस्येति निष्प्रवाणिः सदश इत्येके । निर्गतः प्रवाण्या निष्प्रवाणिरिति तत्पुरुषेण सिद्धे बहुव्रीहौ कच् मा भूदिति वचनम् ॥१८१॥ जातिवचनत्वादूङन्ता एते । एवं हि आमन्त्र्ये सौ ह्रस्वो भवति । हे सुभ्रु ? हे वरोरु ? । बहुवचनमाकृतिगणार्थम् । तेन करभोरूः, संहितोरूः इत्यादयोऽपि भवन्ति ॥१८२॥

## अथ चतुर्थः पादः

### वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते ॥ ७ ॥ ४ ॥ १ ॥

स्वरेष्वादेर्भवेद् वृद्धि–र्ञिति णिति च तद्धिते ।
दाक्षिः प्लाक्षिस्तथा चौलिः, शैवः, श्रायश्च भार्गवः ॥१॥

### केकयमित्रयुप्रलयस्य यादेरिय् च ॥ ७ ॥ ४ ॥ २ ॥

स्वरेष्वादेर्भवेद् वृद्धि–र्यादेश्चेय् केकयादिषु ।
तद्धिते ञ्णिति कैकेयः, प्रालेयं सद्विचार्यताम् ॥२॥

### देविकाशिंशपादीर्घसत्रश्रेयसस्तत्प्राप्तावाः ॥ ७ ॥ ४ ॥ ३ ॥

आकारः स्यात् स्वरेष्वादे–रेतेषां ञ्णिति तद्धिते ।
वृद्धिप्राप्तौ जलं स्तम्भो, दाविकं शांशपस्तथा ॥ ३ ॥

### वहीनरस्यैत् ॥ ७ ॥ ४ ॥ ४ ॥

स्वरेष्वादेर्ञ्णिति स्यादैत्, वहीनरस्य तद्धिते ।
वैहीनरिस्तथावैहीनरं सिध्यति सूत्रतः ॥ ४ ॥

---

स्वरेष्विति व्यञ्जनापेक्षाव्युदासार्थम् । तेनव्यञ्जनादेरपि भवति । ञ्णितीति किम् ? शङ्कव्यं दारु तद्धित इति किम् ? चिर्कीर्षकः ॥ १ ॥ ञ्णितीत्येव केकयत्वम् ॥ २ ॥ एवं दार्घसत्रम्, श्रायसम् ॥ ३ ॥ विहीनरस्य वृद्धया सिध्यति, वहीनरस्य वाहीनरिर्मा भूदिति वचनम् ॥ ४ ॥

## य्वः पदान्तात् प्रागैदौत् ॥ ७ ॥ ४ ॥ ५ ॥

तद्धिते ञ्णिति तत्प्राप्त-विपर्योक्षयोस्तयोः ।
य्वौ प्रागैदौयथासंख्यं, वैयाकरण उच्चरेत् ॥ ५ ॥

## द्वारादेः ॥ ७ ॥ ४ ॥ ६ ॥

द्वारादेः पूर्ववद् वृद्धि-प्रसङ्गे प्राक् स्त एत्तथौत् ।
सौवस्तिकश्च दौवारि-कः सौवः सौवरस्तथा ॥ ६ ॥

## न्यग्रोधस्य केवलस्य ॥ ७ ॥ ४ ॥ ७ ॥

प्राग्वन्यग्रोधशब्दस्य, यात् प्राग् ऐकार आगमः ।
नैयग्रोधः कषायः स्या-न्नैयग्रोधश्च दण्डकः ॥ ७ ॥

## न्यङ्कोर्वा ॥ ७ ॥ ४ ॥ ८ ॥

ऐकारो वा यकारात् प्राग्, न्यङ्कोः स्याद् ञ्णिति तद्धिते ।
न्यङ्कोरिदं भवेन्नैय-ङ्कवं च न्याङ्कवं तथा ॥ ८ ॥

## न अस्वङ्गादेः ॥ ७ ॥ ४ ॥ ९ ॥

आन्तस्वङ्गादिकस्य प्राग्, ऐदौतो ञ्णिति तद्धिते ।
व्यावक्रोशी तथा स्वाङ्गि-र्व्याङ्गिः स्वागतिकस्तथा ॥ ९ ॥

---

परत्वान्नित्यत्वाच्च वृद्धेः प्रागेव सर्वत्र अनेनैदौतौ । य्व इति किम् ? सौपर्णेयः । पदान्तादिति किम् ? यत इमे यातास्छात्राः । यत इतीणः शत्रन्तस्य रूपम् ॥ ५ ॥ द्वारादयो द्वादश ॥ ६ ॥ केवलस्येति किम् ? न्यग्रोधमूले भवा न्याग्रोधमूलाः शालयः ॥ ७ ॥ स्पष्टम् ॥ ८ ॥ स्वङ्गाद्याः सप्त ॥ ९ ॥

## श्वादेरिति ॥ ७ ॥ ४ ॥ १० ॥

**इकारादौ नचौत् श्वादेः, स्याद् वः प्राग् ञ्णिति तद्धिते ।
श्वाभस्त्रिश्वाथ श्वाशीर्षिः, श्वायूथिकश्च शौविकः ॥१०॥**

## इञः ॥ ७ ॥ ४ ॥ ११ ॥

**इञन्तस्य नचौत् श्वादेः, स्याद्वात् प्राग् ञ्णिति तद्धिते ।
स्यात् श्वाभस्त्रेरिदं किञ्चित्, श्वाभस्त्रमिति गीयते ॥ ११ ॥**

## पदस्यानिति वा ॥ ७ ॥ ४ ॥ १२ ॥

**वात् प्रागौद्वा पदान्तस्य, श्वादेर्ञ्णितीद्विवर्जिते ।
शौवापदमरण्ये स्यात्, श्वापदं च पदे पदे ॥ १२ ॥**

## प्रोष्ठभद्राज्जाते ॥ ७ ॥ ४ ॥ १३ ॥

**प्रोष्ठाद्भद्राच्च जातेऽर्थे, वृद्धिरादेः पदस्य वै ।
ञ्णिति स्यात् प्रोष्ठपादश्च, भद्रपादश्च नन्दनः ॥ १३ ॥**

---

शौविक इति आदेः फलम् । इतीति किम् ? श्वहानस्येदं शौवहानम् ॥ १० ॥ इकारादौ निमित्त उच्यमानः पूर्वेण प्रतिषेध इञन्तस्य प्रत्ययान्तरे न प्राप्नोतीति वचनम् ॥ ११ ॥ अनितीति किम् ? श्वापदेन चरति श्वापदिकः । श्वन्शब्दस्य द्वारादिषु पाठात्तत्र तदादिविधेर्ज्ञापितत्वान्नित्यमौकारागमे प्राप्ते विकल्पः ॥ १२ ॥ जात इति किम् ? प्रोष्ठपदासु भवः प्रौष्ठपदो मेघः । ऊर्ध्वमौहूर्तिकः, गुरुलाघवम्, संहतपारार्थ्यमित्यन्यथा सिध्यति इति न तदर्थं सूत्रविधानमावश्यकम् ॥ १३ ॥

## अंशादृतोः ॥ ७ ॥ ४ ॥ १४ ॥

उत्तरस्य स्वरेष्वादे-र्वृद्धिर्ञ्णित्यंशतस्त्वृतोः ।
स्यात् पूर्ववार्षिकः पूर्व-नैदाघः पूर्वशारदः ॥ १४ ॥

## सुसर्वार्धाद्राष्ट्रस्य ॥ ७ ॥ ४ ॥ १५ ॥

उत्तरस्य सुसर्वार्धाद्, राष्ट्रस्य ञ्णिति तद्धिते ।
वृद्धिरादेः स्वरस्य स्यात्, सर्वपाञ्चालको यथा ॥ १५ ॥

## अमद्रस्य दिशः ॥ ७ ॥ ४ ॥ १६ ॥

दिग्वाचिनः परं भद्र-भिन्नस्य राष्ट्रवाचिनः ।
ञ्णिति वृद्धिः स्वरेष्वादेः, पूर्वपाञ्चालको यथा ॥ १६ ॥

## प्राग्ग्रामाणाम् ॥ ७ ॥ ४ ॥ १७ ॥

प्राग्ग्रामांशादिशो वृद्धिः, प्राग्ग्रामाणां स्वरस्य वै ।
तद्धिते ञ्णिति पूर्वेषु-कामशमो भवेद्यथा ॥ १७ ॥

## सङ्ख्याधिकाभ्यां वर्षस्याभाविनि ॥ ७ ॥ ४ ॥ १८ ॥

वृद्धिः सङ्ख्याधिकाभ्यां स्या-द्वर्षस्याभाविनि ञ्णिति ।
धान्यं द्वैवर्षिकं भावि, द्विवार्षिकस्त्रिवार्षिकः ॥ १८ ॥

---

अंशादिति किम् ? पूर्वासु ऋत्वन्तरैर्व्यवहितासु वर्षासु भवः पौर्ववर्षिकः । ऋतोरिति किम् ? पूर्वपिप्पल्या इदं पौर्वपिप्पलम् ॥ १४ ॥ एवं सुपाञ्चालकः, अर्धपाञ्चालकः । राष्ट्रस्येति किम् ? सुगन्धाः पण्यमस्य सौगन्धिकः ॥ १५ ॥ अमद्रस्येति किम् ? पौर्वमद्रः । दिश इति किम् ? पूर्वं पञ्चालानां पूर्वपञ्चालाः । अंशिसमासः । तेषु भवः पौर्वपञ्चालकः ॥१६॥ बहुवचनाद्ग्रामग्रहणेन नगरमपि गृह्यते ॥१७॥ स्पष्टम् ॥१८॥

## मानसंवत्सरस्याशाणकुलिजस्यानाम्नि ॥ ७ ॥ ४ ॥ १९ ॥

मानसंवत्सरस्याशा–णकुलिजस्य पूर्ववत् ।
वृद्धिरनाम्नि षष्टी द्वे, भूतो भावी द्विषाष्टिकः ॥ १९ ॥

## अर्धात् परिमाणस्यानतो वा त्वादेः ॥७॥४॥२०॥

स्यादर्धात् परिमाणस्या–नतो वृद्धिस्तथादितः ।
ञ्णित्यर्धस्य नवाचार्ध–मौष्टिकमार्धमौष्टिकम् ॥ २० ॥

## प्राद्वाहणस्यैये ॥ ७ ॥ ४ ॥ २१ ॥

प्राद्वाहणस्य वृद्धिः स्यात्, ञ्णित्येये प्राक् स्वरस्य तु ।
नवा प्रवाहणेयः प्रा–वाहणेयस्तथा भवेत् ॥ २१ ॥

## एयस्य ॥ ७ ॥ ४ ॥ २२ ॥

एयान्तावयवाद् वृद्धि–र्वाहणस्य प्रतो ञ्णिति ।
प्रस्य स्याद्वा तु प्रावाह–णायिः प्रहावणेयकम् ॥ २२ ॥

---

अनाम्नीति किम् ? पञ्चलोहिन्यः परिमाणमस्य पाञ्चलोहितिकम् ॥ १९ ॥ अनत इति किम् ? अर्धप्रस्थिकम्, आर्धप्रस्थिकम् ॥ २० ॥ वा त्वादेरिति वर्तते ॥ २१ ॥ बाह्यतद्धितनिमित्ता वृद्धिरेवाश्रयेण विकल्पेनाबयया बाधितुमिति सूत्रारम्भः ॥ २२ ॥

## नञः क्षेत्रज्ञेश्वरकुशलचपलनिपुणशुचेः ॥ ७ ॥ ४ ॥ २३ ॥

नञः क्षेत्रादिषण्णां ञ्णित्–परे वृद्धिर्नञस्तु वा ।
आक्षैत्रज्ञमक्षैत्रज्ञ-मानैश्वरमनैश्वरम् ॥ २३ ॥

## जङ्गलधेनुवलजस्योत्तरपदस्य तु वा ॥ ७ ॥ ४ ॥ २४ ॥

जङ्गलादेर्ञ्णिति वृद्धि – र्नित्यं प्रागुत्तरस्य वा ।
स्यात् कौरुजङ्गलस्तद्वद्, भवति कौरुजाङ्गलः ॥ २४ ॥

## हृद्भगसिन्धोः ॥ ७ ॥ ४ ॥ २५ ॥

वृद्धिर्हृद्भगसिन्धूना–मुभययोर्ञ्णितीष्यते ।
सौभाग्याद् वृणु सौहार्दं, दौर्भाग्याद्दौर्हृदं तथा ॥२५॥

## प्राचां नगरस्य ॥ ७ ॥ ४ ॥ २६ ॥

नगरान्तस्य प्राचां स्याद् वृद्धिरुभययोर्ञ्णिति ।
स्यात् सौह्मनागरः पौण्ड–नागरो गैरिनागरः ॥ २६ ॥

---

स्पष्टम् ॥ २३ ॥ आदेरित्यनुवर्तते । वेति तु निवृत्तम् । उत्तरपदस्य चेत्यकरणात् ॥ २४ ॥ आदेरुत्तरपदस्येति च द्वयमनुवर्तते ॥ २५ ॥ प्राचामिति किम् ? उदीचां माडनागरः ॥ २६ ॥

## अनुशतिकादीनाम् ॥ ७ ॥ ४ ॥ २७ ॥

अनुशतिक इत्येव-मादीनां ञ्णिति तद्धिते ।
स्यात् पूर्वोत्तरयोर्वृद्धि-रानुशातिकमिष्यते ॥ २७ ॥

## देवतानामात्वादौ ॥ ७ ॥ ४ ॥ २८ ॥

आत्वादौ देवतार्थानां, वृद्धिरुभययोर्ञ्णिति ।
स्यादाग्नावैष्णवं सूक्त-मैन्द्रापौष्णं हविस्तथा ॥ २८ ॥

## आतो नेन्द्रवरुणस्य ॥ ७ ॥ ४ ॥ २९ ॥

इन्द्रवरुणयोर्वृद्धि-र्नादन्तादुत्तरस्य तत् ।
सोमेन्द्रं हविराग्नेन्द्रं, सूक्तं तथाग्निवारुणम् ॥ २९ ॥

## सारवैक्ष्वाकमैत्रेयभ्रौणहत्यधैवत्यहिरण्मयम् ॥ ७ ॥ ४ ॥ ३० ॥

अणाद्यन्ता निपात्यन्ते, शब्दाः षट् सारवादयः ।
उदकं सारवं भूप-मैक्ष्वाको भस्तोऽभवत् ॥ ३० ॥

---

अनुशतिकादय एकत्रिंशत् । आकृतिगणोऽयम् ॥ २७ ॥ आत्वादाविति किम् ? स्कन्दविशाखयोरिदं स्कान्दविशाखम् । ' वेदसह — ' ३–२–४१–इत्यत आरभ्य ' उषासोषसः ' ३–२–४६ इति यावदात्वादयः ॥ २८ ॥ उत्तरपदस्येत्येव ऐन्द्राग्नम् ॥ २९ ॥ स्पष्टम् ॥ ३० ॥

वान्तमान्तितमान्तितोऽन्तियान्तिषद्
॥ ७ ॥ ४ ॥ ३१ ॥

शब्दा वातमवाद्यन्ता, निपात्यन्तेऽन्तमादयः ।
अन्तितोऽन्तितमश्चैव–मन्तिषदन्तमोऽन्तियः ॥३२॥

विन्मतोर्णीष्ठेयसौ लुप् ॥ ७ ॥ ४ ॥ ३२ ॥

णाविष्ठे ईयसौ लुप् स्यात्, प्रत्ययस्य विनो मतोः ।
स्रजयति स्रजिष्ठश्च, स्रजियानिति साध्यताम् ॥ ३२ ॥

अल्पयूनोः कन् वा ॥ ७ ॥ ४ ॥ ३३

णाविष्ठे ईयसौ कन् वा, स्यादल्पयुवशब्दयोः ।
कनिष्ठः कथ्यतेऽल्पिष्ठो, युविष्ठोऽपि तथा मतः ॥३३॥

प्रशस्यस्य श्रः ॥ ७ ॥ ४ ॥ ३४ ॥

णाविष्ठे ईयसौ श्रः स्यात्, प्रशस्यस्य सदा मतः ।
श्रेष्ठः श्रयति च श्रेयान्, प्रयोगः स्याद् सदामतः ॥३४॥

वृद्धस्य च ज्यः ॥ ७ ॥ ४ ॥ ३५ ॥

वृद्धप्रशस्ययोर्ज्यः स्यात्, णाविष्ठे ईयसौ परे ।
ज्येष्ठो ज्ययति वृद्धस्य, प्रशस्यस्य च साध्यताम् ॥३५॥

---

प्राप्ते अन्तिकतमः, द्वयोः। अन्तिकतः। अन्तिकयः। अन्तिकसत इति ॥ ३१ ॥ अत्र एकवचनादगुणाङ्गादपीष्टेऽयम्। निर्दिश्यमानस्यात् प्रत्ययमात्रस्य लुप् ॥ ३२ ॥ स्पष्टं सूत्रपञ्चकम् ॥ ३३ ॥ ३४ ॥ ३५ ॥

## ज्यायान् ॥ ७ ॥ ४ ॥ ३६ ॥

ईकारस्येयसोरात्वं, ज्यादेशतो निपात्यते ।
ज्यायान् वृद्धः प्रशस्यो वा, द्वयोर्मध्ये विशेषतः ॥३६॥

## बाढान्तिकयोः साधनेदौ ॥ ७ ॥ ४ ॥ ३७ ॥

स्तो बाढान्तिकयोः साध–नेदौ णीष्ठेयसौ क्रमात् ।
साधयति च साधिष्ठो, नेदिष्ठो नेदयत्यथ ॥ ३७ ॥

## प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घवृद्धवृन्दारकस्येमनि च प्रास्थास्फावरगरबंहत्रपद्राघवर्षवृन्दम् ॥ ७ ॥ ४ ॥ ३८ ॥

प्रियादीनां दशानां स्यु–रिमनि प्रादयः क्रमात् ।
णीष्ठेयसौ यथायोगं, प्रेमा प्रेयान् भवेत् प्रियः ॥ ३८ ॥

## पृथुमृदुभृशकृशदृढपरिवृढस्य ऋतो रः ॥ ७ ॥ ४ ॥ ३९ ॥

पृथ्वादीनामृकारस्ये–मनि णीष्ठेयसौ च रः ।
प्रथिमा म्रदिमा चैवं, भ्रशिमा क्रशिमा तथा ॥ ३९ ॥

---

॥ ३६ ॥ ३७ ॥ स्फिरशब्दस्यावर्णत्वादपृथ्वादित्वाददृढादित्वाच्च नेमन् प्रत्ययः । वरादीनामकार उच्चारणार्थः ॥ ३८ ॥ पृथ्वादीनामिति किम्? ऋजिमा । ऋत इति किम्? सर्वस्य मा भूत् ॥ ३९ ॥

## वहोर्णीष्ठे भूय् ॥ ७ ॥ ४ ॥ ४० ॥

स्याद् भूय् इत्ययमादेशो, बहुशब्दस्य णीष्ठयोः ।
वीतरागे भवेद्भक्तिर्भूयिष्ठा भाग्यशालिनाम् ॥ ४० ॥

## भूर्लुक् चेवर्णस्य ॥ ७ ॥ ४ ॥ ४१ ॥

इमनि चेयसौ भूः स्या–द्बहोर्लुगनयोर्भवेत् ।
इवर्णस्य च भूयाँश्च, भूमा च साध्यतां बहोः ॥ ४१ ॥

## स्थूलदूरयुवह्रस्वाक्षिप्रक्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः ॥ ७ ॥ ४ ॥ ४२ ॥

अन्तस्थादेर्लुगेषां स्यान्, णीष्ठेयसौ तथेमनि ।
गुणश्च नामिनः क्षेपि–यान् क्षेपिष्ठ इतीष्यते ॥ ४२ ॥

## त्र्यन्त्यस्वरादेः ॥ ७ ॥ ४ ॥ ४३ ॥

तुस्तथाऽन्त्यस्वरादेश्च–मनि णीष्ठेयसौ च लुक् ।
करिष्ठश्च करीयाँश्च, मात्रादौ प्रत्ययो न तृः ॥ ४३ ॥

---

भूभावापवादः ॥ ४० ॥ भू ऊ इति ऊकार प्रश्लेषादवादेशो न भवति। इवर्णस्येति किम्? सर्वस्य मा भूत् ॥ ४१ ॥ ह्रस्वादिभ्यः पृथ्वादित्वादिमन्। उत्तरेणान्त्यस्वरस्यानेनार्थादन्तस्थाया लोपे सिद्धे अन्तस्थादेरिति किम्? येन नाप्राप्तिन्यायेनान्त्यस्वरादिलोपं बाधित्वानेनान्तस्थाया एव लोपो मा भूदित्येवमर्थम्। नामिन इति किम्? ह्रस्वक्षिप्रक्षुद्राणां सकारपकारदकाराणां मा भूत् ॥ ४२ ॥ स्पष्टम् ॥ ४३ ॥

## नैकस्वरस्य ॥ ७ ॥ ४ ॥ ४४ ॥

लुग् नैकस्वरशब्दस्या–न्त्यस्वरादेरिमन्परे ।
णाविष्ठे ईयसौ तेन, स्यात् स्रजीयान् स्रजिष्ठवित् ॥४४॥

## दण्डिहस्तिनोरायने ॥ ७ ॥ ४ ॥ ४५ ॥

आयनेऽन्त्यस्वरादेर्लुग्, न भवेद्दण्डिहस्तिनोः ।
स्याद्दाण्डिनायनो यद्व–त्तथैव हास्तिनायनः ॥ ४५ ॥

## वाशिन आयनौ ॥ ७ ॥ ४ ॥ ४६ ॥

वाशिनोऽन्त्यस्वरादेर्लुग्, नायनिप्रत्यये परे ।
अपत्यं वाशिनो वाशि–नायनिः साध्यतामतः ॥ ४६ ॥

## जिह्माशिनः ॥ ७ ॥ ४ ॥ ४७ ॥

लुगेयेऽन्त्यस्वरादेश्च, जिह्माशिनो न जायते ।
भवेज्जिह्माशिनोऽपत्यं, जैह्माशिनेय इत्ययम् ॥ ४७ ॥

---

एकस्वरस्येति किम् ? वसुमन्तमाचष्टे वसयति । इमनि चेत्येव अस्यापत्यम् इः । योगविभागात् 'अवर्णेवर्णस्य' ७-४-६८ इति लोपस्यापि प्रतिषेधः । श्रेष्ठः ॥ ४४ ॥ 'नोपदस्य' ७-४-६१ इति प्राप्तौ प्रतिषेधः । आयन इति किम् ? दण्डिनां समूहो दाण्डम् ॥ ४५ ॥ 'अवृद्धाद्दोर्नवा' ६-१-११० इत्यायनिञ् ॥ ४६ ॥ शुभ्रादित्वादेयण् ॥ ४७ ॥

## ईनेऽध्वात्मनोः ॥ ७ ॥ ४ ॥ ४८ ॥

लुगीनेऽध्वात्मनोरन्त्य-स्वरादेर्नैव जायते ।
अध्वनीनमहो मुक्ति-मात्मनीनं वचोऽर्हतः ॥ ४८ ॥

## इकण्यथर्वणः ॥ ७ ॥ ४ ॥ ४९ ॥

इकण्यन्त्यस्वरादेर्लु-गथर्वणो न जायते ।
अधीते वेदमथर्वाण-माथर्वणिक उच्यते ॥ ४९ ॥

## यूनोऽके ॥ ७ ॥ ४ ॥ ५० ॥

प्रत्ययेऽके परे यूनोऽ-न्त्यस्वरादेर्न लुग् भवेद् ।
सेवते यो जिनेशं तं, यौवनिका न मुञ्चति ॥ ५० ॥

## अनोऽट्ये ये ॥ ७ ॥ ४ ॥ ५१ ॥

लुग् नोऽनोऽन्त्यस्वरादेर्यं, अट्यवर्जिते परे भवेद् ।
साद् सामन्यश्च मूर्धन्यः, प्राप्य राज्यं न माद्यति ॥ ५१ ॥

---

'अध्वानं येनौ' ७-१-१०३ इतीनः । 'भोगोत्तरपदात्मभ्यामीनः' ७-१-४० इतीनः । ईन इति किम् ? प्राध्वम्, अध्यात्मम् ॥ ४८ ॥ न्याया-दित्वादिकण् ॥ ४९ ॥ चौरादित्वादकञ् । अक इति किम् ? युवा प्रयोजनमस्य यौविकम् ॥ ५० ॥ अन इति किम् ? स्त्रिषु साधुः स्त्रैण्यः । अट्य इति किम् ? राज्यम् । परमराजः ॥ ५१ ॥

## अणि ॥ ७ ॥ ४ ॥ ५२ ॥

लुग् नोऽनोऽन्त्यस्वरादेश्च, तद्धितेऽणि परे भवेत् ।
**सौत्वनो याज्वनो वैम-नः कार्मणं च पार्वणः ॥ ५२ ॥**

## संयोगादिनः ॥ ७ ॥ ४ ॥ ५३ ॥

इन् संयोगात् परस्तस्या-न्त्यस्वरादेर्न लुग् ह्यणि ।
**शाङ्गिनश्चाक्रिणो वाज्रि-णः स्राग्विणश्च माद्रिणः ॥५३॥**

## गाथिविदथिकेशिपणिगणिनः ॥ ७ ॥ ४ ॥ ५४ ॥

भवेदन्त्यस्वरादेर्लुग्, गाथ्यादीनां न चाण्परे ।
**गाथिनः केशिनो वैद-थिनः पाणिनगाणिनौ ॥५४॥**

## अनपत्ये ॥ ७ ॥ ४ ॥ ५५ ॥

इन्नन्तस्यानपत्येऽण्य-न्त्यस्वरादेर्न लुग् भवेत् ।
**भवेत् सांकूटिनं चैत्रं, सांराविणं च गार्भिणम् ॥ ५५ ॥**

---

अणीति किम् ? कर्म शीलमस्य कार्मः । योगविभाग उत्तरार्थः ॥ ५२ ॥ संयोगादिति किम् ? मेधाविनोऽपत्यं मैधावः । अनपत्ये उत्तरेण सिद्धत्वादपत्यार्थोऽयमारम्भः ॥ ५३ ॥ स्पष्टम् ॥ ५४ ॥ अनपत्ये इति किम् ? मेधाविनोऽपत्यं मैधावः । अणीत्येव गर्भिणां समूहो गार्भम् 'श्वादिभ्योऽञ्' ६-२-२६-इत्यञ् ॥ ५५ ॥

## उक्ष्णो लुक् ॥ ७ ॥ ४ ॥ ५६ ॥

स्यादुक्ष्णोऽन्त्यस्वरादेर्लु-गनपत्येऽणि प्रत्यये ।
औक्षं पदं पतेद्यत्र, गोष्पदं तत्र जायते ॥ ५६ ॥

## ब्रह्मणः ॥ ७ ॥ ४ ॥ ५७ ॥

ब्रह्मणोऽन्त्यस्वरादेर्लु-गनपत्येऽणि प्रत्यये ।
ब्राह्मं मन्त्रं तथा ब्राह्म-मस्त्रममोघमाप्नुहि ॥ ५७ ॥

## जातौ ॥ ७ ॥ ४ ॥ ५८ ॥

ब्रह्मणोऽन्त्यस्वरादेर्लुग्, जातावण्यनपत्यके ।
ब्राह्मीं सदोषधिं प्राप्य, शीघ्रं जाड्यमपाकुरु ॥ ५८ ॥

## अवर्मणो मनोऽपत्ये ॥ ७ ॥ ४ ॥ ५९ ॥

अवर्मणो मनोऽपत्येऽ-णि लुगन्त्यस्वरादितः ।
सौषामो माद्रसामश्च, सौत्वनश्चाक्रवर्मणः ॥ ५९ ॥

## हितनाम्नो वा ॥ ७ ॥ ४ ॥ ६० ॥

हितनाम्नोऽणि लुक् स्याद्वाऽ-न्त्यस्वरादेरपत्यके ।
अपत्यं हितनाम्नो है-तनामो हैतनामनः ॥ ६० ॥

---

अनपत्य इत्येव उक्ष्णोऽपत्यमौक्ष्णः ॥ ५६ ॥ योगविभाग उत्तरार्थः ॥ ५७ ॥ पूर्वेण सिद्धे जातावनपत्य एवेति नियमार्थं वचनम् । तेनोत्तर-सूत्रेणापत्ये लुग् न भवति ॥ ५८ ॥ सौत्वनश्चाक्रवर्मण इति प्रत्युदाहरणम् । अपत्य इति किम् ? चर्मणा छन्नश्चार्मणो रथः ॥ ५९ ॥ स्पष्टम् ॥ ६० ॥

## नोऽपदस्य तद्धिते ॥ ७ ॥ ४ ॥ ६१ ॥

तद्धितेऽपदनान्तानां, लुक् स्यादन्त्यस्वरादितः ।
मैधावः शारलोमिश्च, द्व्यहस्त्र्यहश्च हास्तिकम् ॥६१॥

## कलापिकुथुमितैतलिजाजलिलाङ्गलिशिखण्डिशिलालिसब्रह्मचारिपीठसर्पिसूकरसद्मसुपर्वणः ॥ ७ ॥ ४ ॥ ६२ ॥

एषामन्त्यस्वरादेर्लुग्, नापदानां च तद्धिते ।
कालापाः कौथुमास्तैत—ला जाजलाश्च लाङ्गलाः ॥६२॥

## वाश्मनो विकारे ॥ ७ ॥ ४ ॥ ६३ ॥

लुगश्मनोऽपदस्यान्त्य—स्वरादेस्तद्धिते नवा ।
विकारे ह्याश्मनो वाश्मः, स्याद्विकारोऽश्मनः खलु ॥ ६३ ॥

## चर्मशुनः कोशसंकोचे ॥ ७ ॥ ४ ॥ ६४ ॥

संकोचके शुनः कोशे, चर्मणस्तद्धिते परे ।
स्याल्लुगन्त्यस्वरादेर्य—चार्मः शौवश्च साध्यताम् ॥ ६४ ॥

---

न इति किम्? वैद्युतं तेजः। अपदस्येति किम्? मेधाविरूप्यम्। तद्धित इति किम्? हस्तिना ॥ ६१ ॥ तैतली जाजली लाङ्गली चाचार्याः। तत्कृतो ग्रन्थोऽप्युपचारात् तच्छब्देनोच्यते। तमधीयते तैतलाः ॥ ६२ ॥ विकार इति किम्? अश्मनो मन्त्रः ॥ ६३ ॥ कोशादन्यत्र चार्मणः। सङ्कोचादन्यत्र शौवनः ॥ ६४ ॥

## प्रायोऽव्ययस्य ॥ ७ ॥ ४ ॥ ६५ ॥

प्रायोऽपदाव्ययस्यान्त्य–स्वरादेस्तद्धितेऽस्तिलुग् ।
सौचो बाह्यश्च बाह्लीकः, पौनःपुन्यश्च शाश्वतः ॥ ६५ ॥

## अनीनाद्‌व्यह्नोऽतः ॥ ७ ॥ ४ ॥ ६६ ॥

लुक् स्यादतो पदस्याह्न, ईनादड्‌वर्ज्यतद्धिते ।
आह्न तथाऽऽह्निकं ज्ञेयं द्व्यहीनः प्रत्यहं द्व्यहः ॥ ६६ ॥

## विंशतेस्तेर्डिति ॥ ७ ॥ ४ ॥ ६७ ॥

लुगपदस्य तेर्वाच्यो, विंशतेर्डिति तद्धिते ।
विंशकश्चैकविंशश्चा–सन्नविंशा द्विसप्ततः ॥ ६७ ॥

## अवर्णेवर्णस्य ॥ ७ ॥ ४ ॥ ६८ ॥

तद्धिते लुगवर्णस्ये–वर्णस्य चापदस्य तत् ॥
दाक्षिश्चौडिश्च नाभेयो, रौहिणेयो यथा भवेत् ॥ ६८ ॥

## अकद्रूपाण्ड्वोरुवर्णस्यैये ॥ ७ ॥ ४ ॥ ६९ ॥

कद्रूं पाण्डुं विनाप्यैये, लुगुवर्णस्य तद्धिते ।
कामण्डलेयजाम्बेयौ, माण्डव्यः काद्रवेयकः ॥ ६९ ॥

---

प्रायोग्रहणं प्रयोगानुसरणार्थम्, तेन शाश्वत इत्यादिकम् ॥ ६५ ॥ स्पष्टम् ॥ ६६ ॥ द्विसप्ततः प्रत्युदाहरणम् । तद्धित इत्येव विंशतौ ॥ ६७ ॥ अपदस्येत्येव कुक्कुतमः । तद्धित इत्येव वृक्षे ॥ ६८ ॥ उवर्णस्येति किम्? वैमात्रेयः । एय इति किम्? माण्डव्यः ॥ ६९ ॥

## अस्वयंभुवोऽव् ॥ ७ ॥ ४ ॥ ७० ॥

तद्धितेऽवस्वयंभूव–र्णान्तस्यापदकस्य तत् ।
औपगवश्च बाभ्रव्यः, कापटवश्च बाहविः ॥ ७० ॥

## ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त इकस्येतो लुक् ॥ ७ ॥ ४ ॥ ७१ ॥

ऋवर्णान्तादुवर्णान्ता–द्दोसिसुसस्तदन्ततः ।
शश्वदकस्मात् परित्यज्ये–कस्येतो लुक् च मातृकम् ॥७१॥

## असकृत्संभ्रमे ॥ ७ ॥ ४ ॥ ७२ ॥

प्रयुज्यते पदं वाक्यं, नैकशः संभ्रमे ततः ।
पलायन्तां पलायन्तां, दवानलो दवानलः ॥ ७२ ॥

## भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक् तमबादेः ॥ ७ ॥ ४ ॥ ७३ ॥

अविच्छेदे तथाऽऽभीक्ष्ण्ये, भृशे द्योत्ये पदादिकम् ।
द्विरुक्तं तमबादेः प्राग्, भोजं भोजं प्रयात्यसौ ॥ ७३ ॥

---

अस्वयंभुव इति किम्? स्वायंभुवः ॥ ७० ॥ स्पष्टम् ॥ ७१ ॥ भयादिभिश्चित्तव्याक्षेपात् प्रयोक्तुस्त्वरणं संभ्रमः । संभ्रमादौ पदं वाक्यं वा वर्तते न पदावयव इति नासौ असकृद् द्विर्वा भवति ॥ ७२ ॥ क्रियायाः साकल्यमवयवक्रियाणां कार्त्स्न्यं भृशार्थः । पौनःपुन्यमाभीक्ष्ण्यम् । सातत्यं क्रियान्तरैरव्यवधानमविच्छेदः ॥ ७३ ॥

## नानावधारणे ॥ ७ ॥ ४ ॥ ७४ ॥

नानावधारणे द्योत्ये, शब्दरूपं द्विरुच्यते ।
अस्मात् कार्षापणाद्देहि, माषं माषं न चाधिकम् ॥ ७४ ॥

## आधिक्यानुपूर्व्ये ॥ ७ ॥ ४ ॥ ७५ ॥

आधिक्ये चानुपूर्व्ये च, शब्दरूपं द्विरुच्यते ।
अग्रे अग्रे विशुद्धाय, जिनेशाय नमोनमः ॥ ७५ ॥

## डतरडतमौ समानां स्त्रीभावप्रश्ने ॥ ७ ॥ ४ ॥ ७६ ॥

डतरडतमान्तं स्त्री-भावप्रश्ने द्विरुच्यते ।
समानामनयोः कीदृक्, कतरा कतराऽऽढ्यता ॥ ७६ ॥

## पूर्वप्रथमावन्यतोऽतिशये ॥ ७ ॥ ४ ॥ ७७ ॥

अन्यतोऽतिशये पूर्वं, प्रथमश्च द्विरुच्यते ।
पूर्वं पूर्वं प्रपुष्यन्ति, प्रथमं प्रथमं तथा ॥ ७७ ॥

---

नानाभूतानां भेदेनेयत्तापरिच्छेदो नानावधारणम् ॥ ७४ ॥ आधिक्यं प्रकर्षः । आनुपूर्व्यं क्रमानुल्लङ्घनम् ॥ ७५ ॥ स्पष्टम् ॥ ७६ ॥ आतिशायिकापवादः । अन्यत इति किम् ? पूर्वतरं पुष्यन्ति । अतिशय इति किम् ? पूर्वम् । प्रथमम् ॥ ७७ ॥

## प्रोपोत्सं पादपूरणे ॥ ७ ॥ ४ ॥ ७८ ॥

द्विरुच्यन्ते च चत्वारि, प्रोपोत्सं पादपूरणे ।
प्रप्रभद्रमुदुत्तीर्णं, संसमरत बोधिदम् ॥ ॥ ७८ ॥

## सामीप्येऽधोऽध्युपरि ॥ ७ ॥ ४ ॥ ७९ ॥

चेत् सामीप्यं द्विरुच्यन्ते–ऽधोऽध्युपर्यत्र लक्षणे ।
अधोऽधोऽध्यधि सद्ग्राम–मुपर्युपरि सत्पुरम् ॥ ७९ ॥

## वीप्सायाम् ॥ ७ ॥ ४ ॥ ८० ॥

वीप्सायां शब्दरूपं य–ल्लक्षणात्तद् द्विरुच्यते ।
वृक्षं वृक्षं पयः सिञ्चे–दश्वाः सन्ति गृहे गृहे ॥ ८० ॥

## प्लुप् चादावेकस्य स्यादेः ॥ ७ ॥ ४ ॥ ८१ ॥

द्विरुक्तस्यादिमस्यैक–स्य स्यादेः प्लुप् विधीयते ।
एक एकस्तथैकैक, एकैकाद्या विभाव्यताम् ॥ ८१ ॥

---

पादपूरण इति किम्? 'प्रणम्य सच्छासनवर्धमानम्' ॥ ७८ ॥ सामीप्यं देशकृता कालकृता वा प्रत्यासत्तिः। सामीप्य इति किम्? अधः पन्नगाः ॥ ७९ ॥ पृथक् सङ्ख्यायुक्तानां बहूनां सजातीयानामर्थानां साकल्येन प्रत्यकं क्रियया गुणेन द्रव्येण जात्या वा युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा। वीप्सायामिति किम्? वृक्षं सिञ्चति ॥ पित्करणं पुंवद्भावार्थम्। चकार उत्तरत्र प्लुद्विर्वचनयोः समुच्चयार्थः। आदाविति किम्? उत्तरोक्तौ मा भूत् ॥ ८१ ॥

## द्वन्द्वं वा ॥ ७ ॥ ४ ॥ ८२ ॥

द्वन्द्वं वा द्वेर्द्विरुक्तस्य, वीप्सायां वै निपात्यते ।
द्वाभ्यां द्वाभ्यां कृतं द्वन्द्वं, द्वन्द्वं युद्धं द्वयोर्द्वयोः ॥८२॥

## रहस्यमर्यादोक्तिव्युत्क्रान्तियज्ञपात्रप्रयोगे ॥ ७ ॥ ४ ॥ ८३ ॥

रहस्यादिषु गम्येषु, द्वन्द्वमिति निपात्यते ।
मन्त्रयन्ते नरा द्वन्द्वं रहस्यस्य विचारणात् ॥ ८३ ॥

## लोकज्ञातेऽत्यन्तसाहचर्ये ॥ ७ ॥ ४ ॥ ८४ ॥

लोकज्ञाते तथाऽत्यन्त-साहचर्ये निपात्यते ।
द्वन्द्वमिति द्विशब्दस्य, द्वन्द्वं मास्दमर्कतौ ॥ ८४ ॥

---

द्विशब्दस्यादौ स्यादेः प्लुप् इकारस्यामभाव उत्तरस्य चाकारस्यात्वं स्यादेश्चाम्भावो वा निपात्यते ॥ ८२ ॥ मर्यादोक्तौ, आचतुरं हीमे पशवो द्वन्द्वं मिथुमायन्ते । व्युत्क्रान्तौ द्वन्द्वं व्युत्क्रान्ताः द्वैराश्येन भिन्ना इत्यर्थः । व्युत्क्रान्तिर्भेदः । यज्ञपात्रप्रयोगे द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । रहस्यादिष्विति किम् ? द्वौ तिष्ठतः । उक्तिग्रहणं शब्दोपात्तायां मर्यादायां यथा स्यात् प्रकरणादिगम्यायां मा भूदित्येवमर्थम् । द्वन्द्वः समासः । द्वन्द्वः कलहः । द्वन्द्वं युद्धम् । द्वन्द्वं युग्मम् । द्वन्द्वानि सहते दुःखानीत्यर्थः अत्र द्वन्द्व इति शब्दान्तरम् ॥ ८३ ॥ लोकज्ञात इति किम् ? द्वौ मैत्रमैत्रौ । अत्यन्तसाहचर्य इति किम् ? द्वौ युधिष्ठिरार्जुनौ । द्वन्द्वमिति च सूत्रेऽपि नपुंसकं निर्देशः नपुंसकत्वार्थम् ॥ ८४ ॥

## आबाधे ॥ ७ ॥ ४ ॥ ८५ ॥

आबाधे यद् द्विरुक्तं स्यात्, स्यादेः प्लुप् तत्र चादिमे ।
नष्टनष्टस्तथा ऋक् ऋक्, पूः पूः वदति पीडया ॥ ८५ ॥

## नवा गुणः सदृशेरित् ॥ ७ ॥ ४ ॥ ८६ ॥

सदृशे वा गुणो द्विः स्यात्, प्लुप् स्यादेस्तत्र चादिमे ।
सा च रित् स्यात् पटः शुक्लः, शुक्लः कालककालिका ॥८६॥

## प्रियसुखं चाकृच्छ्रे ॥ ७ ॥ ४ ॥ ८७ ॥

प्रियसुखावकृच्छ्रे वा, द्विरुच्येते तदादिमे ।
स्यादेः प्लुप् स्याद् ददातीद्धः, प्रियप्रियेण नित्यशः ॥८७॥

## वाक्यस्य परिवर्जने ॥ ७ ॥ ४ ॥ ८८ ॥

वाक्यस्यावयवो नैव, पदस्य वर्जने परिः ।
द्विर्वा भवेत् त्रिगर्तेभ्यः; परिपरि घनः स्थितः ॥ ८८ ॥

---

आबाधो मनःपीडा प्रयोक्तृधर्मः ॥ ८५ ॥ रित्करणं प्रतिषिद्धस्यापि पुंवद्भावस्य 'रिति' ३-२-५८ इति विधानार्थम् । शुक्लादिसदृशमपरिपूर्ण-गुणमेवमुच्यते । वाग्रहणात् पक्षे जातीयरपि भवति शुक्लजातीयः । सदृश इति किम् ? शुक्लः पटः ॥ ८६ ॥ पक्षे प्रियेण ददाति । अकृच्छ्र इति किम् ? प्रियः पुत्रः । चकारः प्लुप् चादौ स्यादेः इत्यस्यानुकर्षणार्थः ॥ ८७ ॥ पक्षे परि त्रिगर्तेभ्यो वृष्टो मेघः । वाक्यस्येति किम् ? परित्रिगर्तं वृष्टो मेघः । परिरिति किम् ? अपत्रिगर्तेभ्यो वृष्टो मेघः । वर्जन इति किम् ? साधुर्देवदत्तो मातरं परि ॥ ८८ ॥

## संमत्यसूयाकोपकुत्सनेष्वाद्यामन्त्र्यमादौ स्वरेष्व-न्त्यश्च प्लुतः ॥७॥४॥८९॥

संमत्यादौ पदं चाद्य–मामन्त्र्यार्थं द्विरुच्यते ।
द्वित्वे स्वरः प्लुतोऽन्त्यो वा, शक्तिके३ शक्तिकेऽपंय ॥८९॥

## भर्त्सने पर्यायेण ॥७॥४॥९०॥

भर्त्सनेऽन्त्यः स्वरो वा स्यात्, प्लुतः पर्यायतः पुनः ।
चौर३चौर हनिष्यामि, दस्यो दस्यो३ इतो व्रज ॥९०॥

## त्यादेः साकाङ्क्षस्याङ्गेन ॥७॥४॥९१॥

भर्त्सनेऽन्त्यः स्वरस्त्यादेः, स्वरेषु वा प्लुतो भवेत् ।
साकाङ्क्षस्य युतस्याङ्गे–न सम्बन्धी निबुध्यताम् ॥९१॥

कार्येष्वाभिमत्यं संमतिः, पूजनं वा । परगुणासहनमसूया । कोपः क्रोधः । निन्दा कुत्सनम् । एते प्रयोक्तृधर्मा नाभिधेयधर्माः । शेषं व्यक्तम् । उदाहरणादिविस्तरो बृहद्वृत्तेरवसेयः ॥८९॥ भर्त्सनं कोपेन दण्डाविष्करणम्, तत्र द्विर्वचनं सिद्धमेव प्लुतार्थं आरम्भ ॥९०॥ भर्त्सने वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरस्त्याद्यन्तस्य पदस्य वाक्यान्तराकाङ्क्षस्य अङ्ग इत्यनेन निपातेन युक्तस्य सम्बन्धी प्लुतो वा भवतीति स्पष्टोऽर्थः । उदाहरणाद्यनुसन्धेयम् ॥ ९१ ॥

## क्षियाशीःप्रैषे ॥७॥४॥९२॥

क्षियायामाशिषि प्रैषे, वर्तमानस्य संभवेत् ।
साकाङ्क्षस्य स्वरेष्वन्त्य–स्त्यादेः स्वरः प्लुतो हि वा ॥९२॥

## चितीवार्थे ॥७॥४॥९३॥

इवार्थे चिति वाक्यस्य स्वरेष्वन्त्यः स्वरः प्लुतः ।
वा स्याद् राजा हि चिद् भूया३त्, इत्यादिकं विचार्यताम् ॥९३॥

## प्रतिश्रवणनिगृह्यानुयोगे ॥७॥४॥९४॥

एतयोर्वर्तमानस्या–न्त्यस्वरो वा भवेत् प्लुतः ।
तद् गां मे देहि भोः ? हन्त ? ते ददामि३ विबुध्यताम् ॥९४॥

## विचारे पूर्वस्य ॥७॥४॥९५॥

स्वरेष्वन्त्यो विचारे वा, पूर्वस्य स्यात् स्वरः प्लुतः ।
तदहिर्नु३ च रज्जुर्नु, स्थानुर्नु३ पुरुषोऽथ नु ॥९५॥

---

क्षिया आचारभ्रेषः । आशीः प्रार्थनाविशेषः । प्रैषोऽसत्कारपूर्विका व्यापारणा । स्पष्टमन्यत् ।९२॥ पक्षे राजा चिद्भूयात् । राजाचित्, राजेवेत्यर्थः ॥९३॥ प्रतिश्रवणं परोक्तस्याभ्युपगमः स्वयं प्रतिज्ञानं श्रवणाभिमुख्यं च । निगृह्य स्वमतात् प्रच्याव्यानुयोगो निग्रहपदस्याविष्करणं निगृह्यानुयोगः । उपलम्भ इति यावत् । पक्षे हन्त ते ददामीति ॥९४॥ किमिदं स्यात् किमिदमिति निरूपणं विचारः, संशय इति यावत् । पक्षे अहिर्नु रज्जुर्नु । स्थानुर्नु पुरुषो नु इति ॥९५॥

## ओमः प्रारम्भे ॥७॥४॥९६॥

ओमित्यस्य स्वरेष्वन्त्यः, प्रारम्भे वा स्वरः प्लुतः ।
ओ३म् ऋषभं पवित्रं वा, ओमृषभं पवित्रकम् ॥९६॥

## हेः प्रश्नाख्याने ॥७॥४॥९७॥

प्रश्नाख्याने हि शब्दस्य, स्वरोऽन्त्यो वा प्लुतो भवेत् ।
अकार्षीः किं कटं चैत्र !, अकार्षं हि ३ स उक्तवान् ॥९७॥

## प्रश्ने च प्रतिपदम् ॥७॥४॥९८॥

प्रश्नाख्याने च प्रश्ने च, प्रतिपदं स्वरः प्लुतः ।
वा भवेदगम३ः पूर्वा३न्, ग्रामा३न् चैत्र३ किमत्वरम् ॥९८॥

## दूरादामन्त्र्यस्य गुरुर्वैकोऽनन्त्योऽपि लनृत् ॥ ७ ॥ ४ ॥ ९९ ॥

आमन्त्र्यस्य गुरुर्दूरा-द्वैकोऽनन्त्योऽपि वा प्लुतः ।
स्वर लृश्च ऋवर्ज्यः स्या-दागच्छ भो ऋषीश्वर३ ॥९९॥

---

स्पष्टम् ॥९६॥ पृष्टप्रतिवचनं प्रत्याख्यानम् ॥९७॥ प्रश्नाख्याने अगम ३ म् पूर्वा३न ग्रामा ३ न जिनदत्त ३। इति ॥ ९८ ॥ यत्र प्राकृतात् प्रयत्नात् प्रयत्नविशेषे आश्रीयमाणे संदेहो-भवति किमयं श्रोष्यति नवेति तद् दूरम् । पक्षे आगच्छ भो ऋषीश्वर । विशेषो बृहद्वृत्तेरवसेयः ॥९९॥

## हेहैष्वेषामेव ॥ ७ ॥ ४ ॥ १०० ॥

यत्रतत्रस्थयोर्हेहै, इत्येतयोः स्वरः प्लुतः ।
आमन्त्र्यस्य भवेद् दूरा-दन्त्यो वा हे३ ऋषीश्वर ॥ १०० ॥

## अस्त्रीशूद्रे प्रत्यभिवादे भो गोत्रनाम्नो वा ॥ ७ ॥ ४ ॥ १०१ ॥

भवेत् प्रत्यभिवादे वा, स्त्रीशूद्रवर्जिते स्थिते ।
भोःशब्दगोत्रनाम्नश्चा-मन्त्र्यस्यान्त्यः स्वरः प्लुतः ॥१०१॥

## प्रश्नार्चाविचारे च संधेयसंध्यक्षरस्यादिदुत्परः ॥ ॥ ७ ॥ ४ ॥ १०२ ॥

प्रश्नादिषु स्वरेष्वन्त्य-स्वरस्य स्यादिदुत्परः ।
आत् सन्धियोग्यसन्ध्यक्ष-रस्य प्लुतो भवन् प्लुतः ॥ १०२ ॥

---

एवमागच्छ ऋषीश्वर हे ३ । इत्यादिकं ज्ञेयम् । है विषये-ऽप्येवमेव ॥१००॥ यदभिवाद्यमानो गुरुः कुशलानुयोगेना शिषा वा युक्तं वाक्यं प्रयुङ्क्ते स प्रत्यभिवादः । अभिवाद ये देवदत्तोऽहं भोः ३ । अभिवादये देवदत्तोऽहं भोः । आयुष्मा-नेधि भोः३ । आयुष्मानेधि भोः३ । आयुष्मानेधि भोः । इत्यादि बोध्यम् ॥१०१॥ विशदोऽस्य विमर्शो बृहद्वृत्तेर्ज्ञेयः ॥१०२॥

## तयोर्य्वौ स्वरे संहितायाम् ॥ ७ ॥ ४ ॥ १०३ ॥

प्लुताकारात् परस्थस्य, चेतश्चोतः स्वरे परे।
संहितायां यथासङ्ख्य-मादेशो यश्च वस्तथा ॥ १०३ ॥

## पञ्चम्या निर्दिष्टे परस्य ॥ ७ ॥ ४ ॥ १०४ ॥

कार्यं यदत्र पञ्चम्या, निर्दिष्टे तत् परस्य वै।
स्थाने भवेत् परस्यातो, भिस ऐस् स्यादनन्तरः ॥ १०४ ॥

## सप्तम्या पूर्वस्य ॥ ७ ॥ ४ ॥ १०५ ॥

कार्यं यदत्र सप्तम्या, निर्दिष्टेऽनन्तरस्य तत्।
स्थाने पूर्वस्य विज्ञेय,-मस्वे स्वरे परे सति ॥ १०५ ॥

## षष्ठ्याऽन्त्यस्य ॥ ७ ॥ ४ ॥ १०६ ॥

कार्यं षष्ठ्याऽत्र निर्दिष्टे, यत् तदन्त्यस्य जायते।
अष्टाभिरथ चाष्टासु, नस्या भवेद्विभाषया ॥ १०६ ॥

---

अविरामः संहिता। उदाहरणादि बृहद्वृत्तौ ॥ १०३ ॥ अत इत्यादौ दिग्योगलक्षणा पञ्चमी। तत्र पूर्वस्य च परस्य कार्यं स्यादिति नियमार्थं वचनम् ॥१०४॥ स्वरे इत्यादौ औपश्लेषिकमधिकरणं पूर्वं परं च संभवति तत्र परमेव-प्राह्यमिति नियमार्थं वचनम् ॥१०५॥ 'वाष्टन आः स्यादौ' १-४-५२ इति सूत्रेऽत्र प्रवृत्तिः ॥१०६॥

## अनेकवर्णः सर्वस्य ॥ ७ ॥ ४ ॥ १०७ ॥

अनेकवर्ण आदेशः, षष्ठ्या सर्वस्य जायते ।
भवेत्त्रिचतुरः स्यादौ, तिसृचतसृ सर्वतः ॥ १०७ ॥

## प्रत्ययस्य ॥ ७ ॥ ४ ॥ १०८ ॥

आदेशः प्रत्ययस्थाने, सर्वस्यैव प्रजायते ।
जस इः जम्शसोरौः स्यात्, सर्वे चाष्टौ यथा भवेत् ॥१०८॥

## स्थानीवावर्णविधौ ॥ ७ ॥ ४ ॥ १०९ ॥

वर्णविधिं परित्यज्य, ह्यादेशः स्थानिवद् भवेत् ।
वक्ता कस्मै मनुष्याय, राजा प्रस्तुत्य धार्मिकः ॥१०९॥

## स्वरस्य परे प्राग्विधौ ॥ ७ ॥ ४ ॥ ११० ॥

स्वरादेशः परे पूर्व–विधौ स्थानीव जायते ।
कथयत्यवधीदेवं, पादिकादि विमृश्यताम् ॥११०॥

## न सन्धिङीयक्विद्विदीर्घासद्विधावस्क्लुकि ॥ ७ ॥ ४ ॥ १११ ॥

सन्धिङीयविधौ क्विद्वि–दीर्घविधावसद्विधौ ।
स्क्लुक्वर्जिते स्वरादेशः, स्थानीव न भवेत् पुनः ॥१११॥

---

पूर्वस्यापवादोऽयम् । एवमुत्तरोऽपि ॥१०७॥ स्पष्टम् ॥१०८॥ सूत्रस्यास्य विस्तरो बृहद्वृत्तेर्विज्ञेयः ॥१०९॥ कथयतीत्यादौ अल्लुकः स्थानिवद्भावादुपान्त्यलक्षणा वृद्धिर्न भवति । एवमन्यदप्यवसेयम् ॥११०॥ तत्तदुदाहरणादि बृहद्वृत्तेर्बोध्यम् १११॥

## लुप्यय्वृल्लेनत् ॥७॥४॥११२॥

त्यक्त्वा य्वृल्लत्वमेनच्च, पूर्वकार्यं न जायते।
प्रत्ययस्य परस्यात्र, लुपि स्यात् कुवलं फलम् ॥११२॥

## विशेषणमन्तः ॥७॥४॥११३॥

विशेषणं विशेष्यस्य, स्यादन्तोऽवयवस्ततः।
कुण्डं तिष्ठति कुण्डं च, पश्येत्यादि विलोक्यताम् ॥११३॥

## सप्तम्या आदिः ॥७॥४॥११४॥

सप्तम्यन्तविशेष्यस्य, यद्विशेषणमत्र तत्।
अवयवो हि तस्यादि-र्भवेत् पथः पथामिति ॥११४॥

## प्रत्ययः प्रकृत्यादेः ॥७॥४॥११५॥

प्रकृत्यादेः समूहस्य, प्रत्ययः स्याद्विशेषणम्।
तद्भवेन्मातृभोगीणः, खारपायण इत्यपि ॥ ११५ ॥

---

स्थानीवावर्णविधाविति लुपः स्थानिवद्भावेन प्राप्तानां पूर्वेषां कार्याणां प्रतिषेधार्थं वचनम् ॥११२॥ विशिष्यतेऽनेनेति विशेषणम्। विशेषणं विशेष्यस्य समुदायस्यान्तोऽवयवो भवति। इह शास्त्रे धात्वादिः समुदायोऽभेदेनावयवविशेषणक उपादीयते, तत्र सोऽवयवस्तत्समुदायस्यान्तत्वेन नियम्यते इति सूत्रस्यास्य विशदोऽर्थः ॥११३॥ 'इन् ङीस्वरे लुक्' इत्यस्य पथः पथामिति बोध्यम्। इह न भवति पथिषु। एवमन्यदपि ॥११४॥ यस्माद्यः प्रत्ययो विधीयते सा तस्य प्रकृतिः। शेषमभिव्यक्तम् ॥११५॥

## गौणोङ्यादिः ॥७॥४॥११६॥

स्यान्ङ्यादि प्रत्ययो गौणः, प्रकृत्यादेर्विशेषणम् ।
तेनातिकौमुदगन्ध्य–बन्धुरित्यादिकं भवेत् ॥ ११६ ॥

## कृत्सगतिकारकस्यापि ॥७॥४॥११७॥

गतिकारकपूर्वस्य, प्रकृत्यादेर्विशेषणम् ।
कृत्प्रत्ययोऽपिशब्दाच्च, केवलस्यापि जायते ॥११७॥

## परः ॥७॥४॥११८॥

प्रत्ययो यः स निश्शङ्कं, प्रकृतेः परतो भवेत् ।
वृक्षो वृक्षावजा खट्वा, मीमांसते जुगप्सते ॥११८॥

## स्पर्धे ॥ ७ ॥ ४ ॥ ११९ ॥

स्पर्धे हि सूत्रपाठे यः, परः सैव विधिर्भवेत् ।
‘ शसोऽता सश्च नः पुंसि ’ ततो ‘नपुंकस्य शिः’ ॥११९॥

---

ङीमारभ्य ष्यं यावत् ङ्यादिः प्रत्ययः स गौण उपसर्जनं सन् प्रकृत्यादिसमुदायस्स विशेषणं भवति नोनाधिकस्येति- व्यक्तोऽर्थं । पूर्वेणैव सिद्धेऽगौणस्याधिकपरिग्रहार्थं वच- नम् ॥११६॥ विशेषोऽत्रत्यो बृहद्वृत्तेरवसेयः ॥११७॥ स्पष्टम् ॥ ११८ ॥ द्वयोर्विध्योरन्यत्र सावकाशयोस्तुल्यबलयोरेकत्र अनेकत्र च उपनिपातः स्पर्धः । परस्परप्रतिबन्धे नाप्रवृत्तौ पर्याये वा वचनम् ॥ ११९ ॥

## आसन्नः ॥ ७ ॥ ४ ॥ १२० ॥

स्यात् स्थानार्थप्रमाणाद्यै-रासन्नो हि विधिस्ततः ।
दण्डाग्रमथ चामुष्यै, वातण्डययुवतिस्तथा ॥ १२० ॥

## सम्बन्धिनां सम्बन्धे ॥ ७ ॥ ४ ॥ १२१ ॥

कार्यं सम्बन्धिशब्दाना-मुक्तं सम्बन्ध एव तत् ।
मातृष्वसा श्वशुर्यश्च, मातृस्वसा च श्वाशुरिः ॥१२१॥

## समर्थः पदविधिः ॥ ७ ॥ ४ ॥ १२२ ॥

पदविधिः समर्थः स्यात्, स्यात् सामर्थ्यमनेकधा ।
व्यपेक्षा पुनरेकार्थीभावः सिद्धैः सहास्तु सन् ॥१२२॥

इति सिद्धहेमसरस्वत्यां सप्तमोऽध्यायः ॥

---

स्थानेन दण्डाग्रमिति । अर्थेन वातण्डययुवतिः । प्रमाणेन अमुष्यै ॥१२०॥ मातृष्वसा, श्वशुर्यं इति सम्बन्धोदाहरणम् । मातृस्वसा इति धान्यमातुः स्वसा, श्वाशुरिरिति संज्ञाशब्दादिजेव ॥१२१॥ सूत्रस्यास्य विस्तृतोऽर्थं बृहद्वृत्तेर्मीमांसनीयः ॥ १२२ ॥

इति सिद्धहेमसरस्वतीटिप्पणिकायां सप्तमोऽध्यायः ।

षष्ठ—सप्तमाध्यायात्मको द्वितीयः खण्डः समाप्तः ।